किञ्चासति बाधके वैदिकप्रसिद्धेर्ग्राह्यत्वेऽपि सति बाधके त्याज्य-त्वात्। तत् किं बाधकमिति चेदाकर्णय तावत्। तावेतौ सत्वक्षेत्र-ज्ञावित्युक्तद्वित्वसङ्ख्यायाः प्रतीतेः तस्याश्च समानस्वभावेष्वेव लोकसिद्धत्वात्।

यदा भवद्भाष्यकारैरपि ऋतं पिबन्तावित्यत्र समानस्वभावगत-सङ्ख्याप्रतीतिं लोकसिद्धामनुरुध्य जीवपरमात्मानाविति सिद्धान्तयित्वा ऋतं पिबन्तावित्यत्र छत्रिन्यायेन लक्षणा अङ्गीकृता तदा किमु वक्तव्यं वैदिकीं प्रसिद्धिं हित्वा लौकिकी ग्राह्येति।

न च सत्वशब्दस्य जीवपरत्वे तदेतत्सत्वम् येन स्वप्नं पश्यतीत्यत्र करणार्थकतृतीयानुपपत्तिः। सहार्थत्वेनापि तस्याः सम्भवात्। येन सहभूतः परमात्मा स्वप्नं पश्यतीत्यर्थः।

न च उपपदविभक्तेः कारकविभक्तिर्बलीयसी इति कारकविभक्तिरेवाश्रयणीयेति तथाच सत्वशब्दस्य बुद्धिपरत्वमायातमिति मन्तव्यम्। बाधकस्योक्तत्वात्।

ननु जीवेन सहभूतः परमात्मा स्वप्नं पश्यतीत्यत्र किं मानमिति चेदत्र वयं ब्रूमः।

सन्ध्ये स्थाने तिष्ठन् एते उभे स्थाने पश्यति।
स्वप्नेन शारीरमभिप्रहत्यासुप्तः सुप्तानभिचाकाशीति।
प्राणेन रक्षन्नवरं कुलायं बहिष्कुलायादमृतश्चरित्वा।
आराममस्य पश्यन्ति न तं पश्यति कश्चन।

इत्यादिश्रुतेरेव मानत्वात्।

ननु पश्यतीत्यस्य कर्त्रपेक्षायामुत्तरवाक्यस्थोपद्रष्टुरेव तत्वेनान्वयो वाच्यः। तच्च न सम्भवति। उपद्रष्टेत्यस्य कर्मापेक्षायां सन्निहितत्वात् स्वप्नस्यैव तत्त्वेनान्वये स्वप्नमुपद्रष्टा स्वप्नं पश्यतीति पौनरुक्त्यप्रसङ्ग इति चेन्न। शारीरस्यैव कर्तृत्वेनान्वयात्। न च शारीरपदस्य जीवपरत्वमिति वाच्यम्। योगेन कथंचिदीश्वरपरत्वस्यापि वक्तुं शक्यत्वात्। न च स एव दोषः। विधेयत्वात् क्षेत्रज्ञशब्दस्वारस्याबाधाय तस्य संह्यत्वात्। विधिस्वारस्यानुरोधेनानुवादास्वारस्याभ्युपगमस्य न्याय्यत्वात्। क्षेत्रज्ञशब्दो जीवपरोऽस्त्विति चेन्न।

क्षेत्रज्ञं चापि मा विद्धि सर्वक्षेत्रेषु भारत।
प्रकृतेश्च विकाराणां द्रष्टारमगुणान्वितम्॥
क्षेत्रज्ञमाहुर्जीवं तु कर्तारं गुणसंयुतम्।

इत्यादौ ईश्वरपरत्वस्यैव प्रसिद्धेः। यद्वा शारीरे जीवे स्थित्वा स्वप्नं पश्यतीत्यन्वयः।

न च अथ योऽयमिति वचनभङ्गी स्वरसतो विषयापरोक्ष्यं वा पूर्ववाक्यसन्निधापितां बुद्धिविपरिवृत्तिं वा अपेक्षते। न च तदुभयं त्वन्मते सम्भवतीति वाच्यम्। अयमिति वचनभङ्ग्याः प्रमाणप्रसिद्धिमादायापि अयं वै हरयोऽयं दश च सहस्राणि बहूनि चेत्यादाविव स्वरसत्वात्। यद्वा वस्त्रप्रावृते जानुनीदं जानु इत्यादाविव प्रत्यक्षनिर्देशोपपत्तेः।

ननु ब्रह्मण एव क्षेत्रज्ञपदवाच्यत्वे तस्य जीवादत्यन्तभिन्नस्य 'अनश्नन्नन्योऽभिचाकशीतीति अनश्नन्नन्योऽभिपश्यति ज्ञः' इति ज्ञशब्दोपात्तस्य अशनाप्रसक्त्या तन्निषेधानुपपत्तिरिति चेन्न। ब्रह्मणोऽपि चेतनत्वेन जीववत् प्रसक्तिसम्भवात्। अन्यथा त्वन्मतेऽपि अद्वितीयमित्यत्र स्वगतभेदादिनिषेधस्य अप्रसक्तनिषेधत्वापत्तेः।

वस्तुतस्तु मन्मते ब्रह्मणोऽपि शुभफलभोक्तृत्वेन हेयफलभोक्तृत्वस्यापि प्रसक्तौ अनश्नन्नित्यनेन तन्निषेधात्।

किञ्च त्वन्मते सत्वशब्दस्य बुद्धिपरत्वे तयोरन्यः पिप्पलं स्वाद्वत्तीति प्रतीकग्रहणपूर्वकं व्याख्यातवतो ब्राह्मणस्य अशनकर्तृत्वस्य बुद्धावसम्भवात् अस्याननुरूपमेव स्यात्। न च उपाध्यभिप्रायं तदिति वाच्यम्। तस्य

बुद्धिगतत्वे गुहां प्रविष्टत्वाद्यधिकरणसिद्धान्तभङ्गः त्वन्मते स्यात्। तदुक्तं विवरणे -

ऋतपानेन कर्तृत्वे निश्चिते सद्वितीयता।
ब्रह्मणा सस्वरूपेण न तु बुध्या विरूपया ॥ इति ॥

अत्र स्ववाग्वैखरीनर्तकीनर्तिताखिलाद्वैतवादिमण्डलिकाः चतुः-शास्त्रपारावारविहारिणः ज्येष्ठभ्रातरः तत्रतत्राद्वैतप्रसङ्गे बहूनि दूषणानि अवदन्। तथापि बहुकालव्यवधानेन विस्मृतत्वात् नात्र तान्यलिखम्।

ननु पूर्वपक्षिणा उक्तानां दोषाणामपरिहारे सिद्धान्ते स्फुटमाभास-समानत्वात् कथं ते परिहरणीया इति चेत् अत्र वयं ब्रूमः। पूर्वोक्त-सिद्धान्तेनैवोक्तदोषाणां परिहारः स्फुट एव। तथाहि - यदुक्तं मुख्यार्था-न्वयाबाधेऽपि कर्तरि करणत्वोपचाराश्रयणं प्रथमो दोष इति तन्न। मन्मते येनेति तृतीयायाः सहार्थत्वेन कर्तरि करणत्वोपचाराश्रयणाभावात्। प्रत्युत त्वन्मते अन्तःकरणस्य कर्तृत्वेन तत्र करणत्वोपचाराश्रयणस्य दोषत्वम्। मुख्यार्थान्वयस्य सत्वशब्दवाच्यजीवपक्षे सम्भवात् न प्रथमदूषणम्।

यदप्युक्तं बाधकं विना मुख्यार्थान्वयपरित्यागो द्वितीयं दूषणम्। तदपि न शोभां बिभर्ति। मुख्यार्थपरित्यागः किं सत्वशब्दस्य उत येनेति यच्छब्दस्य। नाद्यद्वितीयौ। सत्वशब्दयच्छब्दयोः द्वयोरपि जीवपरत्वात् तत्कथं मुख्यार्थान्वयपरित्याग इति द्वितीयमपि दूषणं परास्तम्।

यदप्युक्तं 'किं तत्सत्वं? कश्च क्षेत्रज्ञः ?' इति जिज्ञासायां प्रथम-जिज्ञासितसत्वस्वरूपज्ञापनाय तल्लक्षणे वाच्ये तदनुपयुक्तकरण-

सादृश्यकथनादप्राप्तकालत्वमिति तदमङ्गलम्। सिद्धान्तेऽपि किं सत्वस्य स्वरूपमिति प्रथमजिज्ञासायां सत्वशब्दवाच्यजीवस्वरूपज्ञापनाय जीवलक्षणस्यैव येन स्वप्नं पश्यतीत्यनेन कथनात् नाप्राप्तकालत्वमिति तृतीयदोषोऽपि परास्तः।

ननु जीवसहितेश्वरस्य स्वप्नदर्शने किं मानमिति चेत् अवेहि। तस्य वा एतस्येति खण्डे सन्ध्ये स्थाने तिष्ठन् एते उभे स्थाने पश्यतीति भगवतः स्वप्नद्रष्टृत्वमुपक्रम्य न तत्र रथा न रथयोगा न पन्थानो भवन्ति सृजते इति खण्डे स हि सर्वस्य कर्तेत्यनेन स्वाप्नकर्तृत्वमुक्त्वा

स्वप्नेन शारीरमभिप्रहत्यासुप्तः सुप्तानभिचाकशीति।
शुक्रमादाय बहिष्कुलायादमृतश्चरित्वा।
स्वप्नान्त उच्चावचमीयमानो रूपाणि देवः कुरुते बहूनि।
आराममस्य पश्यन्ति न तं पश्यति कश्चन।

इत्यादिखण्डेषु जीवेन सह स्वाप्नदर्शनस्य भगवतः कथनात् बृहदारण्यक-वाक्यस्यैव प्रमाणत्वात्।

न च जीववाचकपदाभावात् कथं जीवेन सह पश्यतीति कथनमिति वाच्यम्। शारीरशुक्रादिपदानामेव तद्वाचकत्वादिति। उत्तरत्रापि

स वा एष एतस्मिन् बुद्धान्ते रत्वा चरित्वा
दृष्ट्वैव पुण्यं च पापं च।

इत्यादिना सुप्तदर्शनोक्तेश्च।

किञ्च सर्वं मन एवेति श्रुत्या मनस उपादानत्वकथनात् तत्करणत्व-कथनस्यासङ्गतत्वादिति तृतीयमपि दूषणं परास्तम्।

यदपि लक्षणजिज्ञासायामन्यदेव कथयन्त्याः श्रुतेः प्रतारकत्वेना-प्रामाण्यमिति चतुर्थमपि दूषणं तत्केवलमज्ञानविजृम्भणम्। मन्मते सत्वशब्दवाच्यजीवलक्षणं कथयन्त्याः श्रुतेः कथं प्रतारकत्वम् कथं चाप्रामाण्यम्।

किञ्च तावके मते एव स्वभाष्यादिविरुद्धार्थकथनात् सत्वश्रुतेः प्रतारकत्वाप्रामाण्ये स्याताम्। स्वभाष्यादिविरुद्धार्थकत्वस्य पूर्वमेवा-वेदितत्वात् चतुर्थोऽपि निरस्तः।

यच्चोक्तम्- अथ योऽयमित्यादिना अग्रे कर्तुरुपदेशेनेह करणोप-देशौचित्यस्य त्याग इति पञ्चमो दोषः इति तदज्ञानविलसितम्। करणार्थकतृतीयायाः सहार्थत्वेनापि सम्भवात् न करणार्थकतृतीयानुप-पत्तिरिति।

न च उपपदविभक्त्यपेक्षया बलवती कारकविभक्तिरेवाश्रयणीयेति वाच्यम्। तत्पक्षे बाधकस्य पूर्वमेवावेदितत्वात् करणोपदेशौचित्यत्यागो युक्त एवेति नापि पञ्चमो दोषः।

यदप्युक्तम्- शारीरादत्यन्तभिन्नस्य ब्रह्मणः परोक्षतया अयमित्यप-रोक्षनिर्देशानुपपत्तिः षष्ठो दोष इति तन्मन्दम्। अयमिति वचनभङ्ग्याः प्रमाणसिद्धिमादायापि अयं वै हरयोऽयं वै दश च सहस्राणि इत्यादाविव स्वरसत्वात्। वस्त्रप्रावृते जानुनि लोकेऽपि अयमिति प्रात्यक्षिकनिर्देशस्येव उक्तनिर्देशस्य सुवचत्वाच्च। बाधकस्योक्तत्वाच्च। वेदे वैदिकार्थस्यैव वाच्यत्वाच्च न षष्ठो दोषः।

यदप्युक्तम्- यत्पदोपात्तस्य जीवस्य कर्तृत्वेन करणत्वासम्भवादि-

त्यादिना सप्तमं दूषणम्, तन्न। यत्पदोपात्तस्य जीवस्य करणत्वस्या-कथनादेव न सप्तमो दोषः। येनेति सहार्थे तृतीयायाः उक्तत्वादिति।

वस्तुतस्तु- त्वत्पक्ष एव बहवो दोषाः। तथाहि- त्वन्मते एवान्तः-करणस्य कर्तृत्वेन येनेति करणत्वोपचाराश्रयणं प्रथमो दोषः। तावेतौ सत्वक्षेत्रज्ञावित्यत्र सङ्ख्याप्रतीतेः तस्याश्च समानस्वभावेष्वेव लोक-सिद्धत्वात् तद्विरोधः द्वितीयो दोषः। त्वदीयभाष्ये गुहां प्रविष्टावात्मानौ इत्यस्मिन्नधिकरणे कर्ता शास्त्रार्थवत्त्वादित्यधिकरणे च जीवेश्वरयोः कर्तृत्वकथनात् अधिकरणद्वयविरोधः स्यादिति तृतीयो दोषः।

(नित्यो नित्यानां इति काठकश्रुतेर्भेदपरत्वम्)

किञ्च 'नित्यो नित्यानां चेतनश्चेतनानाम्' इत्यादि जीवेश्वरनित्य-चेतनबहुत्वनियम्यनियामकभावावेदकश्रुतिरपि भेदे मानम्।

ननु अत्र श्रूयमाणा षष्ठी निर्धारणषष्ठ्येवास्तु, किं सम्बन्धसामान्य-षष्ठ्या येन नियम्यनियामकभावाद्यावेदकत्वं स्यादिति चेन्न। श्रुतिगतेन नित्यो नित्यानां चेतनश्चेतनानामिति षष्ठीबहुवचनेन नृणां नृषु वा द्विजः श्रेष्ठः, गवां गोषु वा कृष्णा गौः बहुक्षीरा, गच्छतां गच्छत्सु वा धावन् शीघ्रः इत्यादाविव जातिगुणक्रियादिभिरेकदेशविवेचनस्य श्रेष्ठादि-पदाभावेऽप्रतीयमानतया यतश्च निर्धारणमिति शास्त्रविहितनिर्धारण-षष्ठीबहुवचनत्वासम्भवेन संबन्धसामान्यषष्ठीबहुवचनतायाः तत्प्रतिपाद्य-नियम्यनियामकभावस्य बहुत्वस्य च विना अनौपाधिकभेदमयोगात्।

जक्षन् क्रीडन् रममाणः, परमं साम्यमुपैति, सर्वान् कामान्

ब्रह्मणा सह विपश्चितेति, न यत्र माया किमुतापरे
हरेरनुव्रता यत्र सुरासुरार्चिताः श्यामावदाताः सुरुचः
सुपेशसः ।

इत्यादिश्रुतिस्मृतिषु मुक्तिदशायामेव मुक्तबहुत्वावेदनेन तस्य च भेदं विनाऽयोगेन मुक्तभेदस्वाभाविकतायाः दुर्निवारत्वाच्च ।

ननु परमं साम्यमुपैतीत्यनेन मुक्तौ जीवेश्वरयोरभेद एवोच्यते, न तु सादृश्यम् । समं सर्वमित्यभिधानात् समशब्दः सर्वपर्यायः । तस्य भावः साम्यं सर्वात्मकत्वमिति तदर्थज्ञानादिति चेन्न। समशब्दस्य नानार्थकत्वेन किमर्थपरत्वमिति विशये

'तं यथायथोपासते तदेव भवति ।'

'यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति ।
एवं मुनेर्विजानत आत्मा भवति गौतम ॥'

'इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ।'

इत्यादि श्रुतिस्मृत्यनुसारेण तस्य सदृशपर्यायत्वाश्रयणस्यैवोचितत्वात् । सर्वपर्यायत्वे च साम्यशब्देनैव ब्रह्मभूयस्य लाभसंभवेन परमशब्दवैयर्थ्याच्च । सदृशपर्यायत्वे च तस्य अन्तरंगसादृश्यप्रापकत्वेनावैयर्थ्यात् ।

(अतोऽन्यदार्तमिति बृहदारण्यकवचनस्य भेदपरत्वम्)

अपि च अतोऽन्यदार्तमिति श्रुतिरपि जीवेश्वरभेदे प्रमाणम् ।

ननु अतोऽन्यज्जगत् आर्तम् आ ईषदृतं सत्यं मिथ्येत्यर्थपरत्वसम्भवान्न भेदे मानम्, अपि तु अभेद एवेति चेन्न । अतोऽन्यदित्यत्रान्यशब्देन

समानमितरत् श्येनेनेति न्यायेन सजातीयचेतनस्यैव ग्राह्यत्वात् । लोके अब्राह्मणः इत्यादौ तथा दर्शनाच्च । मिथ्यार्थकत्वे यौगिकत्वापत्त्या ततः प्रबलया रूढ्या दुःखित्वार्थक एवार्तशब्दः ।

अत एव वर्षासु रथकार आदधीतेत्यत्र रथकारशब्देन अपूर्वविद्याकल्पनापत्त्या रथकरणसमर्थस्य त्रैवर्णिकस्य ग्रहणमिति पूर्वपक्षं प्रापय्य योगापेक्षया रूढेः शीघ्रगामित्वेन बलवत्वात् रूढ्या जातिविशेषस्यैव ग्रहणमिति सिद्धान्तितम् । अत एव राजा राजसूयेन यजेतेत्यत्र राज्ययोगनिमित्तेन राजशब्देन त्रैवर्णिकानां ग्रहणमिति पूर्वपक्षे प्राप्ते राजशब्दस्य क्षत्रियत्वजातौ रूढत्वात् रूढेः शीघ्रगामित्वेन क्षत्रियस्यैव ग्रहणमिति सिद्धान्तितम् ।

वयं तु ब्रूमः । अतोऽन्यदार्तमित्यस्य आर्तं जीवजातमुद्दिश्य ब्रह्मणः सकाशादन्यत्वविधाने तात्पर्यम् ।

ननु यद्वृत्तयोगप्राथम्यलक्षणोद्देशलक्षणस्य प्रकृतेऽभावात् कथमुद्देश्यत्वमिति चेन्न। उक्तलक्षणस्य वायव्यं श्वेतमालभेत भूतिकाम इत्यादौ अभावात् भूतिकामस्य उद्देश्यत्वं न स्यात् ।

ननु आर्तशब्दस्य कथं दुःखिनि रूढिरिति चेन्न। आर्तो जिज्ञासुरिति गीतावचनात् । अयं रोगार्तः अयं दुःखी अयमार्त इति लोकव्यवहारदर्शनाच्च ।

केचित्तु अतोऽन्यज्जगद् आर्तं विनाशीत्यर्थः। हविरार्तिमार्च्छेदित्यादौ आर्तिशब्दस्य विनाशित्वार्थकत्वदर्शनादित्याहुः। तन्मन्दम् । अतोऽन्यदित्यस्य अतः अन्तर्यामिणः अन्यदित्युक्त्या समानमितरच्छ्येनेनेति

न्यायेन सजातीयचेतनपरत्वे सिद्धे तदनुरोधेनानन्तरश्रुतार्तपदस्य दुःखित्वार्थकत्वावसायात्। जीवजातं दुःखीति प्रतिपादयतोऽतोऽन्यदित्युपसंहारस्य यः पृथिव्या अन्तर इत्यारभ्य यो विज्ञानादन्तर इत्यन्तेनोपक्रान्तभेदोपपादकतया अपेक्षितविधायकत्वं सम्भवति॥

अत एव चतुर्थे द्वितीयपादे चात्वाले कृष्णविषाणां प्रास्यतीति श्रुतम्। तत्र संशयः। किं चात्वाले प्रासनमर्थकर्म उत प्रतिपत्तिरिति। तत्र न द्रव्यस्य कृतार्थस्य संस्कारेण प्रयोजनम्। अतो नेयं प्रतिपत्तिः इडास्विष्टकृदादिवत्। किञ्चिद्द्रव्याश्रयं कर्म तत्सर्वमर्थकर्म। निर्वृत्तेऽर्थे संस्कारेण प्रयोजनाभावादिति पूर्वपक्षे प्राप्ते कृतार्थमपि द्रव्यं व्याकीर्णकरमित्यतः प्रतिपत्तिमपेक्षते। तद्विधानमतो वरम्। अपेक्षिततया प्रतिपत्तिविधौ निश्चिते तद्बलादेव तल्लोपे निर्वृत्तमपि प्रयोजनं विपद्यत इति कल्प्यत इति सिद्धान्तितम्॥

अत एव च 'तेषामर्थेन सम्बन्धः' इत्यत्र दर्शपूर्णमासयो रौषध्याज्यसान्नाय्यधर्माः श्रुताः। ते किं सर्वत्र सम्भवन्ति उत संयोगव्यवच्छित्तिः इति संशयः। तत्र अवघातादीनां व्रीहिस्वरूपार्थत्वे आनर्थक्यापत्त्या अपूर्वसाधनत्वे लक्षणायाः आवश्यकत्वेन तस्य च सर्वसाधारणत्वात् सर्वत्र स्युरिति प्राप्ते आज्यसान्नाय्यादिषु अवघातविधाने अनपेक्षितविधानं स्यात्। अपूर्वविधित्वं च स्यात्। व्रीह्यादिषु अवधातविधाने अपेक्षितविधानं नियमविधित्वं स्यादिति सिद्धान्तितम्॥

अत एव च प्रयाजशेषेण हवींष्यभिधारयतीत्यत्र किमाघारणं हविःसंस्कारार्थम् उत प्रयाजशेषप्रतिपत्तिरिति। तत्रोपयुक्तसंस्कारात्

उपयोक्ष्यमाणसंस्कारस्याभ्यर्हितत्वात् तृतीयया गुणत्वोपगमाच्च हविःसंस्कारार्थमिति प्राप्ते प्रयाजशेषेणेति शेषशब्देन शेषस्य प्रतिपत्तिरपेक्षिता। तादर्थ्ये हि अभिघारणं दृष्टार्थं भवति। हविःसंस्कारस्त्वनपेक्षितः अदृष्टं च परिकल्पयेत्। नच दृष्टे सम्भवति तद्युक्तमिति राद्धान्तितम्।

किञ्च आर्तशब्दस्य ध्वंसपरत्वे प्रपञ्चस्यानित्यत्वं स्यात्। नतु मिथ्यात्वम्। तस्य त्रैकालिकनिषेधरूपत्वात्। न च ब्रह्मातिरिक्तस्य सर्वस्यापि ध्वंसप्रतियोगित्वरूपमिथ्यात्वाङ्गीकारात् न सिद्धसाधनादिदोष इति वाच्यम्। आकाशवत् सर्वगतश्च नित्यः, नित्यो नित्यानां, अच्छेद्योऽयमिति श्रुतिस्मृतिबहुप्रमाणविरोधात् सर्वस्य प्रपञ्चस्य न ध्वंसप्रतियोगित्वमिति अस्मदुक्तार्थ एव प्रामाणिकः।

(नान्योऽतोऽस्ति द्रष्टेत्यादि बृहदारण्यकश्रुत्यर्थः)

किञ्च नान्योऽतोऽस्ति द्रष्टा, नान्योऽतोऽस्ति श्रोता, नान्योतोऽस्ति मन्तेति श्रुतिरपि जीवेश्वरभेदे प्रमाणम्। अस्यार्थः- अतो ब्रह्मणः अन्यः द्रष्टा ना पुरुषोऽस्ति। स च नाऽन्योऽतोऽस्ति। अदृष्टो द्रष्टा इत्यत्र देवतामुपास्ते अन्योऽसावन्योऽहमस्मीतिवत् लिङ्गव्यत्ययेनोपपत्तेः।

यद्वा अत इत्यनेन प्रस्तुतं सर्वनियन्तारं परामृश्य अन्यो द्रष्टा नास्तीत्युक्ते 'अस्मिन् ग्रामे अयमेव सर्वनियोजकः, नान्यः पुरुषोऽस्ति' इत्यादावन्यशब्दस्य प्रस्तुतसदृशान्यपरताया व्युत्पन्नत्वेनेहापि सर्वनियामकद्रष्ट्रन्तरनिषेधात्। उक्तं हि समानमितरच्छ्येनेनेत्यत्र इतरशब्दस्य पूर्वनिर्दिष्टसदृशपरत्वम्। अन्यथा 'य आत्मनोऽन्तरः यम् आत्मा न

वेद' इति पूर्ववाक्येन, 'एष ते आत्मान्तर्यामी' 'अतोऽन्यदार्तम्' इत्युत्तरवाक्येन च विरोधः स्यात्। तस्मादुक्तश्रुतेः निरतिशयद्रष्ट्रन्तरनिषेध एव तात्पर्यं उररीकर्तव्यमिति । विस्तरस्तु एतत्पक्षस्य न्यायामृतादौ स्पष्टः ।

वयं तु ब्रूमः- एतच्छ्रुत्यर्थानङ्गीकारे 'अदृष्ट' इत्यादिपूर्ववाक्ये अदृष्टत्वादिकं विरुध्येत। अनर्थकं च स्यात्। तथाहि - द्रष्ट्रन्तरस्याभावे केनायमदृष्टः स्यात्। जडे द्रष्टृत्वप्रसक्त्यभावात्।

न ह्ययमन्तर्यामी स्वेनैव स्वयमदृष्ट इति वक्तुं शक्यम्। नचेष्टापत्तिः। तथात्वे असर्वज्ञत्वापातात्। द्रष्टेति निरतिशयद्रष्टृत्वबोधनेन तद्विरोधाच्च । द्रष्टा श्रोता मन्तेत्यादिना द्रष्टृत्वादिकमुक्त्वा नान्योऽतोऽस्ति द्रष्टेत्यादिना द्रष्ट्रन्तर निषेधकरणे अदृष्टः अश्रुतः अमतः अविज्ञात इत्यस्यानर्थक्यं स्यात्। तच्च प्रबलतरदूषणमिति सर्वतान्त्रिकसम्मतम्।

अत एव मीमांसकाः सप्तदशारत्निर्वाजपेययूपो भवति, पर्यग्निकृतं पात्नीवतमुत्सृजतीत्यादौ आनर्थक्यप्रतिहतानां विपरीतं बलाबलमिति न्यायमाहुः। तस्मात् द्रष्ट्रन्तरसद्भाव एव हि अदृष्टत्वादिकं स्वरसतः संभवतीति।

अपि च नान्योऽतोऽस्तिश्रुतेः भेदनिषेधपरत्वे तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः इत्याद्यनेकपरमात्मद्रष्टृसदातनत्वावेदकश्रुति-विरोधः स्यात्। किञ्च सङ्ख्यामुष्ट्यधिकरणन्यायेन प्रथमश्रुतादृष्टपद-स्वार्थमनुरुध्यानन्तरश्रुतं नान्योऽतोऽस्ति द्रष्टेत्यत्र द्रष्टृपदं स्वतन्त्रद्रष्टृपरं वा निरतिशयद्रष्टृपरं वेत्युररीकरणस्यैव सुरसत्वात्।

न च काल्पनिकद्रष्ट्रन्तरमादायादृष्टत्वं भवेदिति मन्तव्यम्। तस्य च द्रष्टृभेदसिध्युत्तरकालिकत्वेन तत्सिद्धेः उक्तकल्पनया द्रष्टृभेदसिद्ध्युत्तर-कालीनत्वेनान्योन्याश्रयाच्च । प्रथमश्रुतादृष्टवाक्यस्वारस्य विरोधितया खपुष्पायितत्वाच्च ।

अथवा अतः अन्यः द्रष्टा स्वातन्त्र्येण नास्तीत्यर्थः । अन्यथा नान्योऽतोऽस्ति इत्येव श्रुतिशरीरं स्यात्। अन्य इत्यनेनैव सर्वनिषेधात् द्रष्टेत्यादिपदानां वैयर्थ्यं स्यात्। अत एवानर्थक्यप्रतिहतानां विपरीतं बलाबलमिति न्यायोऽप्यनुकूलितो भवति । अत इति पदस्य चिन्मात्र-लक्षणापत्तेश्च । चिन्मात्रस्यैव त्वन्मते अधिष्ठानत्वम्॥

अत्राभिनवाद्वैतवादिनः- 'उक्तश्रुतौ स्वातन्त्र्यपदाभावात् कथं स्वातन्त्र्येण निषेधः। तत्पदाध्याहारे च स एव दोषः स्यात्। अध्याहारा-पेक्षया लक्षणाया एव ज्यायस्त्वाच्च। अत एव प्राचीमाहरेदित्यत्र प्राचीशब्दः दिग्वचनः उत शाखावचन इति संशये दिग्वचन इति पूर्वपक्षं प्रापय्य दिग्वचनत्वे प्राचीं दिशं प्रति आहरेदिति अध्याहारः स्यात्। तदपेक्षया लक्षणया शाखावचन इति सिद्धान्तितम्। सामान्यवचनस्य विशेषे पर्यवसाने मानाभावाच्च' इत्याहुः।

अत्र वयं ब्रूमः- अध्याहारस्य निरवकाशसकलभेदश्रुत्यनुरोधेनावश्यं कल्पनीयत्वात् अन्यथा-

यत्किञ्चित्प्राचीनमग्नीषोमीयात् तेनोपांशु चरन्तीति

सावकाशस्य उपांशुत्वस्य निरवकाशेन यावत्या वाचेति वाक्य-विहितैच्छिकस्वरेण सङ्कोचो न स्यात्।

न चाध्याहार एव दोष इति वाच्यम्। तद्दोषापेक्षया आनर्थक्यदोषस्यैव ज्यायस्त्वात्। तस्य च पूर्वमेवावेदितत्वाच्च। आनर्थक्यप्रतिहतानां विपरीतं बलाबलमिति न्यायानुकूल्याच्च। द्रष्टा श्रोता मन्तेत्यादि बूहनां पदानां सार्थक्यसम्भवाच्च। अत एव स्येनोद्धन्तीत्यधिकरणन्यायोऽप्यनुकूलितो भवति।

यो विज्ञाने तिष्ठन्, य आत्मनि तिष्ठन्, यो विज्ञानमन्तरो यमयतीत्यादि स्फुटजीवेश्वरभेदप्रतिपादकपूर्ववाक्येन, एष त आत्मान्तर्यामीति उत्तरवाक्येन च विरोधात् अन्यपदस्य भेदविशिष्टवाचकत्वेन लक्षणापाताच्च अध्याहार एव उचित इति प्रामाणिकः पन्थाः।

यच्चोक्तम्- सामान्यनिषेधस्य विशेषे कथं पर्यवसानमिति तदज्ञानविजृम्भणम्। सामान्यनिषेधे अतःपदस्य विशिष्टपरस्य चिन्मात्रे लक्षणा स्यात्। विशिष्टब्रह्मणो मिथ्यात्वेन तस्यापि त्वन्मते निषेधात् भेदविशिष्टजीवपरस्यान्यपदस्यापि भेदमात्रार्थकत्वे लक्षणा स्यात्। मुख्यार्थहान्यापाताच्च। अन्यपदस्यानर्थक्याच्च। उपक्रमे यो विज्ञाने तिष्ठन् आत्मनि तिष्ठन् विज्ञानमन्तरो यमयति इत्यत्र भेदसत्त्वावगमात् तन्निषेधविरोधाच्च। विहितस्य निषेधे विकल्पापाताच्च न सामान्यनिषेधः। किन्तु एष ते आत्मा अन्तर्यामी अतोऽन्यदार्तमिति वाक्यशेषानुसारात् विशेषे पर्यवसानस्यैवोचितत्वात्। अन्यथा श्येनेनाभिचरन् यजेतेत्यत्र यथा वै श्येनो निपत्य आदत्ते इति वाक्यशेषेण, अक्ताः शर्करा इत्यत्र तेजो वै घृतमिति वाक्यशेषेण च, पञ्चदशानि आज्यानीत्यत्र यदाजिमीयुरिति वाक्यशेषेण च, वैश्वदेवेन यजेतेत्यत्र यद्विश्वेदेवाः समयजन्त इति वाक्यशेषानुसारेण च श्येनादिशब्दानां यागादिपरत्वं न स्यादिति।

किञ्च तवापि एकमेवाद्वितीयमित्यत्र सामान्यनिषेधस्य विशेषे पर्यवसानं न स्यात्। द्वितीयपदेन प्रपञ्चमात्रनिषेधात् एकपदैवपदयोः वैयर्थ्यापाताच्च।

यदि च वृक्षस्य स्वगतो भेद इति स्वाचार्यवचनबलात् सामान्यनिषेधस्य विशेषपर्यवसानं तदा किं वक्तव्यं निरवकाशश्रुतिविरोधेन निरवकाशन्यायेन च विशेषे पर्यवसानमिति।

ननु नान्योऽतोऽस्ति द्रष्टेति वाक्यात् द्रष्टृभेदोऽवगम्यत इति चेत्, न। यो विज्ञाने तिष्ठन् य आत्मनि तिष्ठन् यो विज्ञानमन्तरो यमयति य आत्मानमन्तरो यमयतीति पूर्ववाक्येन जीवेश्वरभेदस्यैवोक्ततया विरोधापत्तेः।

अपि च यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यः पृथिवीमन्तरो यमयतीत्यादिभिः जीवभेदमुक्त्वा तर्हि विशिष्टवेषेणोपहितवेषेण वा जीवेशयोर्भेदोस्त्विति शङ्कायां तन्निवारणाय शुद्धजीवस्वरूपेणापि भेदप्रतिपादनाय विज्ञानात्मशब्दाभ्यां पुनः शुद्धस्वरूपं जीवं परामृश्य तन्नियामकत्वादिकं तद्भेदश्च प्रतिपाद्यते यो विज्ञाने तिष्ठन् य आत्मनि तिष्ठन् इत्यादिभिः। अन्यथा यः पृथिव्यां तिष्ठन्नित्यादिभिरेव पृथिव्यादि तत्तदभिमानिचेतननियामकत्वादिप्रतिपादने सम्भवति यो विज्ञान इत्यादिकमनर्थकमापद्येत। आनर्थक्यस्य सर्वतो बलवत्वात्। एष ते आत्मेत्यत्र ते इति षष्ठ्यर्थस्य नियम्यनियामकभावरूपस्य चोपपादकस्य भेदादन्यस्याभावात्। न हि पृथिव्यां तिष्ठन्नित्यादौ पृथिव्यादिशब्दैर्जडं परामृश्यत इति वक्तुं शक्यम्। तथात्वे यं पृथिवीं न वेदेत्यादेरसाङ्गत्यमेव

स्यात् । न हि जडस्य वेदितृत्वप्रसक्तिरस्ति । येन यं न वेदेति निषेध उपपद्येत ।

किञ्च यो विज्ञानादन्तरो य आत्मनोऽन्तर इत्यत्र अन्तरशब्देन भेदप्रतिपादनात् तस्य चोपक्रमरूपतया यः पृथिव्या अन्तर इत्याद्यभ्यास-रूपतया च बलवत्त्वात् तदविरोधेनैव नान्योऽतोऽस्तीति नेयम् । तस्य अन्तःस्थित इत्यर्थकत्वे पृथिव्या इति पञ्चमी विरुध्येत । षष्ठ्या अपेक्षितत्वात् । न च षष्ठ्येवैषा भवत्विति वाच्यम् । अद्भ्योऽन्तर इत्यादौ विज्ञानादन्तर इत्यत्र च पञ्चम्याः स्फुटतरमुपलम्भात् विशये प्रायदर्शनात् इति न्यायेन तत्प्रायपाठात् पृथिव्या इत्यपि पञ्चम्येवा-श्रयणीया । अन्तरमवकाशावधिपरिधानान्तर्धिभेदतादर्थ्ये इत्यनुशासनेन अन्तरशब्दस्य अनेकार्थत्वेऽपि पृथिव्याः अन्तर इति पञ्चमीनिर्देशपूर्व-कथनात् प्रकृते भेदार्थकत्वं विना अन्यार्थकत्वे असाङ्गत्यमेव स्यात् ।

न चान्तरशब्दस्य भेदार्थकत्वे यः पृथिव्या अन्तर इति सामानाधि-करण्यानुपपत्तिः । तस्य अर्श आद्यच्प्रत्ययान्तत्वात् । अर्श आदिगणस्या-कृतिगणत्वं वैयाकरणैरप्यङ्गीकृतम् ।

अन्तरशब्दस्यार्थान्तरपरत्ववादिनः परस्यापि सामानाधिकरण्यानुप-पत्तितत्परिहारयोस्तुल्यत्वात् ।

ननु एवं सति एष ते आत्मान्तर्याम्यमृत इति एषोऽन्तर्यामी ते आत्मा स्वरूपमिति अभेदप्रतिपादनेपि न विरोध इति चेन्न । यो विज्ञानादन्तरो य आत्मनोऽन्तर इत्यस्य भेदप्रतिपादकस्य उपक्रमरूपतया बलवत्त्वेन तदविरोधेनैव एष ते इत्यस्य नेयत्वात् । अपि च एष अन्तर आत्मा

परमात्मा ते अन्तर्यामीत्यर्थसम्भवात् । आत्मशब्दस्य द्युभ्वाद्यधिकरण-न्यायेन परमात्मपरत्वस्यैव वक्तव्यत्वात् । नन्वेवं सति य आत्मनोऽन्तर इत्यत्रात्मशब्दस्य जीवपरत्वम् अत्र तु परमात्मपरत्वमिति वैरूप्यप्रसङ्ग इति वाच्यम् । परमतेऽपि आत्मनोऽन्तर इत्यत्र जीवपरत्वम्, एष त आत्मा इत्यत्र स्वरूपपरत्वमिति तत्प्रसङ्गस्य तुल्यत्वात् । किञ्च परमते अन्तर्यामिपदस्य चिन्मात्रे लक्षणापत्तिश्च । तस्मादुक्तश्रुतिः जीवेश्वरभेद एव मानमिति अलमकालवृष्टिधारया ।

(सत्यं ज्ञानमनन्तमिति तैत्तिरीयश्रुत्यर्थः)

किञ्च सत्यं ज्ञानमनन्तं ब्रह्मेति षड्विधतात्पर्योपेता श्रुतिरपि जीवेश्वरभेदे मानम् । तत्र हि ब्रह्मविदाप्नोति परमिति जीवब्रह्मणोः भेदोपक्रमः । एष ह्येवानन्दयाति इत्युपसंहारः । स य एवंविदस्माल्लोकात् प्रेत्य एतमन्नमयमात्मानमुपसङ्क्रामति एतं प्राणमयमात्मानमुपसङ्क्रामति इत्यादिरभ्यासः । मुक्तब्रह्मप्राप्त्यर्थकत्वादपूर्वता। सोऽश्नुते सर्वान् कामानिति फलम् । एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते इत्यर्थवादः । को ह्येवान्यात् कः प्राण्यात् यदेष आकाश आनन्दो न स्यादित्युपपत्तिः।

(पृथगात्मानं प्रेरितारमिति श्वेताश्वतरश्रुत्यर्थः)

किञ्च पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेतीति श्रुतिरपि जीवेश्वरभेदे मानम् । अस्यार्थः - आत्मानं जीवं प्रेरितारं च ईश्वरं पृथक् भिन्नाविति मत्वा जुष्टस्ततस्तेनामृतत्वमेतीति ।

ननु तथापि अनया श्रुत्या न जीवेश्वरयोर्भेदसिद्धिः । आत्मानं देहं

बुद्धिं च प्रेरितारं क्षेत्रज्ञं च पृथक् ज्ञात्वा तत एव जुष्टः सुप्रीतस्सन् तेन ब्रह्मणाऽमृतत्वमेति । अथवा प्रेरितारं क्षेत्रज्ञमात्मानं पृथक् देहाद्भिन्नं मत्वेति । यद्वा क्षेत्रज्ञमात्मानं पृथक् देहाद् भिन्नं प्रेरितारं ईश्वरं च मत्वा। न तु जीवेश्वरौ पृथक् मत्वेति। तथा सति

भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतत् ।

इत्युत्तरवाक्यविरोधात् । तत्र जीवेश्वरयोरभेदोक्तेरिति चेन्न । जीवेश्वरयोः भेदप्रतिपादकत्व एव उक्तवाक्यस्य स्वरसत्वात् । तथाहि - नाद्यं व्याख्यानं स्वरसम् । देहात्मविवेकस्य सर्वजनीनत्वेन तद्बोधनस्य प्रयोजनाभावात् । भोग्यं प्रेरितारमिति वाक्यानुरोधेन प्रेरितृशब्देन भोक्तृजीवान्य परमात्मन एव ग्राह्यत्वात् ।

ऋतपानेन कर्तृत्वे निश्चिते सद्वितीयता ।
ब्रह्मणा सस्वरूपेण न तु बुध्या विरूपया ॥

इति विवरणानुसारेण अस्मद्व्याख्याया एवानुसर्तव्यत्वाच्च । अत एवात्मशब्दस्य बुद्धिपरत्वमपि न संगच्छते । तस्य बुद्धिशब्दितान्तः-करणपरत्वे मानाभावात् ।

द्वीतीयव्याख्यानमपि न स्वरसम् । देहादित्यध्याहारदोषस्य चकारेणानन्वयदोषस्य च प्रसङ्गादिति ।

नापि तृतीयव्याख्यानं युक्तम् । न च तद्व्याख्यानस्य तत्त्वमसि, अयमात्मा ब्रह्म, यो वेद अहं ब्रह्मास्मि इत्यादि श्रुत्यन्तरसाहाय्यमस्ति इति वाच्यम् । भेदश्रुत्यविरोधेनैव तासां वाक्यार्थस्य वक्ष्यमाणत्वात् ।

न च सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतदित्युत्तरवाक्यविरोध इति शङ्क्यम् । ब्रह्मणो भोग्याभेदवत् भोक्त्रभेदस्यापि गौणत्वोपपत्तेः ।

ननु भोग्यब्रह्मणोर्बाधायां सामानाधिकरण्यं भोक्तृब्रह्मणोस्त्वभेद इति चेत् मैवम् । सर्वं खल्विदं ब्रह्म तज्जलानिति। विश्वमेवेदं पुरुषस्तद्विश्व-मुपजीवति । सर्वं समाप्नोषि ततोऽसि सर्वः, इत्यादिश्रुतिस्मृत्यनुसारेण तज्जत्वादिवत् अधीनत्वादिना अवैरूप्येणैव सामानाधिकरण्यसम्भवे सर्वप्रमाणबाधितस्य त्वदीयसामानाधिकरण्यस्यानङ्गीकार्यत्वात् ।

केचित् अभेदस्यापूर्वत्वात् अभेद एव स्वीकार्य इत्याहुः । तन्न । यजमानः प्रस्तरः, सोमेन यजेतेत्यादावपि अपूर्वतासत्वेनाभेदापत्तेः । तत्र मानान्तरविरोधेनापूर्वतासत्वेऽपि अन्यपरत्वे अभेदश्रुतीनामपि तथात्वमस्तु । न च ययोरभेदः तयोर्न मानान्तरेण भेदो बोध्यः इति वाच्यम् । प्रस्तरादावपि तथात्वापातात् ।

(ज्ञाज्ञौ द्वावित्यादि श्वेताश्वतरश्रुत्यर्थः)

किञ्च ज्ञाज्ञौ द्वावजावीशनीशौ, एको रूपाणि ब्रह्मणः करोति, तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषामित्यादि श्रुतयो जीवेशभेदे मानम् । ज्ञाज्ञावित्यादौ अभेदे अनेकपदलक्षणापातात् ।

किञ्च द्वे ब्रह्मणी वेदितव्ये परं चापरं चेति श्रुतिरपि जीवेशभेदे मानम् ।

न च भेदाभावे द्वयोस्तुल्यत्वेन वेदितव्यत्वं परापरशब्दाभ्यां विशेषणं चोपपद्यते । कथं च द्वित्वोक्तिः । तस्य द्वयोरेव वृत्तित्वात् ।

ननु द्वे विद्ये वेदितव्ये इति ह स्म ब्रह्मविदो विदन्ति । परा चैवापरा

च। तत्रापरा ऋग्वेदो यजुर्वेदस्सामवेदः शिक्षा कल्प इत्याद्युक्त्वा अथ परा यया तदक्षरमधिगम्यते इतिवत् द्वे ब्रह्मणी वेदितव्ये इत्यत्रापि अभेदपरत्वे बाधकाभावादिति चेन्न।

यस्यानुवित्तः प्रतिबुद्ध आत्मा अस्मिन् सन्देहे गहने प्रविष्टः।
य एतद्विदुरमृतास्ते भवन्ति अथेतरे दुःखमेवापि यन्ति।
ईशानं भूतभव्यस्य ततो न विजिगुप्सते।
यस्मिन् पञ्च पञ्च जना आकाशश्च प्रतिष्ठितः।
तमेव मन्य आत्मानं विद्वान् ब्रह्मामृतोऽमृतम्।
पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति।
तमेवं विद्वानमृत इह भवति।
तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति।
अमृतस्यैष सेतुः।
तद्विज्ञानेन परिपश्यन्ति धीराः।
एको वशी सर्वभूतान्तरात्मा एकं रूपं बहुधा यः करोति।
तमात्मस्थं येऽनुपश्यन्ति धीराः तेषां शान्तिः शाश्वती नेतरेषाम्।
एको बहूनां यो विदधाति कामान्
तमात्मस्थं येऽनुपश्यन्ति धीराः तेषां सुखं शाश्वतं नेतराषाम्।
वाचो ह वाचं स उ प्राणस्य प्राणः
चक्षुषश्चक्षुरतिमुच्य धीराः प्रेत्यास्माल्लोकादमृता भवन्ति।
स तु तत्पदमाप्नोति यस्माद् भूयो न जायते।

सोध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्।
सत्यं ज्ञानमनन्तं ब्रह्म,
यो वेद निहितं गुहायां परमे व्योमन्।
सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेति।
जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः।
सर्वगं सर्वतः प्राप्य धीरा मुक्तात्मानः सर्वमेवापियन्ति।

इत्यादि श्रुतिप्रतिपादितजीवेश्वरभेदज्ञानस्य मोक्षफलकत्वश्रवणात् तद्विरोधेन द्वे ब्रह्मणी इत्यस्य भेदपरत्व एव स्वारस्यात्। तुल्यज्ञेयत्वोक्ति-विरोधतादवस्थ्याच्च। सर्वशाखाप्रत्ययन्यायेन वाक्यान्तरोक्तामृतत्वस्यापि प्रकृते वेदज्ञानफलत्वोपपत्तेश्च। द्वे विद्ये इत्यत्र ऋग्वेदादिभिन्नविद्यान्तरस्य खपुष्पायितत्वेन तस्या एव विषयभेदेन परत्वापरत्वोपपत्त्या दृष्टान्त-वैषम्याच्च।

अत्र शङ्कते- यथा तव मते ऋतं पिबन्तौ सुकृतस्य लोके इत्यत्र एकस्मिन् परमात्मनि द्वित्वं तथा द्वे ब्रह्मणी इत्यत्रापि अस्त्वभेद इति। अत्र ब्रूमः- उक्तरीत्या जीवब्रह्मणोर्भेदसिध्या जीवेश्वराभेदप्रतिपादनस्य बहुनिरवकाशप्रमाणविरोधेनात्यन्तासङ्गतत्वात्। ऋतं पिबन्तावित्यत्र ब्रह्मणस्तद्रूपाणां च बहुमानैरभेदस्सिद्ध इति तत्र गतेः सुवचत्वात्। तथाहि- यथा समिधो यजतीत्येकस्मिन्नेव समिद्यागे बहुवचनं, यथा वाऽग्नीषोमीय-पशुसम्बन्धिन्येकस्मिन्नेव पाशे अदितिः पाशानित्यग्नीषोमीयपशु-प्रकरणस्थमन्त्रगतं बहुवचनं, यथा वा रामकृष्णौ इत्यत्र एकत्वेऽपि रूप-

भेदमादाय द्वित्वं तथा प्रकृते भगवत एकत्वेऽपि विशेषबलेन द्वित्वसम्भवात् ।

ननु द्वे ब्रह्मणी इत्यत्र ग्रहं संमार्ष्टीत्यत्र ग्रहैकत्ववत् द्वित्वस्योद्देश्यविशेषणत्वेनाविवक्षितत्वादिति चेन्न। यथा यस्योभावग्नी अनुगतावभिनिम्लोचेदभ्युदियाद्वा पुनराधेयं तस्य प्रायश्चित्तिरित्यत्र उद्देश्याग्निगतद्वित्वस्योद्देश्यविशेषणत्वेऽपि विवक्षा, यथा वा युवं हि स्थः स्वर्पती इति द्वयोर्यजमानयोः प्रतिपदं कुर्यादित्यत्र यजमानगतद्वित्वस्य विवक्षा तथा प्रकृते द्वे इत्यत्रापि द्वित्वस्य विवक्षायां बाधकाभावात् साधकस्योक्तत्वाच्च ।

अपि च 'अत्रान्तरं वेदविदो विदित्वे'ति श्रुतिरपि भेदे मानम् ।

किञ्च -

एको विष्णुर्महद् भूतं पृथग्भूतान्यनेकशः ।
द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ।
उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।
बहवः पुरुषा ब्रह्मन् उताहो एक एव तु ।

वैशम्पायनः-

नैतदिच्छन्ति पुरुषमेकं कुरुकुलोद्वह ।
बहूनां पुरुषाणां हि यथैका योनिरुच्यते ।
तथा तं पुरुषं विश्वमाख्यास्यामि गुणाधिकम् ।

अन्यश्च परमो राजन् तथान्यः पञ्चविंशकः ।
यथेश्वरश्च जीवश्च सत्यभेदः परस्परम् ।

शारीरश्चोभयेऽपि हि भेदेनैनमधीयते। पृथगुपदेशात् । भेदव्यपदेशाच्चेत्यादि स्मृतयः सूत्राण्यपि जीवेश्वरभेदे मानम् ।

वस्तुतस्तु- यानि वाक्यानि अभेदमानत्वेन परस्याभिमतानि तान्येव भेदे प्रमाणमिति प्रामाणिकः पन्थाः ।

(भेदस्यापूर्वत्वम्)

अत्र केचित्- भेदश्रुतीनां 'नेह नानास्ति' 'न तत्र काचन भिदास्ति' इत्यादिश्रुत्या ब्रह्मणि भेदमात्र निषेधाय प्रतियोगिभेदप्रसञ्जकत्वम् । अत एवंजातीयकमेवाध्यारोपापवादन्यायविषय इति भणन्ति। तन्मन्दम् । तत्वमसीत्याद्यभेदश्रुतीनामपि नेह नानास्ति किञ्चनेति नेतिनेतीतिश्रुत्या ब्रह्मणि अभेदमात्रनिषेधाय प्रतियोगिभूताभेदप्रसञ्जकत्वापातात् । एवं वायव्यं श्वेतमालभेतेत्यादीनामपि मा हिंस्यात्सर्वा भूतानीति निषेधाय प्रतियोगिभूतद्रव्यप्रसञ्जकत्वप्रसङ्गाच्च ।

ननु नेह नानेत्यादिना भिन्नं ब्रह्मणि किमपि नास्तीति विशिष्टं निषिध्यते । न त्वभिन्नमपि जीवब्रह्मैक्यमिति चेन्न । एवंविधैक्यस्यापि कुतश्चिद् भिन्नत्वात् । जीवब्रह्मणोरुभयोरपि अन्योन्यभेदाध्यासाधिष्ठानत्वेन भेदविशिष्टत्वेन तयोरपि निषेधप्रसङ्गाच्च । भेदस्यापि ब्रह्मस्वरूपत्वाच्च । उत्तरत्र बहुधा अभेदश्रुतीनामभेदपरत्वस्य दूष्यमाणत्वाच्च ।

ननु भेदस्य कथं ब्रह्मस्वरूपत्वमिति चेत् अभेदस्य कथं तत्स्वरूपत्वम् । उक्तदोषसाम्यादिति। तस्य च उत्तरत्र वक्ष्यमाणत्वाच्चेति ।

ननु कथं जीवेश्वरभेदस्य श्रौतत्वम् । तस्य प्रत्यक्षादिप्रमाणसिद्ध-त्वात् तत्र च श्रुतेस्तात्पर्यायोगात् तात्पर्यविषयीभूत एवार्थे शब्दस्य प्रामाण्यात् । अन्यथा अनुवाद्यविधेयकोट्यविशेषप्रसङ्गात् । तथाच श्रुतेर्मानान्तरप्राप्तार्थे विधायकत्वासम्भवेन अनुवादकतेति चेन्न । नाहमीश्वर इति प्रत्यक्षेण तत्तदात्मत्वावच्छेनेश्वरप्रतियोगिक जीवानु-योगिकभेदस्य सिद्धत्वेऽपि सकलजीवत्वावच्छेदेनासिद्धतया प्राप्ताप्राप्त-विवेकेन अपूर्वताख्यतात्पर्योपपत्त्या विधेयतासम्भवात्। अन्यथा यजमान-पञ्चमाः इडा भक्षयन्तीत्यत्र प्राप्ताप्राप्तविवेकेन यजमानस्य भक्षणं न विधीयेत ।

अत एव पृथिवी इतरेभ्यो भिन्ना पृथिवीत्वात् इत्यत्र घटादौ घटत्वावच्छेदेन इतरभेदसिद्धावपि पृथिवीत्वोपहिते तदसिद्धेः न सिद्धसाधनता । अत एव च स्थानप्रकरणाधिकरणे अभिषेचनीय-वदन्येषामपि इष्टिपशुसोमानां विकृतित्वान्नास्त्येव प्रकरणमित्याशङ्क्य प्रातिस्विकरूपेण तदभावेऽपि राजसूयात्मना प्रकरणमस्तीत्युक्तम् । जीवप्रतियोगिकेश्वरानुयोगिकभेदस्य प्रत्यक्षाद्यसिद्धतया तत्र श्रुति-तात्पर्योपपत्तेश्च ।

न च यो यन्निष्ठभेदप्रतियोगी स तत्प्रतियोगिकभेदवानिति व्याप्ति-बलात्तादृशभेदस्यापि सिद्धिरिति वाच्यम् । प्रमेयत्वावच्छिन्ननिष्ठ-भेदप्रतियोगिनः प्रमाणस्य प्रमेयाभिन्नतया व्यभिचारात् ।

किञ्च वर्तमानमात्रग्राहिप्रत्यक्षेण कालत्रयाबाध्यभेदस्याप्राप्त्या तत्र श्रुतेस्तात्पर्यस्य सुवचत्वात् । किञ्च औपनिषदस्य ब्रह्मणः शास्त्रं विना अप्राप्तेः तत्प्रतियोगिकस्य तद्धर्मिकस्य वा भेदस्य कथं प्रत्यक्षेण प्राप्तिः ।

अभावज्ञाने प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिज्ञानस्य फलीभूत-समानप्रकारकप्रतियोगिज्ञानस्य वा कारणत्वात् । नेन्द्रियाणि नानुमानं वेदा ह्येवैनं वेदयन्तीति श्रुतिविरोधेन तज्ज्ञानस्य मानान्तरेणासम्भ-वाच्च । न च भेदमात्रस्य प्राप्त्या अनुवादकत्वं भवेदिति वाच्यम् । तथात्वे घटेन घटैक्यस्य प्राप्त्या अभेदश्रुतिरपि अनुवादिनी स्यात् ।

(योग्यानुपलब्धेरभावप्रत्यक्षकारणत्वाभावशङ्का)

अत्र केचित् अभावे योग्यानुपलब्धेः दुर्वचत्वात् प्रत्यक्षेऽकारणत्वेन कथं भेदप्रत्यक्षमित्याहुः ।

अत्र नवीनाः योग्यानुपलब्धेरभावप्रत्यक्षकारणत्वे मानाभावात् तत्प्रत्यक्षं भवत्येव। तथाहि। कुत्राधिकरणे अनुपलब्धिरभावप्रत्यक्षहेतुः? किं घटवति भूतले उत घटाभाववति? नाद्यः । तत्र विषयाभावादेवा-प्रत्यक्षोपपत्तेः । न च विषयस्य घटाभावस्य नित्यतया तत्सत्त्वात् उक्तं युक्तमिति मन्तव्यम् । अभावप्रतीतिनियामक स्वरूपसम्बन्धस्या-त्रानभ्युपगमात् । न चरमः । तत्र विषयसत्वेन सन्निकर्षादिसत्त्वे तत्प्रत्यक्षोदयेनानुपलब्धिहेतुत्वे प्रमाणाभावात् । नच घटशून्य एव यदा घटवत्त्वभ्रमः तदापि घटाभावप्रत्यक्षापत्त्या तस्या हेतुत्वमिति शङ्क्यम् । तत्र दोषविशेषस्यैव घटाभावप्रत्यक्षविरोधित्वात्। अन्यथा घटभ्रमोत्पत्ति-काले घटाभावप्रत्यक्षं स्यात् । आनुमानिके मानसे वा घटवत्त्वोपलंभे सत्यप्यालोकादि समवधाने घटाभाव प्रत्यक्षव्यभिचाराच्च । न चैवमपि यत्र विनश्यदवस्थदोषेण भ्रमो जनितः तत्र प्रतियोगि भ्रमोत्तरं तदभाव प्रत्यक्षानुदयेनानुपलब्धेर्हेतुत्वमिति वाच्यम् । तत्र भ्रमोत्तरप्रत्यक्ष-

हेतोर्विशेषदर्शनस्य क्लृप्तस्याभावादेव तत्र कार्याभावान्नानुपलब्धेः कारणत्वमिति तत्प्रत्यक्षं सुवचमित्याहुः ।

अत्र वयं ब्रूमः । भ्रमोत्तरप्रत्यक्षे विशेषदर्शनस्य कारणत्वं कल्पयित्वा तत्र कार्याभावः समर्थनीयो वा, योग्यानुपलब्ध्या वेति विनिगमनाविरहात् उभयोरपि हेतुत्वसिद्धेः सुवचत्वात् ।

वस्तुतस्तु भ्रमाव्यवहितोत्तरत्वेन कार्यतावच्छेदकाननुगमात्, विशेषदर्शनविरहेऽप्यालोकादिसमवधाने घटभ्रमोत्तरप्रत्यक्षोदयात् भ्रमविरोधित्वस्याननुगमाच्च, विशेषदर्शनस्यात्मनिष्ठस्य विषयनिष्ठ कालादिसंयोगादेः कार्यकारणभावघटकसंबन्धाननुगमाच्च विशेषदर्शनस्य न हेतुत्वम् । न चैवं रजतभ्रमोत्तरं विशेषदर्शनेन तदभावप्रत्यक्षं न स्यात् । अनुपलब्धेरसत्त्वादिति वाच्यम् । विशेषदर्शनाभावविशिष्टोपलम्भाभावस्य कारणत्वात् । घटभ्रमोत्पत्तिक्षणे घटाभावप्रत्यक्षवारणाय तादृशोपलम्भाभावस्य कार्यसहवर्तितया कारणत्वस्य सुवचत्वाच्च । विरलालोक समवधानकालीन संशयस्य चाक्षुषस्यानन्तरं बहुलालोकसमवधानाच्चाक्षुषप्रत्यक्षव्यभिचाराच्च । यत्र दोषाधीन एव संशयः तदनन्तरं शब्दादिना अपरकोट्यभावनिर्णये अपरकोटिप्रत्यक्षं विशेषदर्शनं विना प्रत्यक्षोदयः तत्र व्यभिचाराच्च । यत्राञ्जनादिना व्याप्यव्याप्यकयोर्ग्रहः तदुत्तरं चाञ्जनाभावे युगपदुभयप्रत्यक्षं तत्रापि व्यभिचाराच्च न किंचिदेतत् ।

अतिनवीनास्तु तदधिकरणीयतत्संसर्गकतत्पुरुषीय प्रतियोगितावच्छेदकविशिष्टयोग्यप्रतियोग्यनाहार्य लौकिकनिश्चयरूपोपलंभाभावः तदधिकरणीयतत्संसर्गावच्छिन्नप्रतियोगिताकतदभावलौकिकप्रत्यक्षकारणमिति कथमनुपलब्धेर्न कारणता?

अनाहार्येति विशेषणेन इच्छाधीनरूपाहार्य प्रतियोग्यारोपस्य अभावप्रत्यक्षहेतुत्वेऽपि न विरोधः । तदधिकरणीयेत्यनेन अधिकरणान्तरीयतादृश प्रतियोग्युपलंभदशायामधिकरणान्तरे तदभावप्रत्यक्षेऽपि व्यभिचाराभावः । तर्कसंसर्गकेत्यनेन तदधिकरणे घटत्वावच्छिन्नघटोपलम्भसत्वेऽपि घटभेदप्रत्यक्षस्य जायमानत्वान्न व्यभिचारः । भेदस्य तादात्म्यावच्छिन्नप्रतियोगिताकत्वेन तत्प्रत्यक्षे तत्संसर्गक प्रतियोग्युपलम्भस्यैव विरोधित्वात् । तत्पुरुषीयेत्यनेन पुरुषान्तरीय प्रतियोग्युपलम्भसत्वे पुरुषान्तरीयाभाव प्रत्यक्षसंभवेऽपि न क्षतिः । प्रतियोगितावच्छेदकविशिष्टेति विशेषणेन गुणत्वादिविशिष्टघटाभावप्रत्यक्षं निरस्तम् । प्रतियोगितावच्छेदकविशिष्टप्रतियोग्युपलम्भस्य तत्राप्रसिद्ध्या तदभावरूपानुपलब्ध्यभावात् । अत एव घटत्वत्वादिना घटत्वादेरभावः प्रत्यक्षः । घटत्वत्वादेः प्रतियोगितावच्छेदकस्य घटेतरावृत्तित्वादिरूपातीन्द्रियधर्मघटिततया तदवच्छिन्नप्रतियोग्युपलम्भाभावसम्भवात् । लौकिकनिश्चयेति विशेषणेनालौकिकप्रतियोग्युपलम्भतत्संशययोरभावप्रत्यक्षसंभवेऽपि न क्षतिः । प्रतियोगियोग्यत्वं च प्रतियोगिनिष्ठं महत्वोद्भूतरूपादिमत्त्वम् ।

ननु प्रतियोगिनिष्ठमहत्त्वादेः कथमभावप्रत्यक्षजनकत्वमिति चेत् स्वाश्रयप्रतियोगिकत्वसम्बन्धेन तस्याभावनिष्ठत्वात् । महत्त्वोद्भूतरूपाभावप्रत्यक्षे उद्भूतरूपादेरपि महत्त्वोद्भूतरूपाश्रयत्वम् एकार्थसमवायेन वर्तत इति न क्षतिः ।

(अभावप्रत्यक्षे अधिकरणयोग्यत्वं तन्त्रम्)

अथवाभावप्रत्यक्षे अधिकरणयोग्यत्वं तन्त्रम् । अधिकरणयोग्यत्व-

विवक्षया जलपरमाणौ पृथिवीत्वाभावप्रत्यक्षनिरासः भूतलादौ मनस्त्वात्यन्ताभावप्रत्यक्षोपपत्तिश्च। प्रतियोगियोग्यत्वविवक्षया च स्तंभे न पिशाचात्यन्ताभावप्रत्यक्षम्।

अत्र केचिदतिनवीनाः- लाघवात् अधिकरणयोग्यत्वमेव अभाव-प्रत्यक्षत्वावच्छिन्ने तन्त्रमस्तु। प्रतियोगियोग्यत्वस्य तत्त्वे मानाभावात्। तथाहि। यत्किञ्चित्प्रतियोगियोग्यत्वं तन्त्रमुत यावतः? नाद्यः। मूर्तसामान्याभावप्रत्यक्षं स्यात्। नान्त्यः। महति वायौ उद्भूतरूप-सामान्याभावप्रत्यक्षं न स्यात्। ततश्चाधिकरणयोग्यत्वमेव सर्वत्राभाव-प्रत्यक्षनियामकमस्तु। तथाच भूतलादौ घटाद्यभावप्रत्यक्षे महत्त्वोद्भूत-रूपवद्विशेषणता कारणम्। तत्र द्वयोरपि कारणत्वात्। एवं च वायौ रूपाभावप्रत्यक्षे चक्षुःसंयुक्तमहत्त्ववद्विशेषणतैव हेतुरिति महत्वमात्रे स्वतन्त्रकारणत्वात्। परमाणौ महत्त्वाभावप्रत्यक्षे चक्षुःसंयुक्तोद्भूत-रूपवद्विशेषणता सन्निकर्ष इति तत्रोद्भूतरूपस्यैव कारणत्वमिति। एवं जलपरमाणौ पृथिवीत्वाभावो न प्रत्यक्षः। अधिकरणस्य महत्त्वाभा-वात्। भूतलादौ च मनस्त्वात्यन्ताभावः प्रत्यक्षः। तत्राधिकरणे तयोर्विद्यमानत्वात्।

नन्वेवमपि स्तम्भे पिशाचात्यन्ताभावप्रत्यक्षं भवेदेव। अधिकरणस्य महत्त्वादुद्भूतरूपवत्त्वादिति चेन्न। तत्र तस्य विद्यमानत्वेऽपि विषयस्य पिशाचात्यन्ताभावादेरयोग्यत्वात् गुरुत्ववत्। अन्यथा सन्निकर्षमहत्वादि कारणसत्वे तस्य कुतो न प्रत्यक्षं? यदि तस्यायोग्यत्वादप्रत्यक्षत्वं तदा प्रकृतेऽपि तुल्यमिति।

वयं ब्रूमः। न केवलमधिकरणयोग्यत्वं सर्वत्राभावप्रत्यक्षे हेतुः। किन्तु

प्रतियोगियोग्यत्वमपि तत्र तन्त्रम्। अन्यथा घटादौ परमाणुभेदादेः प्रत्यक्षत्वापत्तेर्दुर्वारत्वात्। तथाऽन्योन्याभावप्रत्यक्षेऽधिकरणयोग्यत्वं नियामकम्। तथाच न कोऽपि दोष इति प्रामाणिकः पन्थाः।

एवञ्च अन्योन्याभावप्रत्यक्षे अधिकरणयोग्यताया एव तन्त्रत्वात् जीवप्रतियोगिकेश्वरधर्मिकभेदस्य कथं प्रत्यक्षत्वम्।

किञ्च अनादिश्रुतिप्रतिपाद्यभेदस्य सादिप्रत्यक्षात्पूर्वमेव सिद्धत्वात् कथं तत्प्राप्तानुवादो भवेत्।

(अद्वैतस्य प्रत्यक्षादितः प्राप्तिः)

किञ्च तवापि सन् घटः सन् पटः घटोऽस्ति घटः प्रकाशते इत्यादि-प्रतीत्या आत्मनः सिद्धत्वेन सत्यं ज्ञानमनन्तं ब्रह्मेत्यादिश्रुतीनामनुवाद-त्वापातात्। न च प्रत्यक्षेण विशिष्टस्योपहितस्य वा ब्रह्मचैतन्यस्य प्राप्तत्वेऽपि शुद्धब्रह्मस्वरूपं न प्राप्तमिति वाच्यम्। दण्डी पुरुष इति प्रत्यक्षे दण्डविशिष्टस्य दण्डोपहितस्य वा पुरुषस्य भानेऽपि पुरुषभान-स्यावश्यकत्वेन पुरुषोऽस्तीति वाक्यस्यानुवादकत्ववत् प्रत्यक्षादावहङ्का-रादिविशिष्टस्य तदुपहितस्य वाऽऽत्मस्वरूपस्य भानेऽपि वेदान्त-वेद्यात्मस्वरूपभानस्यावश्यकत्वेन केवलात्मपरोक्तश्रुत्यनुवादकत्वस्य दुर्निवारत्वात्॥

स्वतन्त्रप्रमाणावष्टम्भं विनानुमानस्यानिर्णायकत्वाच्च। अन्यथा शास्त्रयोन्यधिकरणविरोधः स्यात्। स्याच्चाहं ब्रह्मास्मि, सर्वं खल्विदं ब्रह्म, तत्त्वमसीत्यादिश्रुतीनामप्यनुभूतिर्न नानाऽनुभूतित्वात्, जीव ईश्वरात् न भिद्यते चेतनत्वात् ईश्वरवदित्याद्यनुमानसिद्धाभेदानुवादि-

त्वम् । अथ अनुमायाः कामचारित्वेन तत्रैक्यानुवादित्वमभेदश्रुतेः न सञ्जाघटीति। किन्तु तवैव भेदप्रत्यक्षप्राप्तभेदानुवादित्वं भेदश्रुतेरेव स्यादिति चेत् अत्र ब्रूमः- अभेदवाक्यस्यापि अहमस्मीति प्रत्यक्षसिद्धार्थानुवादित्वं स्यात् । अस्ति भाति प्रियं रूपम् इति वदता त्वयापि सदर्थस्य ब्रह्म-रूपत्वाङ्गीकारात् । अहमर्थस्य चिदचित्संवलनरूपत्वाभ्युपगमाच्च ।

ननु तत्त्वमसीत्यादिना केवलयोरेवाभेदो बोध्य इति चेत् किं तावता? तत्राधिकभानेऽपि केवलस्यापि प्रतीतेः ।

ननु अहमस्मीत्यत्राहङ्कारस्य सदर्थब्रह्माभेदः एव प्रतीयते नतु ब्रह्मणो जीवाभेद इति चेत् मैवम् । अहं ब्रह्मास्मि तत्त्वमसीत्यत्रापि अहमर्थाभेदः स्यात् । विशेषकारणाभावात् । किञ्च भवदुक्तरीत्या नाहमीश्वर इति प्रत्यक्षेणाहमर्थेश्वरयोर्भेदासिध्या भेदवाक्यानामननुवादकत्वापातात् । तस्माद् भेदवाक्यतात्पर्यविषयत्वं भेदस्य दुर्वारम् ।

किञ्च अनादिनित्यनिर्दोषश्रुतेः प्रत्यक्षादिमानान्तरप्रवृत्तिनैरपेक्ष्येणैव स्वविषयविषयकत्वध्रौव्ये कथमनुवादकत्वशङ्कावकाशो भवेत् ।

अपि च प्रत्यक्षादीनां सम्भावितदोषत्वादिना तत्वावेदकत्वलक्षण-प्रामाण्यमेव नास्तीति उररीकुर्वता त्वया कथं तत्प्राप्तार्थतया श्रुतेः नित्यत्वेनासम्भावितदोषायाः तत्वावेदिकाया अनुवादकत्वं शङ्क्येत । अन्यथा घटस्सन् पटस्सन् घटोऽस्ति प्रकाशते इति प्रत्यक्षादिप्रमाण-विरोधात् तत्वमसीत्यादिश्रुतेरभेदपरत्वं न स्यात् । न स्याच्च पदद्वयलक्षणा। प्रत्यक्षादेः सम्भावितदोषत्वात् तद्विरोधस्याकिञ्चित्करत्वे भेदश्रुतेरपि अननुवादकत्वात् ।

'यजमानः प्रस्तरः', 'सोमेन यजते'त्यत्रापि 'द्रव्यं घट' इत्यत्रेव मुख्यार्थाभेदपरत्वाश्रयणप्रसङ्गाच्च ।

ननु प्रस्तरयजमानयोः सोमयागयोश्चाभेदे भेदग्राहिप्रत्यक्षादिविरोधात् यजमानः प्रस्तरः सोमेन यजेतेति श्रुत्योस्तात्पर्याभावेन न प्रतिबन्धा अवकाशः । किन्तु प्रस्तरं प्रहरतीति प्रहरणशास्त्रेण प्रस्तराभिन्नत्वे यजमानस्य प्रस्तरवत् प्रहरणे यजमानस्यैव नाशेन सर्वकर्मपरिलोपापातात् शास्त्रस्यानुष्ठापकत्वासम्भवेनाप्रामाण्यप्रसङ्गात् सोमाख्याश्रुतद्रव्य-कल्पनागौरवप्रसङ्गाच्चेति चेन्न। 'ऊर्ग्वा उदुम्बर ऊर्क् पशवः' इत्यत्र सामानाधिकरण्यात् प्रत्यक्षविरोधाभावेन अभेदः स्यादेव। किञ्च तदभावे 'आदित्यो यूपः' इत्यत्रापि अभेदः स्यादेव । न च यूपं तक्षतीति वाक्यविरोधात् तत्राभेदो नाङ्गीक्रियत इति शङ्क्यम् । यूपं तक्षतीति वाक्यस्य तच्छेषत्वाभावात् । वाक्यविरोधमात्रस्य तत्रेव प्रकृतेऽपि सत्वात्। 'द्वा सुपर्णा', 'नित्यो नित्यानां चेतनश्चेतनानाम्', अत्रान्तरं वेदविदो विदित्वेत्यादिवाक्यविरोधसाम्यादिति ।

ननु उक्तरीत्या भेदस्यात्मत्वावच्छिन्नधर्मिकस्य मानान्तराप्राप्तत्वेऽपि तत्तज्जीवे ईश्वरप्रतियोगिकभेदस्य प्राप्त्यानुवादकत्वं स्यादेव। तद्धि वाक्यस्य ज्ञातज्ञापकत्वमात्रमिति चेन्न । अनुवादकत्वं हि ज्ञातमात्रज्ञापकत्वम् । नतु ज्ञातज्ञापकत्वमात्रम् । अतिप्रसङ्गात् ।

किञ्च तत्तच्छाखागताग्निहोत्रं जुहोतीत्यादिवाक्यानां तत्तच्छाखा-ध्यायिनं प्रति यथाऽर्थवत्वं तथा येन पुरुषेण वादिविप्रतिपत्त्यादिना प्रत्यक्षेण भेदो न गृहीतः तं प्रति भेदवाक्यानाम् अर्थवत्वं भवेत् । अन्यथा पुनःश्रुतिरूपादभ्यासाच्छाखान्तरेषु कर्मभेदः स्यादित्यधिकरणे नाना-

शाखाम्नाताग्निहोत्रादि भिन्नं न वेति सन्देहे अनन्यार्थपुनःश्रुति-रूपादभ्यासाद् भिद्यत इति पूर्वपक्षे प्राप्ते पुनःश्रुत्या कर्म विधेयमित्येतावत् सिद्ध्यति । न तु कर्मभेदोऽपि । विधिवशात्तु भेदसिद्धिरन्यत्र विहितस्य विधानायोगादिति । तच्च पुनर्विधानं पुरुषान्तरं प्रति उपपन्नं सन्न कर्मभेदकमिति सिद्धान्तितमयुक्तं स्यात् ।

अथ तर्हि क्वापि अनुवादो न स्यादिति चेन्न। सर्वाविवादस्थल एव तत् । न च सर्वाविवादः कथमेकत्र भवितेति वाच्यम् । अग्निर्हिमस्य भेषजम्, अस्यामोषधयः अग्निरेताः स्वदयति इत्यादौ सर्वाविवादस्य सिद्धत्वात् ।

न च पुरोवादपूर्वकत्वादनुवादस्यायं पुरोवादः इत्यस्याभावान्न शाखान्तरस्थ वाक्यस्यानुवदाकत्वमिति शङ्क्यम् । भूयस्त्वेनोभयश्रुतीति न्यायेन कर्मस्वरूपनिश्चयवत् वेदद्रष्टृप्रथमव्यक्त्यपेक्षया पुरोवादस्य निश्चयात् । सादिप्रत्यक्षस्यानादिवेदात् पुरोवादत्वासम्भवाच्च ।

तस्मात्तृतीयं न । व्यवस्थयैवानुवादकत्वस्य वाच्यत्वात् । किञ्च द्वयोः प्रणयन्तीति वाक्यस्यावैयर्थ्याय चातुर्मास्यमध्यमपर्वणोश्चोदकाप्राप्त-प्रणयनान्तरप्रापकत्ववत् इहापि श्रुतेरवैयर्थ्याय मानान्तराप्राप्तभेदपरत्वस्य सुवचत्वात् । अन्यथा आत्मन आनन्दत्वश्रुतिरपि सुखसुप्तोऽस्मि इति प्रत्यक्षप्राप्तातात्त्विकानन्दत्वानुवादः स्यात् । अनुवादकत्वं तदप्राप्त-विषयान्तराभावे सावकाशम् ।

(भेदमिथ्यात्वे प्रमाणाभावः)

किञ्च प्रत्यक्षं प्रमाणं चेत् मिथ्यानुवादेन नास्य बाधः, नो चेत् कथं

भेदश्रुतेरनुवादकत्वम् । किञ्चायमनुवादः न तावत् स्तुत्यर्थः । नापि दध्ना जुहोतीति विधिरिवान्यविधानार्थः । विधानाय प्रमाणानुवादितस्य तात्त्विकत्वनियमात् । नापि निषेधार्थः । तदभावात् । तत्त्वमसीति निषेधोऽस्तीति चेन्न। एकशाखास्थयोर्वाक्ययोरेकत्र निषेधार्थमन्यत्रानुवाद इत्यङ्गीकारे अतिप्रसङ्गात्। तत्सत्यमित्याद्यपि न सत्तन्नासदुच्यते, असद्वा इदमग्र आसीदीत्यादि निषेधाय ब्रह्मसत्वानुवादकं स्यात्। 'सर्वप्रत्ययवेद्ये च ब्रह्मरूपे व्यवस्थिते' इति मण्डनोक्त्या घटस्सन् सन् पट इत्यत्रापि ब्रह्मसत्वप्रतीतेः ॥

परागर्थप्रमेयेषु या फलत्वेन सम्मता ।
संवित् सैवेह मेयोऽर्थो वेदान्तोक्तिप्रमाणतः ॥

इति सुरेश्वरोक्त्या घटज्ञानमित्यत्रापि तत्प्रतीतेश्च । एतच्छाखा-स्थाग्नीषोमीयवाक्यस्य न हिंस्यादिति निषेधाय शाखान्तरोक्ताग्नी-षोमीयहिंसानुवादित्वं स्यात् । तत्त्वमसीतिवाक्योक्ताभेदानुवादेनायमेव निषेधः किं न स्यात् । भेदस्यापि तादात्म्याभावरूपत्वात् । अद्वैतस्य प्रमाणान्तरासिद्धेर्न तदनुवाद इति चेन्न। किं निषेधाय प्रमाणेन प्राप्त्या भाव्यम्? प्राप्तिमात्रेण वा? आद्ये निषेधायोगः । विहितस्य निषेधे विकल्पापातात् । न द्वितीयः अद्वैतेऽपि पूर्वप्राप्तेरावेदितत्वात् । किं बहुना इष्टापूर्तं मन्यमाना वरिष्ठम् इत्यत्रेव श्रुत्यर्थापरिज्ञानादितः प्राप्तिसम्भ-वाच्च । श्रुत्यादिप्रमाणं विना असिद्धेः कथं तदभेदस्य प्राप्तिरिति चेत् समं भेदेऽपि । यत्तन्नेत्यादिनिषेधार्थानुवादत्वज्ञापकलिङ्गाभावाच्च ।

ननु विहितस्य निषेधानङ्गीकारे न जुहोतीति निषेधो न स्यादिति

चेन्नैवम्। निषेध एवायम्। न च विहितस्य निषेधे विकल्पापत्तिरिति शङ्क्यम्। आज्यभागादिवत् अप्राप्त्या नायं क्रियानिषेधः। किन्तु अग्निहोत्रादिक्रियायाः दीक्षितरूपकर्तृनिषेधः। एतदभावे अग्निहोत्रादिषु दीक्षितादीक्षितसाधारण्येन सर्वस्यापि कर्तृत्वप्राप्तेः। अतो दीक्षितो नाग्निहोत्रादि कुर्यादित्येवंरूपप्रतिषेध इति न कोपि विरोधः।

जीवेशभेदस्य मिथ्यात्वादेव तत्र तात्पर्याभावेन न भेदश्रुतीनां तद्विधायकत्वमिति चेत्। न हि भेदमिथ्यात्वे प्रत्यक्षमस्ति। नाप्यनुमानं श्रुतिसिद्धार्थबाधकम्। स्वस्यैव तद्विरोधेनाप्रामाण्यात्।

ननु श्रुतेर्भेदमात्रपरत्वादनुमानस्य तद्भेदमिथ्यात्वे प्रवृत्तत्वेन भिन्नविषयत्वात् न विरोध इति चेत् तर्हि प्रत्यक्षस्यौष्ण्यमात्रविषयत्वात् अनुमानस्य तदौष्ण्यमिथ्यात्वसाधकत्वेन भिन्नविषयत्वमिति बाधोच्छेदः स्यात्।

न चागमेन तन्मिथ्यात्वम्। तदभावादेव। न च तत्सत्यत्वे मानाभावः। स्वरूपाभिधायकस्यैव तत्सत्यत्वे प्रामाण्यात्। विषयबाधे प्रामाण्यायोगात्। न हि विषयाबाधं विना प्रामाण्यं नाम किञ्चिदस्ति। स्वगोचरार्थाबाधो हि प्रामाण्यमिति। अन्यथा तत्वमसि अहं ब्रह्मास्मि इत्यादिवाक्यबोधिताभेदस्य सत्यत्वं न स्यात्।

किञ्च सत्यं भिदा सत्यं भिदा सत्यं भिदेति श्रुतेः प्रामाण्यात् यत् मानं तत् स्वार्थसत्तानिश्चायकमिति व्याप्तेः तेनैव सत्यत्वसिद्धेश्च।

किञ्च विश्वं सत्यमिति श्रुत्या जगत्सत्यत्वसिद्ध्या तदन्तर्गतस्यापि भेदस्य सत्यत्वसिद्धेः। अन्यथा त्वन्मते नेहनानेति वाक्येनापि

प्रपञ्चान्तर्गतभेदस्य मिथ्यात्वं न सिद्ध्येत्। न हि त्वन्मते भेदो मिथ्येति किञ्चित् भिन्नं वाक्यमस्ति।

ननु अभेदे 'अद्वैतं परमार्थत' इति श्रुतेरिव त्वन्मते भेदः पारमार्थिक इति न मानमस्ति इति चेत्, किञ्चित् अवेहि। अद्वैतवाक्येनाद्वैतस्येव भेदवाक्येन भेदस्य सत्वसिद्धिरिति। आवयोर्मते प्रामाण्यस्य स्वतस्त्वात्। अन्यथा अभेदस्य सत्यत्वं न सिध्येत्। न हि अद्वैतं सत्यमिति वाक्यमस्ति। अथ अद्वैतं परमार्थत इति श्रुतिरस्तीति चेन्न। उक्तश्रुतेः अभेदसत्यत्वे मानत्वाभावात्।

नच ऐक्यपरत्वे एकमेवाद्वितीयं इत्यादिवाक्येन भेदस्य निषेधात् तत्पारमार्थिकत्वासिद्धिरिष्टैवेति वाच्यम्। द्वा सुपर्णा, द्वे ब्रह्मणी वेदितव्ये, चेतनश्चेतनानामित्यादिवाक्यैरभेदस्य निषेधात् तत्पारमार्थिकत्वासिद्धिरपि इष्टैवेति वक्तुं सुशकत्वात्।

ननु जीवेश्वराभेदस्य ब्रह्मचैतन्यस्वरूपत्वेन तत्सत्यत्वावेदकेन सत्यं ज्ञानमनन्तं ब्रह्म, सदेव सौम्येदमग्र आसीत् इत्यादिवाक्येन तत्सत्यत्वसिद्धिरिति चेन्न। जीवेश्वरभेदस्यापि जीवब्रह्मचैतन्यस्वरूपत्वेन तत्सत्यत्वावेदकश्रुत्यैव तद्भेदसत्यत्वस्यापि सिद्धिरिति साम्यात्।

न च जीवेश्वरभेदस्य न तत्स्वरूपत्वं प्रमाणाभावादिति शङ्क्यम्। अभेदस्यापि तत्स्वरूपत्वे मानाभावात्। अभेदस्य तत्स्वरूपत्वे पर्यायत्वसापेक्षत्वनिरपेक्षत्वादिदोषाः स्युः। एतद्विस्तरस्तु न्यायामृतादौ स्पष्ट इति अत्र नालिखम्।

ननु जीवेश्वरभेदस्य तत्स्वरूपत्वेन सत्यत्वेपि ईश्वरप्रतियोगिक-

जीवानुयोगिकभेदस्य न पारमार्थिकत्वसिद्धिः । तस्य जीवस्वरूपत्वेपि जीवस्वरूपस्यैव सत्यत्वे मानाभावादिति चेन्न । जीवनिरूपितेश्वरानुयोगिकाभेदस्य सत्येश्वरस्वरूपत्वेन सत्यत्वेऽपि ईश्वरनिरूपितजीवचैतन्यानुयोगिकाभेदस्य न सत्यत्वसिद्धिः । तस्य जीवस्वरूपत्वेऽपि जीवस्वरूपस्यैव सत्यत्वे मानाभावादिति साम्यात् ।

वस्तुतस्तु जीवानुयोगिकभेदस्य सत्यजीवाभिन्नत्वेन पारमार्थिकत्वस्यैव सुवचत्वात् । न च तत्सत्यत्वे न मानमिति मन्तव्यम् । आवयोर्मते प्रामाण्यस्य स्वतस्त्वात् । तत्सत्यत्वे नित्यो नित्यानां चेतनश्चेतनानां, द्वा सुपर्णा, द्वे ब्रह्मणी वेदितव्ये इत्यादिस्वरूपावेदकानामेव प्रमाणत्वात् । न हि ध्वंसाप्रतियोगिकस्य नित्यस्य ज्ञानरूपचेतनस्य च तद्विरुद्ध त्रैकालिकनिषेधप्रतियोगित्वरूप मिथ्यात्वमुपपद्यते। अन्यथा ब्रह्मणोऽपि चेतनत्वाविशेषात् मिथ्यात्वं स्यात् ।

विश्वं सत्यमित्यादिश्रुतिप्रतिपाद्यविश्वमध्ये जीवानामपि प्रविष्टत्वेन तत्पारमार्थिकत्वस्यापि सिद्धेश्च । न च तेषां व्यावहारिकं सत्वं भवेदिति मन्तव्यम् । तथात्वे ब्रह्मणोऽपि व्यावहारिकसत्यत्वापातात् । सत्यत्वावेदकश्रुतीनामविशेषात् । जीवस्य सत्यत्वाभावे द्वे ब्रह्मणी वेदितव्ये इत्यत्र तुल्यतया वेदितव्यत्वोक्तिरयुक्ता स्यात् । तावके मते जीवस्याविद्यावच्छिन्नस्य मिथ्यात्वात् ।

ननु यथा द्रव्याभिन्नस्य घटस्य द्रव्यत्वं तथा सत्येश्वराभिन्नस्य जीवस्य सत्यत्वं युक्तम् । दर्शनात् । नतु तद्भिन्नस्य जीवस्य सत्यत्वं युक्तम् । तथा अदर्शनादिति चेन्न। तथा सति सत्येश्वराभिन्नत्वेन जडस्यापि पारमार्थिकत्वापातात् ।

न च जडेश्वराभेदावेदकश्रुतेरभावादिति वाच्यम् । जडेश्वराभेदेऽपि सर्वं खल्विदं ब्रह्म, इदं सर्वं यदयमात्मेत्यादिश्रुतीनां तदभेदावेदकानां सत्वेनाविशेषात् ।

ननु तथात्वे अजडं, विभक्तमित्यादिश्रुतिविरोध इति चेन्न । द्वा सुपर्णा, चेतनश्चेतनानाम्, अत्रान्तरं वेदविदो विदित्वा इत्यादि जीवेश्वरभेदावेदकश्रुतिविरोधस्य त्वत्पक्षेऽपि अविशेषात् ।

ननु सर्वं खल्विदं ब्रह्मेति श्रुतिर्बाधायां सामानाधिकरण्यरूपाभेदावेदिकेति चेन्न । विशेषहेत्वभावेन तत्वमस्यादि श्रुतेरपि तथात्वापातात् । द्वितीयत्वेन प्रसक्तजडस्येव तत्वेन प्रसक्त जीवात्मनोऽपि एकमेवाद्वितीयं, नेह नानास्ति किञ्चन, इत्यादि श्रुतिनिषिद्धत्वाविशेषात् । न चोक्तश्रुतिः जडांशे भेदविशिष्टनिषेधिका जीवचैतन्यांशे तु भेदमात्रनिषेधिका, नतु तद्विशिष्टजीवचैतन्यस्वरूपनिषेधिकेत्यत्र नियामकमस्ति। अभेदप्रतिपादकश्रुतेः भेदपरत्वस्यैव वक्ष्यमाणत्वात् ।

यच्चोक्तम्- द्रव्याभिन्नस्य घटस्य द्रव्यत्वमित्यादि न तद् भद्रम् । यथा दृष्टान्ते द्रव्यं घट इति अबाधितप्रत्यक्षादिप्रमाणबलात् घटस्य द्रव्याभिन्नतया द्रव्यत्वाङ्गीकारो युज्यते तथा न जीवात्मनां सत्येश्वराभिन्नत्वे अबाधितप्रमाणं पश्यामः । येन जीवस्य पारमार्थिकेश्वराभिन्नत्वं स्वीकुर्मो वयम् ।

ननु तत्वमस्यादिश्रुतीनामभेदे प्रमाणभूतानां सत्वात् कथं नोपलभामहे इत्युच्यत इति चेन्न। उक्तश्रुतीनां भेद एव मानत्वमिति उत्तरत्र वक्ष्यमाणत्वात् । नाहमीश्वर इति अबाधितप्रत्यक्षेण निरवकाशभेदप्राप-

केण अत्रान्तरं वेदविदो विदित्वा, चेतनश्चेतनानाम्, द्वा सुपर्णेति वाक्येन च विरोधात्।

(शाब्दप्रत्यक्षवादभङ्गः)

अत्राभिनवाद्वैतिनः-नाहमीश्वर इति मानसप्रत्यक्षं भेदे न प्रमाणम्। मनसः प्रमाणसहकारित्वात् कालादिवत्। अस्तु वा तुष्यत्विति न्यायेन। तथापि तत्रानात्माहङ्कारविशिष्टमेव भिन्नतया प्रतीयत इत्याहुः। तदज्ञान विजृम्भणम्। नाहमीश्वर इति प्रतीतेरावाभ्यां साक्षिप्रत्यक्षरूपत्वाङ्गीकारेण मनोरूपेन्द्रियजन्यत्वाभावात् नोक्त दोषावकाशः। अस्तु वा मानसप्रत्यक्षरूपत्वं तस्याः। तथापि प्रमाणं सा, दोष लेशाभावात्। न च मनसः कालादिवत् प्रमाणसहकारितया न प्रमाणत्वमिति वाच्यम्। तथात्वे चक्षुषो रूपज्ञानं प्रति सहकारितया, लिङ्गज्ञानरूपानुमानस्य अनुमितिं प्रति सहकारितया करणत्वेन प्रमाणत्वं न स्यात्। न चेष्टापत्तिः। सर्वशास्त्रविरोधो भवेत्। अनुभवविरोधश्च।

ननु मानान्तर सहकारिणोऽपि लिंगज्ञानस्य अनन्यथासिद्धानुमितिरूपप्रमित्यन्तरस्य प्रामाण्य प्रयोजकस्य सत्वेन प्रामाण्यं सुवचम्। मनसस्तु प्रामाण्यं न सङ्गघटीति। तदुपपादकानन्यथासिद्ध प्रमितेरभावादिति चेन्न। अत्रापि सुखादिसाक्षात्काररूपस्य अहमित्याद्यनुभवरूपस्य वा प्रमित्यन्तरस्य तदुपपादकस्य सत्वेन मनसः प्रामाण्यं भवेदेव।

नच सुखादि साक्षात्कारस्य साक्षिरूप प्रत्यक्षत्वेन अहमित्याद्यनुभवस्य च स्वप्रकाशात्मस्वरूपज्ञानत्वेन च प्रामाण्य प्रयोजकत्वाभावादिति शङ्क्यम्। तथापि मोक्षजनकात्मतत्वसाक्षात्काररूपप्रमितेरनन्यथा-

सिद्धायाः तत्प्रामाण्योपपादिकाया विद्यमानत्वेन मनःप्रामाण्यस्य सूपपादत्वात्।

नन्वेवमपि तस्याः शब्दकरणत्वेनान्यथासिद्धत्वादिति चेत् अत्रोच्यते। यवाङ्कुरं प्रति कलमबीजस्येवापरोक्षप्रमां प्रति शब्दस्य स्वरूपायोग्यत्वात्। अन्यथा तस्य प्रत्यक्षप्रमाकरणत्वेन प्रत्यक्ष एवान्तर्भावः स्यादित्याहुः।

ननु परोक्षज्ञानकरणत्वाविशेषेऽपि शब्दानुमानयोर्यथा नान्यतरस्यान्यतरस्मिन् अन्तर्भावः तथा शब्दस्यापि न प्रत्यक्षेऽन्तर्भाव इति चेन्न। तयोर्ज्ञानकारणत्वस्य समत्वेऽपि शाब्दत्वानुमितित्वरूप विजातीय प्रमाकरणत्वेन एकस्मिन् प्रमाणेऽन्यतरस्य नान्तर्भावः। शब्दस्य तु ज्ञानमात्रजनकत्वस्वभावात् विजातीयप्रमिति करणत्वाभावेन प्रत्यक्षेऽन्तर्भावो भवेदेव।

अत्र कश्चिदाह। घटोऽस्तीत्यादिशब्दकरणस्य ज्ञानस्य परोक्षत्वेऽपि वेदान्तरूपशब्दजन्य ज्ञानस्यापरोक्षत्वेन शाब्दत्वसम्भवात् तादृशविजातीयप्रमितिकरणत्वेन ब्रह्मपर वेदान्तस्यापि प्रमाणान्तरत्वं स्यादेवेति। तन्न। वेदान्तशब्दस्य शब्दमात्रस्य वाऽपरोक्ष ज्ञानकरणत्वे मानाभावात्। शाब्दापरोक्षत्वस्य दुष्प्रमाणत्वाच्च। आत्मतत्वसाक्षात्कारस्य जन्यापरोक्षत्वेन इन्द्रियकरणत्वाभावे परिशेषात् मनस एव तत्र करणत्वसिद्धेर्दुर्वारत्वात्।

नन्वेवमपि नेन्द्रियाणि नानुमानमित्यादीन्द्रियगम्यत्व निषेधप्रतिपादकश्रुतेः का गतिरिति चेत् अत्रावैहि। एतासां श्रुतीनां बहिरिन्द्रिय-

गम्यत्व निषेधपरत्वात्। नच यन्मनसा न मनुते इति श्रुतिविरोधः स्यादिति वाच्यम् । तस्या अपि मनसैवानुद्रष्टव्यम्, दृश्यते त्वग्रया बुद्ध्या, एषोऽणुरात्मा चेतसा वेदितव्य इत्यादि वाक्यविरोधेन विषयान्तर-कल्पनायाः स्वरसत्वात्। न चैवमपि तं त्वौपनिषदं पृच्छामि, औपनिषदः पुरुषः इत्याद्युपनिषदेक गम्यत्व प्रमाणानां का गतिरिति शंक्यम्। तेषा-मपि उपनिषदुपजीवि प्रमाणागम्यत्व परत्वेन तदुपजीविमानगम्यत्वे विरोधाभावात् ।

वस्तुतस्तु शब्दस्यापरोक्षजनकत्वं दुर्वचमेव। तथाहि । शब्दस्या-परोक्षज्ञानजनकत्वं किं शब्दत्वेन. आहोस्वित् प्रमाणशब्दत्वेन, उत अपरोक्षविषयकशब्दत्वेन? नाद्य द्वितीयौ । अतिप्रसङ्गात् । न तृतीयः इन्द्रियासन्निकृष्टे घटादौ प्रवर्तमानस्य घटोऽस्तीति वाक्यस्यापि अपरोक्ष-ज्ञानजनकत्व प्रसंगात् । नच यं प्रति यदा यदपरोक्षं तद्वस्तुविषयकं प्रमाणं तं प्रति तदा तदपरोक्षज्ञानजनकमिति वाच्यम्। विषयेन्द्रियसन्नि-कर्षादि घटितसमग्रया आवश्यकत्वेन तयैव च तदुपपत्तौ अपरोक्षज्ञान-जनकत्वेनाक्लृप्तशब्दस्य तदपरोक्षज्ञानं प्रति जनकत्वे मानाभावात् ।

ननु तथापि दशमस्त्वमसीति वाक्यात् शाब्दापरोक्षस्य जायमानत्वेन अवश्यं शाब्दापरोक्षमकामेनाप्यूरीकर्तव्यमिति चेत् अत्र वयं ब्रूमः । दशमस्त्वमसि वाक्यान्नापरोक्षं भवति । किन्तु अहं दशम इति ज्ञानं जायमानं यदि देहविषयकं तदा चक्षुष्मतः पुरुषस्य चाक्षुषमेव भवति। अंधस्य यदि तदा स्पार्शनमेव । यदि देहातिरिक्तात्मविषयकं तदा मानसम् । तत्र त्वयं विशेषः । वाक्योपस्थितं दशमत्वमुपनीतमहमर्थे भासंते ।

न चापरोक्षार्थविषयकत्वं विना ज्ञानेऽपरोक्षत्वस्य दुर्वचतया दशमस्त्वमसिवाक्यजन्यमपि ज्ञानमपरोक्षार्थविषयकत्वेनापरोक्षमेवेति युक्तम् । ज्ञानाकरणकज्ञानत्वस्यैव अपरोक्षलक्षणत्वात् । वाक्यजन्य-ज्ञानस्य पदज्ञानकरणकतया अपरोक्षत्वायोगात् । त्वदुक्तापरोक्षत्व-स्यायुक्ततयाऽसम्भवात्। ननु अनावृत संविदभिन्नत्वं तदिति चेत् अत्रापि ब्रूमो वयम् । वास्तवाभेदविवक्षायामनुमेय वस्तुगोचर ज्ञानस्याप्यप-रोक्षताप्रसंगात्। निरस्त भेदोपाधिकाभेदविवक्षायां चरमसाक्षात्कारस्यो-त्पत्तिसमये भेदोपाधेरविद्याया विद्यमानत्वेनापरोक्षत्वाभाव प्रसङ्गात् ।

एतेन केनचिदुक्तम्- 'अपरोक्षार्थविषयकत्वमेव ज्ञानस्यापरोक्ष-त्वम् । तच्च अनावृत संविदभिन्नत्वमेव। न त्वपरोक्षज्ञान विषयत्वम् । यद्वा ज्ञानवस्तुनोरुभयोरप्यनावृत संविदभिन्नत्वमेवापरोक्षत्वम् अतो न कोऽपि दोषः' इति निरस्तम् । आत्मचैतन्यस्वरूपस्य आसंसारं मूलाज्ञानावृतत्वेन कुत्राप्यनावृत संविदभेदस्यासंभवेनापरोक्ष्याभाव प्रसङ्गात् । अनावृतत्वे तु तत्राध्यासायोगात् । स्फुरणांशस्यानावृतत्वेन तदभेदस्य सर्वस्मिन्नविशेषेण सर्वं प्रति सर्वस्याप्यापरोक्ष प्रसङ्गादिति ।

यच्चोक्तं नाहमीश्वर इति प्रतीतौ जीवेश्वरभेदो न प्रतीयते किंतु आत्मा अनात्मरूपाहंकारविशिष्टभिन्नतया प्रतीयते इति, अत्र ब्रूमः । जीवेश्वरयोर्भेदस्य प्रत्यक्षेणाप्राप्त्या भेदश्रुतीनां त्वन्मतेऽननुवादकत्वापा-तात् । तत्त्वमसीत्यत्र भेदप्रत्यक्षविरोधाभावेन पदद्वय लक्षणाभावापा-ताच्च । मुख्यार्थाहानेश्च ।

केचित् तद्धास्य विजिज्ञौ इति, पारं दर्शयतीत्यादिषूपदेशादेवापरोक्ष-ज्ञानोक्तेः, वेदान्तविज्ञान सुनिश्चितार्था इत्यादिश्रुतेः, विमतं शाब्द-

ज्ञानमपरोक्षम् अपरोक्षमात्रविषयक ज्ञानत्वात् सुखादिज्ञानवत्, अपरोक्षत्वं वेदान्तवाक्यजन्य ज्ञानवृत्ति, अपरोक्षज्ञाननिष्ठात्यन्ताभावाप्रतियोगित्वात् ज्ञानत्ववत् इत्यनुमानादेः सत्वाच्च कथं न शाब्दापरोक्षमित्याहुः ।

अत्र ब्रूमः। उक्तश्रुतीनां परोक्षज्ञानेनैव चरितार्थत्वात्। दर्शयतीत्यादेस्तु मार्गोपदेष्टरि मार्गं दर्शयतीतिवत् परम्परया साधनत्वेन चरितार्थत्वात् अन्यथा मनसैवानुद्रष्टव्यमित्यादिश्रुतिविरोधः। वेदान्तेति श्रुतौ विशब्देन विशेषविषयत्वस्य, सुशब्देन अप्रामाण्यशङ्काऽकलङ्कितत्वस्य चोक्तेः । अन्यथा वेदान्तवेद्यस्य विजिज्ञासस्वेत्यत्र बोध्यस्य विचारकर्तव्यत्वादेः तेऽर्चिषमभिसंभवन्तीत्यत्र बोध्यस्य अर्चिरादेश्चापरोक्ष्यापातात्। आद्येऽनुमाने च अयं घटः त्वं सुखवानसीत्यादि शाब्दज्ञाने व्यभिचारात् । शब्दः अपरोक्षज्ञानजनको न, शब्दत्वात्, ज्योतिष्टोमादिवाक्यवदित्यनुमानेन सत्प्रतिपक्षितत्वाच्च । अपरोक्षयोग्यत्वविवक्षायां तु भित्त्यन्तरितघटविषयकशाब्दज्ञाने व्यभिचाराच्च । द्वितीये तु अपरोक्षत्वं ज्योतिष्टोमादिवाक्यजन्यज्ञानवृत्तीत्यपि सुसाधत्वेनाभास साम्यात् । शब्दत्वेन सत्प्रतिपक्षितत्वाच्च । किञ्च शब्दस्य प्रत्यक्षधीहेतुत्वे प्रत्यक्षान्तर्भावापत्तिः । तथा च न शाब्दापरोक्षमिति दूषयाञ्चक्रुः ।

(भेदमिथ्यात्वभङ्गः)

किञ्च भेदश्रुतेः मिथ्याभेदपरत्वे अप्रामाण्यं भवेदेव। ननु अतात्विकं भेदम् अतात्विकत्वेन बोधयन्त्याः श्रुतेरप्रामाण्यं न भवेदिति चेन्न । श्रुतेर्भेदमात्रप्रतिपादकत्वेन अतात्विकत्वे औदासीन्यात् । अन्यथा कर्मादिस्वरूपप्रतिपादकस्य कर्मकाण्डस्य तत्वावेदकता स्यादेव। तत्रापि

अतात्विककर्मणोऽतात्विकत्वेन बोधकत्वस्य सुवचत्वात् । यदि तत्र अतात्विकत्वांशे औदासीन्यं तदा प्रकृते तुल्यम्। अपि च अतात्विकत्वेन श्रुतिर्बोधयतीत्यस्याः कल्पनायाः भेदस्यातात्विकत्वसिद्ध्युत्तरकालीनत्वादन्योन्याश्रयः । तथाहि- भेदस्यातात्विकत्वसिद्धौ श्रुतेरप्रामाण्याभावसिद्धिः । तत्सिद्धौ च भेदस्य अतात्विकत्वसिद्धिरिति । यत् मानं तत् स्वार्थसत्तानिश्चायकमिति व्याप्त्या भेदवाक्येन तत्सत्वसिद्धेः सुवचत्वात् ।

किञ्च मिथ्याभूतार्थप्रतिपादकत्वेन भेदश्रुतीनां शुक्तिरजतप्रत्यक्षवत् अप्रामाण्यापत्तेर्दुर्वारत्वात् । ननु भेदस्य व्यावहारिकत्वेऽपि तत्परश्रुतीनामपि यक्षानुरूपो बलिरिति न्यायेन व्यावहारिकं प्रामाण्यं सिध्यतीति नाप्रामाण्यम्। इतोऽधिकं पारमार्थिकं प्रामाण्यं नाम अबाधितार्थकत्वमिति चेत् । तर्हि किं नाम व्यावहारिकं प्रामाण्यम् ? बाधितार्थकत्वमिति चेत्, किमतोऽन्यत् अप्रामाण्यं नाम ? अन्यथा इदं रजतमिति वाक्यस्य शुक्तिरजताध्यक्षस्य च प्रामाण्यापत्त्या इदं प्रमाणमिदमप्रमाणमिति सर्वजनसिद्धव्यवहारो दत्तजलाञ्जलिः स्यात् ।

ननु श्रुत्योपस्थापितार्थानङ्गीकारे हि भेदवाक्यस्याप्रामाण्यं भवेत् । न च वयं श्रुतिप्रतिपाद्यभेदं नाङ्गीकुर्मः । किन्तु तत्सत्यत्वमिति चेन्न । स्वगोचरार्थाबाधो हि प्रामाण्यम् । तद्बाधश्चाप्रामाण्यम् । तद्वेद्यार्थस्य बाधे कथं श्रुतेः प्रामाण्यम्? सत्यपदाश्रवणमात्रेण तदनङ्गीकारे तत्वमसि, अहं ब्रह्मास्मि इत्यादौ अभेदः पारमार्थिको न स्यात् ।

अपि च नायं भेदो व्यावहारिकः। मुक्तावपि

योवेद निहितं गुहायां सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा
विपश्चितेति, परं ज्योतिरूपसम्पद्य स्वेन रूपेणाभि-
निष्पद्यते, स तत्र पर्येति जक्षन् क्रीडन् रममाणः, तदा
विद्वान् पुण्यापापे विधूय निरञ्जनः परमं साम्यमुपैति, जुष्टं
यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः,
पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति ।

इत्यादि श्रुतिषु भेदोक्तेः। किं बहुना- त्वया शुद्धब्रह्मविषयत्वेन स्वीकृताया भूमविद्यायाः फलोक्त्यवसरे 'तस्य सर्वलोकेषु कामचारो भवति' 'स एकधा भवति त्रिधा भवति पञ्चधा सप्तधा नवधा चैव' इति भेदोक्तेश्च। एवं स्मृत्यादावपि । न च सा मुक्तिरवान्तरा ।

इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ।
सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च ।

इत्यादिस्मृतौ सर्गाद्यभावोक्तेः ।

न यत्र माया किमुतापरे हरे -
रनुव्रता यत्र सुरासुरार्चिताः ।
श्यामावदाताः शतपत्रलोचनाः
पिशङ्गवस्त्राः सुरुचस्सुपेशसः ।

इति भागवते मायानिषेधाच्च ।

(भेदस्यौपाधिकत्वभङ्गः)

अत्र शङ्कते- जीवेश्वरभेद औपाधिक एव न तु स्वाभाविक इति । तन्न । कोऽसावुपाधिः ? अन्तःकरणमेवोपाधिरिति चेन्न । सुषुप्तिमूर्छादौ अन्तःकरणस्य लयेन तन्निवृत्तावपि जीवेश्वरभेदस्य निवृत्त्यदर्शनेन उपाधिनिवृत्तिप्रयुक्तनिवृत्तिप्रतियोगित्वरूपौपाधिकत्वस्याभावात् । नह्यन्यस्य भेदोपाधित्वे मानमस्ति येनेदानीं तदनिवृत्त्या न भेदनिवृत्तिरिति शब्दावकाशः ।

ननु सुप्तावपि संस्कारात्मनान्तःकरणमस्तीति चेन्न । त्वयैव कार्यकारणयोर्भेदाङ्गीकारात् । अन्यथा अन्तःकरणस्य या संस्कारावस्था सैव जाग्रदवस्थागतोपाधिः सम्भवतीति जाग्रदवस्थायामिव सुषुप्त्यव- स्थायामपि तदुपाधिरूपसामग्रीसत्वेन जीवेश्वरभेदादिप्रतीति व्यवहार- प्रसङ्गात् । न हि जाग्रदवस्थायामपि जीवेश्वरभेदानुभवः साक्ष्यतिरिक्तः।

किञ्चान्तःकरणस्य सुषुप्त्यादौ नाशेन तदुपाधिकभेदनाशात् जीवस्य स्वरूपसुखानुभवः स्यात् । तस्माच्च न सांसारिकदुःखानुभवः ।

ननु सुषुप्त्यादौ अन्तःकरणाभावेऽपि अविद्या जीवेश्वरभेदे उपाधिरस्तु । सुषुप्तौ अन्तःकरणविलयेऽपि तस्याः सत्वादिति चेन्न । जपाकुसुमाद्युपाधिनिवृत्तौ तदुपाधिकस्फटिकलौहित्यादिनिवृत्तिवत् घटाद्याकारापरोक्षाद ज्ञानरूपोपाधिनिवृत्तावपि घटपटादिपरस्परभिन्न प्रपञ्चनिवृत्त्यदर्शनात् ।

किञ्चाविद्यान्तःकरणादेश्चैतन्ये आकाशे घटादिवदुपाधित्वं न युक्तम्। घटाकाशो मठाकाश इतिवदविद्याचैतन्यम् अज्ञानचैतन्यमन्तः- करणचैतन्यमित्याद्यननुभवात् ।

नापि दर्पणवदुपाधित्वम् । दर्पणे मुखमितिवत् अविद्यायां चैतन्य- मन्तःकरणे चैतन्यमित्याद्यननुभवात् । प्रत्युताहमज्ञः अज्ञचेतन इत्येवानुभवात् ।

अपि चाविद्यान्तःकरणादेः चैतन्यप्रतिबिम्बोद्ग्राहित्वं चैतन्यस्वतन्त्र-प्रतिफलनवत्वं चायुक्तम् । नीरूपत्वात् । लोके हि उद्भूतरूपवदेव सूर्यमुखादिकं प्रतिफलनयोग्यं विप्रकृष्टदेशवर्तिनि उद्भूतरूपवति स्वच्छे जलदर्पणादौ प्रतिबिम्बितमिति दृष्टम् । न हि चैतन्यमन्तःकरणादिकं चोद्भूतरूपादिमत् । न च अविद्यादिकं प्रतिफलनयोग्यं स्वतो विप्रकृष्टदेशवर्ति स्वच्छं वा ।

न च नीरूपस्यापि आकाशस्य जले प्रतिबिम्बो दृश्यत इति चेत् न । सलिले गगनप्रतिबिम्बितत्वव्यवहारस्य भ्रममूलत्वात् । न च बाधकाभावात् सत्यो व्यवहारोऽस्त्विति शङ्क्यम् । तथात्वे नीरूपस्यापि वाय्वादेः जलादौ प्रतिफलनापत्तेः । उद्भूतरूपवत्वस्यैव प्रतिफलनयोग्यतावच्छेदकत्वकल्पनेन तदभावस्यैव बाधकत्वात् । न च नीरूपस्यापि वर्णस्य ध्वनौ प्रतिबिम्ब-दर्शनेन उद्भूतरूपवत्वं न तदवच्छेदकमिति शङ्क्यम् । ध्वनौ वर्णप्रतिफलने मानाभावात् । व्यञ्जकतयैव तदुपपत्तेश्च ।

ननु 'यथा ह्ययं ज्योतिरात्मा विवस्वान्' 'अत एव चोपमा सूर्यकादिवत्' इति श्रुतिसूत्राभ्यां जीवेश्वरयोः बिम्बप्रतिबिम्बभावस्य व्यवस्थापनात् तदन्यथानुपपत्त्या लोके अदृष्टमपि नीरूपस्य चैतन्यस्य नीरूपाविद्यान्तःकरणादौ प्रतिफलनमिहैव कल्प्येतेति चेन्न । उक्त-श्रुतिसूत्रयोः तदधीनतामात्रेण तत्प्रतिबिम्बत्वमित्यर्थपरतयाऽन्यत्र व्याख्यातत्वात् । तस्मान्नोक्तरीत्या दर्पणादेरिवोपाधित्वमिति ।

ननु अविद्यान्तःकरणादेर्न प्रतिबिम्बोद्ग्राहितयोपाधित्वमस्माभिरुच्यते। किन्तु जपाकुसुमादिवत् स्वधर्मासञ्जकत्वमिति चेत् । अन्तःकरणावच्छिन्नो जीवः, मायावच्छिन्न ईश्वरः इति तु तव मतम् । तथाचाविद्यान्तःकरण-

गतकर्तृत्वम् अल्पज्ञत्वदुःखित्वादिकं च जीव आरोप्यते यथा कुसुमगतं लौहित्यं स्फटिके इति तु तव मतम् । तच्च न सम्भवति । अविद्यान्तः-करणयोः कर्तृत्वाल्पज्ञत्वादिधर्माणामभावात् । तत्र चोक्तधर्माणां सत्वे प्रमाणाभावाच्च ।

न च कामस्सङ्कल्प इत्याद्युपक्रम्य एतत्सर्वं मन एवेति श्रुतिरेव मानमिति शङ्क्यम् । उक्तश्रुतेः मनसा वाग्रे सङ्कल्पयतीति श्रुत्या मनसः करण-रूपत्वात् । आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः इति श्रुतेरात्मनो भोक्तृत्वे देहादिवन्मनस्सहकारीत्येवंपरत्वात् । कामस्सङ्कल्प इति श्रुतौ भेदस्य अल्पज्ञत्वकर्तृत्वादिधर्माणां चाश्रवणाच्च ।

न च शङ्क्यं जीवस्योक्तधर्मकत्वे न मानमिति । अहं करोमि, पिबामि, गच्छामीत्यादिप्रत्यक्षस्य, परममुक्तौ 'जक्षन् क्रीडन् रममाणः' 'सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता' 'कर्ता विज्ञानात्मा' 'यो वेदेदं जिघ्राणीति स आत्मा' 'आनन्दभुक्' 'सुप्तो भूर्भूरित्येव प्रस्वपिति' 'मनः उदक्रामन्मीलित इवाश्नन् पिबन्नास्तैव' इत्यादिश्रुतीनां 'कर्ता शास्त्रार्थवत्त्वात्' इत्यादिसूत्राणां च मानत्वात् । 'ध्यायतीव लेलायतीव' इत्यादिश्रुताविवशब्दस्य परतन्त्रप्रभौ प्रभुरिवेतिवत् जीवनिष्ठ-कर्तृत्व-स्येश्वराधीनत्वात् 'कर्ताहमिति मन्यत' इति श्रुतेः जीवे स्वातन्त्र्य-निषेधकत्वाच्च । न च तदधीनत्वे न मानमिति वाच्यम् ।

द्रव्यं कर्म च कालश्च स्वभावो जीव एव च ।
यदनुग्रहतः सन्ति न सन्ति यदुपेक्षया ।।

अस्मान्मायी सृजते विश्वमेतत् ।
तस्मिंश्चान्यो मायया सन्निरुद्धः ।।

तमेव भान्तमनुभाति सर्वम् ।

इत्यादौ जीवस्येश्वराधीनत्वोक्तेः । एवं मायायां सर्वज्ञत्वसर्वकर्तृत्व-सर्वनियामकत्वादिधर्माणामभावात् । न हि तत्र सर्वज्ञत्वादिकमस्तीति किञ्चिन्मानमस्ति । किञ्च भगवति ज्ञानादिधर्माणामौपाधिकत्वे

ज्ञानं नित्यं क्रिया नित्या बलं नित्यं परात्मनः ।

स्वाभाविकी ज्ञानबलक्रिया च ।

इति सत्यकामेत्याद्यौपाधिकत्वविरोधिनित्यस्वाभाविकत्वसत्यत्व प्रति-पादकश्रुतिविरोधात् । तथाच भगवद्गुणाः नौपाधिका इति एष वैदिकः पन्थाः ।

ननु निर्विशेषस्य ब्रह्मत्वाङ्गीकारेण मिथ्याभूतसविशेषे औपाधिक-गुणाङ्गीकारे बाधकाभाव इति चेन्न। निर्विशेषं ब्रह्म खपुष्पायमानमिति उत्तरत्र वक्ष्यमाणत्वात् ।

किञ्च अविद्यान्तःकरणयोर्मिलितयोर्भेदे उपाधित्वम्, उत प्रत्येकम्? नाद्यः। सुषुप्तौ अन्तःकरणस्य लयेनोभयोर्मेलनासम्भवात् । उत्थितस्य देवदत्तस्यौपाधिकभेदनाशेन जीवस्वरूपसुखानुभवापाताच्च । नान्त्यः-प्रत्येकं दूषणानां पूर्वमेवावेदितत्वात् ।

अपि च प्रतियोग्यनुयोगिनोः विद्यमानत्वदशायां तत्प्रतियोगिका-न्योन्यभेदस्योपाधिनिवृत्त्या निवृत्तेः काप्यदर्शनात् । येन प्रतियोग्यनु-योगिनोः जीवेश्वरयोः सत्वेऽपि तद्भेदस्योपाधित्वाभिमतनिवृत्त्या निवृत्तिरङ्गीक्रियेत । अथ घटाकाश मठाकाशयोर्भेदस्तादृशो दृष्ट इति

चेन्न । किं तद् विशिष्टं पदार्थान्तरमिति मतरीत्या उत मतान्तररीत्या? नाद्यः । घटाकाशमठाकाशयोः सत्वावस्थायां भेदस्यैव सत्वेन उपाधि-त्वाभिमतघटनिवृत्त्या भेदनिवृत्तेरभावात् । न चरमः । घटाकाश मठाकाशयोरभेदग्राहक मानविरोधेन भेदप्रतीतेरेवासम्भवात् । यदि भेदप्रतीतिर्जायत एवेति दुरभिमानः तदा परंपरासंबन्धेन वर्णभेदप्रतीतिवत् उपाधित्वाभिमत घटपटादिभेदविषयत्वं किं न स्यात्?

किञ्चाविद्याद्युपाधिविशिष्टो जीव उतान्तःकरणाद्युपलक्षितः? न प्रथमः । विशिष्टस्य पदार्थान्तरत्वेन जीवेश्वरयोः प्रतियोग्यनुयोगिनोः यावत् सत्वं भेदस्य विद्यमानत्वेन उपाधित्वाभिमत निवृत्त्या निवृत्तेरभा-वात्। विशिष्टस्य जीवत्वे मुक्तौ अनन्वयापातात्। यदि चान्तःकरणाद्युप-लक्षितो जीवः तदा जीवेश्वरैक्यग्राहि प्रमाणविरोधेन भेदप्रत्यय एव न सञ्जाघटीति । कथंचित् भेदप्रत्ययस्य सुलभत्वे वर्णभेदप्रत्ययवत् परंपरासंबन्धेनोपाधिभेदविषय एव । जीवेश्वरयोरैक्यग्राहकप्रमाणानव-तारदशायां जायमानस्तद्भेदप्रत्ययो विभ्रम एवेति। तथा च प्रतियोग्य-नुयोगिनोः जीवेश्वरयोः सत्वदशायां तद्भेदस्य उपाधित्वाभिमत निवृत्त्या निवृत्तिर्न संभवतीति नित्य एव जीवेश्वर भेदोऽवगम्यत इति ।

(कार्योपाधिरयं जीव इति शुकरहस्योपनिषद्वाक्यार्थः)

ननु 'कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः', इति श्रुत्या जीवेश्वरयोरौपाधिकभेदस्य सिद्धत्वात् कथं भेदोऽनौपाधिक इति चेन्न । कार्योपाधिरयं जीव इति श्रुतौ कार्यकारणशब्ददर्शनात् कार्योपाधिरयमनु-भवसिद्धः अपूर्णबोधः जीवशब्दवाच्यः । कार्यत्वे सति आत्मत्वं उपाधिः

जीवशब्दप्रवृत्तिनिमित्तमिति यावत् । कारणोपाधिः पूर्णबोधः ईश्वरशब्दार्थः । कारणत्वे सति आत्मत्वमुपाधिः ईश्वरपदप्रवृत्तिनिमित्तमिति यावत् ।

अत्र केचित्- ईश्वरात्मवज्जीवात्मनोऽपि स्वरूपेणानादित्वात् न मुख्योत्पत्तिः सम्भवति। अमुख्योत्पत्तिस्तु ईश्वरात्मनोऽपि तुल्या । 'सम्भवामि युगे युगे' 'तदात्मानं सृजाम्यहम्' इत्यादिप्रमाणैरीश्वरात्मनोऽपि अमुख्योत्पत्तिप्रतीतेः । एवं चामुख्यकार्यत्वे सति आत्मत्वलक्षणस्य ईश्वरात्मनि अतिव्याप्तिरित्याहुः ।

अत्र वदन्ति- श्रुत्युक्तजीवशब्दप्रवृत्तिनिमित्तशरीरप्रविष्टात्मत्व शब्देनापूर्णबोधत्वस्य विवक्षिततया नेश्वरे अतिव्याप्तिरिति ।

वयं तु ब्रूमः- जीवपदप्रवृत्तिनिमित्तशरीरप्रविष्टकार्यत्वशब्देन ईश्वरनिष्ठकारणतानिरूपित पाञ्चभौतिकशरीरवन्निष्ठकार्यता विवक्षितेति ईश्वरे नातिव्याप्तिः । तस्य सच्चिदानन्दशरीराभिव्यक्तिरूपोत्पत्तिस्वीकारात् उक्तलक्षणस्य तत्रानागमनान्नातिव्याप्तिः ।

न च पूर्णबोधोवशिष्यत इत्यत्रापूर्णबोधः पूर्णबोध इति द्वेधा पदच्छेदः कथमिति शङ्क्यम् । क्त्वाप्रत्ययस्य सत्वेनोभयथापि पदच्छेदसम्भवात् ।

किञ्च, 'कार्यकारणतां हित्वा पूर्णबोधोऽवशिष्यते' इति वाक्यशेषे तल्प्रत्ययश्रवणात् कार्यकारणशब्दयोः भावप्रधाननिर्देशोपपत्तेः । स्वाभाविकभेदानङ्गीकारे कार्योपाधिरयं जीव इति अपरोक्षनिर्देशाभावापाताच्च ।

ननु अनुपसञ्जातविरोधित्वेन प्रथमश्रुतकार्यकारणशब्दरूपभवितृप्रधाननिर्देशस्यैव बलवत्त्वेन तदनुसारेण वाक्यशेषनिर्णयस्योचितत्वात् । अन्यथा उपक्रमाधिकरणविरोधः स्यादिति चेन्न । (अक्ताधिकरणाद्यनुसारेणोपसंहारप्राबल्याङ्गीकारात् ।)*

नापि 'मायामात्रमिदं द्वैतम्' इति श्रुतिर्भेदस्यौपाधिकत्वे मानम् । तद्धि न तावत्पदार्थः, नापि वाक्यार्थ इति अविवादम् । भेदस्य मायामात्रत्वं तु श्रुतम् । तथाच मायाशब्दस्य शक्तौ इच्छायां वा,

'एकस्त्वमेव भगवन्निदमात्मशक्त्या
मायाख्ययोरुगुणया महदाद्यशेषम् ॥'
'इच्छामात्रं प्रभोः सृष्टिः ।'

इत्यादौ प्रयोगदर्शनात् ।

किञ्च अयं भेदो नौपाधिकः । तस्याविद्यान्तःकरणाद्युपाध्यन्वयव्यतिरेकानुविधायित्वाभावात् । तस्यौपाधिकत्वे च तज्ज्ञानस्य भ्रमत्वेन मोक्षसाधनत्वाभावप्रसङ्गाच्च ।

न च तस्य तदभावो दृष्ट एवेति शङ्क्यम् । 'ज्ञाज्ञौ द्वावजावीशानीशौ' 'अनीशश्चात्मा बुध्यते भोक्तृभोगान् ।' 'अत्रान्तरं वेदविदो विदित्वा लीना ब्रह्मणि तत्परा योनिमुक्ताः' इत्यादिश्रुतिभिः पूर्वमेव भेदज्ञानस्य मोक्षसाधनत्वस्यावेदितत्वात् । अथ

विभेदजनके ज्ञाने नाशमात्यन्तिकं गते ।
आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति ॥

* अयमंशो मूलकोशादृष्टोऽपि त्रुटितः स्यादिति न्यूनतापरिहाराय निवेशितः ।

इति स्मृतिः भेदस्यौपाधिकत्वे मानम्। मैवम्। विभेदजनके भेदविरुद्धाभेदजनके अज्ञाने नाशमात्यन्तिकं गते सति जीवब्रह्मणोरभेदमसन्तं कः करिष्यति? न कोऽपीत्यर्थपरत्वेन स्मृतेर्नयनस्य सुरसत्वात्। अन्यथा असन्तमिति पदस्य विभेदजनके इत्यस्यापि पदस्य वैयर्थ्यापत्तेः। त्वन्मते जीवेश्वरभेदस्यानादित्वेन मन्मते नित्यत्वेन तत्र त्रैकालिकनिषेधप्रतियोगित्वरूपासत्वस्य प्रागभावस्य उत्पत्तिमत्वस्य चासम्भवात्। भेदस्यान्योन्याभावरूपत्वेन नित्यत्वाच्च। अन्यथा ऐक्यस्यापि नित्यत्वानापत्तेः। न च अभेदस्य ब्रह्मरूपत्वेन नित्यत्वमेवेति वाच्यम्। भेदोऽपि ब्रह्मस्वरूपमिति पूर्वमेवावेदितत्वात्।

वस्तुतस्तु - भेदस्यौपाधिकत्वं दुर्वचमेव। तथाहि- औपाधिकत्वं नाम उपाधिजन्यत्वम् उत तज्ज्ञाप्यत्वं वा ? नाद्यः- भेदस्यान्योन्याभावरूपत्वेन नित्यत्वात्। त्वन्मते जीवेश्वरयोर्भेदस्यानादित्वाच्च। तदुक्तम् -

जीव ईशो विशुद्धा चिद् भेदस्तस्यास्तयोर्द्वयोः।
अविद्यातच्चितोर्योगः षडस्माकमनादयः। इति।

नान्त्यः - विद्यमानस्यैव ज्ञाप्यत्वादिष्टसिद्धेः। नचाविद्यमान एव भेदो ज्ञाप्यत इति शङ्क्यम्। तथात्वे भेदश्रुतीनामप्रामाण्यप्रसङ्गादिति।

किञ्च उक्तानामुपाधीनां भेदकत्वमेवानुपपन्नमिति आर्याः आचार्याः। तथाहि- उपाधिः एकदेशेन सम्बध्यते उत कृत्स्नेन। नाद्यः- त्वन्मते स्वाभाविकांशाभावेन औपाधिकत्वे वाच्ये अनवस्था। तथा हि - किं एकदेशः स्वाभाविक उत औपाधिकः। नाद्यः- त्वयानङ्गीकारात्। न द्वितीयः- औपाधिकत्वे स चोपाधिः किमेकदेशेन सम्बध्यते उत सर्वेण। नाद्यः। स एकदेशो न स्वाभाविकः किन्तु औपाधिक इति वक्तव्ये तत्र चोपाधिः कश्चन वाच्यः। सोऽप्युपाधिरेवमिति। नापि कृत्स्नेनेति चरमः। तस्य न भेदकता। समग्रस्य एकोपाधिग्रस्तत्वात्। एवं दृष्टान्ते गगनादावपि स्वाभाविकांशानङ्गीकारे घटाद्युपाधिसम्बन्धो न स्यादेव। अत एवोक्तम् खण्डने-

'न चेदुपाधिसम्बन्धः एकदेशेऽथ सर्वगः।
एकदेशेऽनवस्था स्यात् सर्वगश्चेन्न भेदकः ॥' इति।

तस्मात् जीवेश्वरयोः भेदो नित्यः स्वाभाविक इति वैदिकः पन्थाः।

(नेह नानेति श्रुतेर्भेदनिषेधकत्वभङ्गः)

नन्वेवमपि नेह नानेति श्रुत्या ब्रह्मणि प्रपञ्चमात्रस्य निषेधात् तन्मध्यपतितजीवेश्वरभेदस्यापि कथं न मिथ्यात्वावगमः। तत्र इहशब्दार्थे ब्रह्मणि प्रतिपन्नोपाधौ नाना भिन्नं किञ्चन जगत् नास्तीति प्रपञ्चमात्रस्य निषेधावगमादिति चेन्न। यस्मिन् द्यौः पृथिवी, स विश्वकृत्, यस्मिन् पञ्च पञ्चजना आकाशश्च प्रतिष्ठित इति वाक्यैः प्रपञ्चसत्तावगमेन तत्र तात्पर्यात् तदभावायोगात्। मनसैवानुद्रष्टव्यमित्यव्यवहितपूर्ववाक्येन मनसो दर्शनसाधनत्वेन विधानात् पुनस्तन्निषेधे व्याघाताच्च।

न च तत्र तात्पर्याभाव इति वाच्यम्। तथात्वे होमसाधनतया विधीयमाने दध्यादावपि तात्पर्याभावप्रसङ्गात्। न च उक्तवाक्यानि अनुवादकानि निषेधार्थमिति मन्तव्यम्। द्युभ्वाद्याधारत्वादेः मानान्तराप्राप्तेः। न चानुमानादिना प्राप्तिर्भविष्यतीति वाच्यम्। धर्माधर्मस्वर्गनरकादेः यागा-

दीनां तत्फलविशेषं प्रति साध्यसाधनभावादेश्च सर्वथाऽनुमानतः सिद्धेः वक्तुमशक्यत्वात् । प्रत्यक्षस्य त्वतीन्द्रियार्थे अप्रसराच्च ।

केचित्तु भेद आरोपित एवेति वदन्ति तन्न। श्रुतिसूत्रादिसिद्धभेद आरोपितो यदि तदा सदेव सोम्येदमग्र आसीद् इत्यादि कारणवाक्यं साङ्ख्यादिश्रुतिसिद्धप्रधानकारणानुवादीति पूर्वपक्षं प्रापय्य ईक्षणेन चेतनकारणताप्रापकमिति त्वया सिद्धान्तितं न स्यात्। तत्रापि तदैक्षत, सेयं देवतैक्षत, नामरूपे व्याकरोदित्यत्रोक्तकर्तृत्वादिकमुक्तरीत्या अचेतनेऽपि आरोपितमित्यस्यापि सुवचत्वात्। तथा चाचेतनमपि कारणं स्यात् ।

किञ्च अन्तस्तद्धर्मोपदेशादित्यत्र य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते स कश्चन संसारी। न तु परमात्मा अरूपी । हिरण्यश्मश्रुः इत्यादौ तस्य रूपादिश्रवणादिति पूर्वपक्षे प्राप्ते आदित्यवाक्यादौ सर्वेभ्यः पाप्मभ्य उदित इत्यादिवाक्येभ्यः श्रुतस्य सर्वपापराहित्यादेः संसारिणि असम्भवात्, रूपादिकं तु नीरूपेऽपि ऐच्छिकमारोपितमुपास्यमस्तीति सिद्धान्तितम्। तदपि न सम्भवेत्। नीरूपेऽपि रूपादि यदि उपास्त्यर्थ-मुच्यते तदा जीवेऽपि पाप्माभावाद्युपासार्थमुच्यताम् ।

न च जीवे पाप्मनो व्यावहारिकत्वेन तदभावस्य प्रातिभासिकत्वम्। ब्रह्मणि तु नीरूपत्वस्य तात्विकत्वात् रूपं व्यावहारिकम्। तथाच श्रुतेः व्यावहारिकविषयत्वेन प्रामाण्यसम्भवे प्रातिभासिकविषयत्वं न युक्तमिति शङ्क्यम्। त्वन्मते उपास्यनामादौ ब्रह्मत्वादेः प्रातिभासिकत्वनियमात्। अत्रापि तथैवेति युक्तम् ।

एवं तत्र तत्र अधिकरणे अतिप्रसङ्गा बहवः सन्ति । अत्र विस्तर-भयान्नालिखम् ।

किञ्च अनुमया प्राप्तौ अनुवादकत्वे अनुभूतिर्न नाना अनुभूति-त्वादित्यनुमया प्राप्तस्यैक्यस्याभेदश्रुतिरपि अनुवादिनी किं न स्यात् ।

अपि च प्रपञ्चप्रापक 'सर्वस्य वशी सर्वस्येशानः सर्वाधिपतिः स एष सर्वेश्वर एष भूताधिपतिरेष भूतपालः' इत्यादिवाक्यशेषविरोधापातात्। निषेधपक्षे यस्मिन् द्यौः पृथिवी चान्तरक्षिम् आकाशमोतं च प्रोतं चेत्यादिप्रपञ्चप्रापकबहुवाक्यवैयर्थ्यापत्त्या बहूनामनुग्रहो न्याय्य इति तेषां विधायकत्वस्यैव स्वरसत्वाच्च। अत एव स्येनेोद्धन्तीत्यधिकरणमनुकूलितं भवति। तत्र स्येनोद्धन्तीत्यादि वाक्यानां बहूनां वैयर्थ्यापेक्षया एकस्यैव यज्ञायुधवाक्यस्य वैयर्थ्यस्वीकारादिति ।

किञ्च 'नेह नाने' ति वाक्यस्यैव बृहदारण्यके 'यस्मिन् पञ्च पञ्चजना' इति पूर्वेण 'य एषोऽन्तर्हृदय आकाशस्तस्मिन् शेते सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः एष भूतपाल' इत्युत्तरेण च, काठके 'ईशानं भूतभव्यस्य' इति पूर्वेण 'ईशानो भूतभव्यस्य' इत्युत्तरेण च जनसत्ता-ज्ञापकेन सन्दिग्धस्य तदविरोधेनैव नयनस्य सुरसत्वात्। विष्ण्वादिवाक्य-वत्। 'यस्मिन् पञ्च पञ्चजनाः। एष भूतपालः' इत्यादि वाक्यमध्यपतितस्य 'नेहनाना' इति वाक्यस्य प्रपञ्चविधायकत्वेन नयनस्यैव मुख्यत्वाच्च ।

नच यस्मिन् पञ्च पञ्चजना इत्यादेर्यच्छब्दयोगरूपानुवादलिङ्गेन स्वार्थे तात्पर्याभाव इति शङ्क्यम्। यदाग्नेयोऽष्टाकपाल इत्यादाविवाप्राप्तार्थतया स्वार्थत्यागासम्भवात् । अस्तु वाऽनुवादः तथापि उक्तरीत्या ज्ञापक-प्रमाणान्तराभावात् श्रुतिवाक्यस्यैवानुसर्तव्यत्वात्तद्विरोध एव भवेत् ।

नन्वेवमपि 'तमेवैकं जानथ आत्मानम् अन्या वाचो विमुञ्चथ' इत्युत्तरवाक्येन ऐक्यप्रतिपादनात् तत्र पञ्चजननिषेध उपपद्यत इति चेत् तदमङ्गलम्। तमेवेत्यनेन लोकाधारत्वविशिष्टस्य परामर्शात्। तदविरोधाय एकमित्यस्य एके मुख्यान्यकेवलाः इत्यनुशासनात् मुख्याद्यर्थकतयैव स्वीकर्तुमुचितत्वात्। तेन इतरान्विहाय तमेव जानथेति कुत इत्यपेक्षित-हेतुसमर्पणसम्भवाच्च ।

ननु यस्मिन् पीठे देवदत्तस्तिष्ठति तमानयेत्यादौ तच्छब्दस्य केवल-परामर्शकत्ववत् तमेवैकमित्यत्रापि तथा सम्भवादिति चेन्न। तत्र लौकिक-वाक्ये तात्पर्यस्य पुरुषेच्छाधीनत्वेन तथात्वेऽपि अपौरुषेयवाक्ये विशिष्ट-परामर्शे बाधकाभावात्। अपि च तमेवं विद्वान् इत्यादिवाक्यैः विशिष्ट-परामर्शप्रतिपादकैरैककण्ठ्यलाभेन विशिष्टपरामर्शस्यैवोचितत्वात् । आत्मन एकत्वे तमेवैकमिति श्रुतौ तमिति विशेषणस्य तमेवेत्यवधारणस्य च वैयर्थ्यापत्तिः । प्रत्युतैकमात्मानं जानथान्या वाचो विमुंचथेत्येव श्रुतिशरीरं स्यात्। किञ्च निषेधपक्षे अनाहुति वैं जर्तिलाश्च गवेधुकाश्चे-त्यत्रेव वाक्यभेदापत्तेः ।

(नेह नानेत्यत्र नानापदायोगः)

वस्तुतस्तु - श्रुतेः प्रपञ्चमिथ्यात्वपरत्वे नानापदस्य वैयर्थ्यं भवेत् । तथाच तस्याः न तन्मिथ्यात्वपरत्वम्। न च नानापदं न व्यर्थम्। तदभावे ब्रह्मणोऽपि निषेधः स्यादिति मन्तव्यम्। इहेति तस्य ब्रह्मणोऽधिष्ठानतया पृथगुपादनात् ।

नचैवमपि निषेधस्यापि निषेधापत्तिरिति शङ्क्यम्। स च निषेधः किं

ब्रह्मस्वरूप उत भिन्नः। नाद्यः- ब्रह्मणोऽधिष्ठानत्वेन नेहेति पृथगुपादानात् निषेधस्य तत्स्वरूपत्वे तन्निषेधालाभ एव । न द्वितीयः- अद्वैतहानेः । एकमेवाद्वितीयमिति श्रुतिविरोधापातात् । निषेधमादाय सद्वितीय-त्वापाताच्च।

न च अभावद्वैताङ्गीकारेण न सद्वितीयत्वापत्तिरिति शङ्क्यम् । अभावद्वैताङ्गीकारे किमपराद्धं भावद्वैतेन? श्रुतिविरोधसाम्यात् ।

वस्तुतस्तु- न हिंस्यात्सर्वा भूतानीति वाक्यविहितनिषेधस्य अग्नीषोमीयं पशुमालभेतेति वाक्यविहितपशुहिंसातिरिक्तहिंसाविषयत्ववत् नेहनानेति सामान्यनिषेधस्यापि यस्मिन् द्यौः पृथिवी यस्मिन् पञ्च पञ्चजनाः इत्यादि-वाक्यविहितातिरिक्तपरत्वं किं न स्यात् । अन्यथा आनीदवातं तम आसीदिति वाक्यप्रतिपन्नब्रह्मतमसोरपि नासदासीदित्यादिसामान्य-निषेधविषयत्वापातात् ।

न च नेहनानेति वाक्ये किञ्चनपदेन सामान्यतः समर्पितस्य प्रतियोगिनः विशेषवाक्यैः विशिष्य समर्पणान्नोक्तदोष इति मन्तव्यम्। तथापि विशिष्य समर्पितेतरवस्तुनोऽसिद्धितादवस्थ्यात् ।

किञ्च न हिंस्यात्सर्वा भूतानीति सामान्यनिषेधप्रतियोगिनः अग्नीषोमीयवाक्येन विशिष्य समर्पणं क्रियत इति किं न स्यात् ।

ननु तत्र उभयोरपि व्यावहारिकत्वेन विरोधात् तथाङ्गीकारेऽपि प्रकृते निषेधस्य पारमार्थिकत्वेन प्रपञ्चस्य च व्यावहारिकत्वेन भिन्नसत्ताक-त्वादविरोधेन नोक्तदूषणावकाश इति चेदत्र ब्रूमः- प्रपञ्चमिथ्यात्व-स्याद्याप्यसिद्धेः । अन्योन्याश्रयाच्च । किञ्च निषेधस्य व्यावहारिकत्वं

प्रपञ्चस्य पारमार्थिकत्वमिति वैपरीत्यं किं न भवेत्। तथाच नेयं कल्पना विदुषां चेतस्यधिरोहति।

किञ्च प्रपञ्चाभावस्य ब्रह्मस्वरूपत्वे ब्रह्मप्रपञ्चनिषेधयोराधाराधेयभावः कथं भवेत्। न हि घटे घटः इति प्रतीतिः सम्भवति। आधाराधेयभावस्य भेदसहितत्वात्।

ननु यथा घटाभावे घटाभाव इति प्रतीतिः त्वन्मते तथा प्रकृतेऽपि सम्भवेदिति चेदवेहि। मन्मते घटाभावे घटाभाव इति प्रतीतिस्सम्भवति। मया सविशेषाभेदस्यैवाङ्गीकारेण उक्तदोषाभावात्।

किञ्च ब्रह्मणि प्रपञ्चारोपः तद्भ्रमश्च न स्यात्। न च इदन्त्वादिना ज्ञाते भवेत्। निषेधस्य निषेधत्वेनाभानात् तदारोपः सम्भवत्येवेति मन्तव्यम्। तस्यापि ब्रह्मस्वरूपत्वादुक्तदोषस्तदवस्थ एव। अन्यथा तस्यातिरिक्तत्वेन निराकारत्वं न स्यात्। स्याच्च साकारत्वं सविशेषत्वं च निषेधत्वरूपविशेषसद्भावात्। न चेष्टापत्तिः। निर्विशेषत्वहान्यापातात्।

नन्वेवमपि तदारोपः सम्भवत्येव इदन्त्वेन विशिष्टस्यैव ब्रह्मणोऽधिष्ठानत्वेन स्फुरणात्। तदविरोधिन आरोपस्य सम्भवादिति चेदवेहि। भवन्मते शुद्धस्यैवाधिष्ठानत्वेनोक्तदोषतादवस्थ्यात्। इहेति पदस्य लक्षणापाताच्च।

अथ स्वरूपचितो नाज्ञानविरोधित्वम्। किन्तु चरमवृत्तेरेव। तथाच तदारोपः सुवच एवेति चेत् तदमङ्गलम्। स्वरूपचितोऽज्ञानाविरोधित्वे साक्षिवेद्ये सुखादावज्ञानं स्यात्। नच सुखाद्यपि वृत्तिप्रतिबिम्बित-

चिद्वेद्यमिति न दोष इति शङ्क्यम्। तथात्वे सुखादेः ज्ञातैकसत्वं न स्यात्।

केचित्तु- प्रपञ्चाभावोऽतिरिक्त एवेत्याहुः। तदभद्रम्। स चाभावः सत्यो वा मिथ्या वेति। न प्रथमः। पूर्वमेव दूषितत्वात्। किञ्च स च निषेधः श्रुतिबोध्यो न वा। आद्ये तत्र दृश्यत्वहेतोर्व्यभिचारः। न चरमः। श्रुतेरबोधकत्वं स्यादिति।

ननु तर्हि मिथ्येति पक्ष एवास्त्विति चेन्न। तथात्वे प्रपञ्चस्य सत्यत्वापातात्। प्रतियोगिसत्वे अभावबाध्यत्वस्यैव लाघवेन प्रयोजकत्वात्।

ननु स्वाप्नपदार्थप्रतियोगितदभावयोर्बाध्यत्वदर्शनात् कथं प्रतियोगिप्रपञ्चस्य सत्यत्वमिति चेत् न। स्वप्नदृष्टार्थाभावस्य जाग्रद्दशायामबाधानुभवात् न तस्य बाध्यत्वम्। स्वप्ने प्रतीतिमात्रेण बाध्यत्वे आत्मादेरपि बाधः स्यात्। स्वाप्नकामिन्यादिसङ्गाद् रेतःस्खलनदर्शनाच्च। न च स्वाप्नपदार्थस्य जीवाज्ञानकल्पितत्वेन प्रातिभासिकत्वं मन्तव्यम्। ईश्वरनिर्मितत्वेन जाग्रत्प्रपञ्चवत् स्वप्नार्थस्य सत्यत्वात्। न च तात्विकत्वे मानाभाव इति वाच्यम्। 'न तत्र रथा न रथयोगा न पन्थानो भवन्त्यथ रथान् रथयोगान् पथः सृजते न तत्रानन्दा' इति उपक्रम्य 'स हि कर्ता,

स्वप्नेन शारीरमभिप्रहत्यासुप्तः सुप्तानभिचाकशीति।
शुक्रमादाय पुनरेति स्थानं हिरण्मयः पुरुष एकहंसः।
प्राणेन रक्षन्नवरं कुलायं बहिष्कुलायादमृतश्चरित्वा।
स्वप्नान्त उच्चावचमीयमानो रूपाणि देवः कुरुते बहूनि।
आराममस्य पश्यन्ति न तं पश्यति कश्चन।'

इत्यादिखण्डेषु 'सन्ध्ये सृष्टिराह हि' 'निर्मातरं चैके पुत्रादयः' इत्यादिसूत्रेषु च स्वाप्नपदार्थस्य ईश्वरकर्तृकत्वदर्शनात्। 'सन्ध्ये स्थाने तिष्ठन् एते उभे स्थाने पश्यति' इति पूर्ववाक्येष्वेतत्कर्तृत्वदर्शनाच्चोक्तश्रुतेरेव प्रमाणत्वात्।

किञ्च अव्यवहितपूर्ववाक्ये 'याज्ञवल्क्य किंज्योतिरयं पुरुषः' इत्यत्र संसारिजीवस्य किं ज्ञानसाधनमिति उपक्रम्य 'आदित्य एवास्य ज्योतिः' इत्यादिखण्डमारभ्य 'अस्तमित आदित्ये याज्ञवल्क्य चन्द्रमस्यस्तमिते शान्ते अग्नौ शान्तायां वाचि किंज्योतिरेवायं पुरुषः इत्यात्मैवास्य ज्योतिर्भवतीत्यात्मनैवायं ज्योतिषास्ते' इत्यन्तेषु आत्मैव ज्ञानसाधनमिति प्रतिपाद्य, स आत्मा जीव एव किं न स्यादिति शङ्कानिरासाय 'कतम आत्मेति योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः स समानः सन्नुभौ लोकावनुसञ्चरति' इत्यस्मिन् खण्डे विज्ञानमयः पुरुष इत्यादिविशेषणैर्भगवतो नारायणस्यैव ज्ञानसाधनत्वप्रतिपादनात् ईश्वरस्यैव परमोपक्रमाच्च।

(नेह नानेत्यत्र इहशब्दायोगः)

किञ्च परमते इहेत्यपि व्यर्थम्। तदभावेऽपि, लोके शिरसि इत्यनुक्त्वापि शिखा नास्तीत्यादाविव, वेदे च नेति नेतीत्यादाविव, अद्वैतं परमार्थत इत्यादाविव, किञ्चन नास्तीत्युक्तिमात्रेण प्रपञ्चमिथ्यात्वलाभात्।

न च स्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वरूपमिथ्यात्वपर्यवसानाय तस्योपादानभूतब्रह्मोपस्थापकत्वमिति शङ्क्यम्। अधिकरणानिर्देशपूर्वकनिषेधमात्रेण यत्र प्रसक्तिः तत्रैव निषेधलाभात्। यस्मिन् द्यौरित्यादेस्त्वया ब्रह्मणि प्रसक्त्यर्थत्वाङ्गीकारात्।

न चेहेत्यभावे ब्रह्मणि द्युलोकादेः सद्भावेऽपि अन्यत्र तन्निषेधः स्यादिति मन्तव्यम्। नहि द्युलोकादेः अन्यत्र प्रसञ्जकमस्ति। तत्सद्भावे तु तत्रापि निषेधायान्यत्रापीति विशेषणीयमापद्येत। तेन च सार्वदेशिकनिषेधप्रतियोगित्वरूपमिथ्यात्वलाभेऽपि पारमार्थिकत्वाकारेण निषेधप्रतियोगित्वरूपमिथ्यात्वलाभायाद्वैतं परमार्थ इत्यपि विशेषणमपेक्षणीयं स्यात्। तस्मान्नैवं श्रुतिहृदयम्।

अथ इहेति पदं न व्यर्थं प्रतिपन्नोपाधौ त्रैकालिकनिषेधार्थं तत्सार्थक्यादिति चेत् अत्र वदन्ति- तथापि लाघवात् अत्यन्ताभावप्रतियोगित्वरूपमिथ्यात्वलाभस्य दुरपह्नवत्वात्। किञ्च प्रतिपन्नत्वं नाम प्रमितत्वं वा भ्रान्तिप्रतिपन्नत्वं वा प्रतीतमात्रत्वं वा'? नाद्यः। विरोधात्। नहि अधिकरणत्वेन प्रमीयमाणे वस्तुनि तन्निषेधः सम्भवति। नहि द्वितीयः-भ्रान्तिप्रतिपन्ने शुक्तिकाशकले रजतनिषेधस्यास्माभिरपि अङ्गीकारात् सिद्धसाधनम्। न तृतीयः। शशशृङ्गं नास्तीति प्रतीत्या अधिकरणत्वेन प्रतीयमाने शशे शृङ्गनिषेधसम्भवात् इष्टापत्तेः। गोशृङ्गमस्तीति वाक्यादिव शशशृङ्गमस्तीति वाक्यादपि ज्ञानोत्पत्तेरनुभूयमानत्वात्। तथाचोक्तलक्षणस्यासत्साधारणत्वेन अत्यन्ताभावप्रतियोगित्वरूपलक्षणस्य वक्तुमुचितत्वात् इहेति पदस्य वैयर्थ्यतावदस्थ्यादिति।

किञ्च नाना नास्तीत्यनेनैव ब्रह्मभिन्नप्रपञ्चस्य निषेधलाभेन किञ्चनपदस्यापि वैयर्थ्यं भवेदिति।

ननु उक्तश्रुत्या निषेधानङ्गीकारे निषेधवाक्यैकवाक्यताभङ्गलक्षणबाधकं स्यादिति चेन्न। प्रपञ्चप्रतिपादकवाक्यानां 'सर्वेषु भूतेषु एतमेव ब्रह्मेत्याचक्षते। यस्मिन् सर्वाणि भूतानि। यस्मिन् द्यौः। यस्मिन् पञ्च

पञ्चजनाः' इत्यादीनां मानान्तराप्राप्तार्थकत्वेन स्वार्थे तात्पर्यलिङ्गसद्भावेन विधायकत्वेऽपि समिधो यजतीत्यादिप्रयाजवाक्यानां दर्शपूर्णमासादि-वाक्यैकवाक्यतावत् यस्मिन् द्यौरित्यादिवाक्यानामपि ब्रह्मपरवाक्यैक-वाक्यतालाभात् नैकवाक्यताभङ्गः ।

किञ्च सृष्टयादिभेदप्रतिपादकवाक्यानां स्वार्थपरत्वेन न निषेधवाक्यैक-वाक्यता । तथा सति कर्मकाण्डस्य सर्वस्योपासनापरवेदान्तभागस्य सर्वस्य च निषेधवाक्यैकवाक्यतापत्त्या न कलञ्जं भक्षयेदित्यादौ कलञ्जं भक्षयेत्यादेरिव स्वार्थपरत्वाभावप्रसङ्गात् । कलञ्जं भक्षयेदित्यादि-वाक्यार्थस्येवाग्निहोत्रं जुहुयात् स्वर्गकाम इत्यादिवाक्यार्थानां, स एषोऽन्त-रादित्ये हिरण्मयः पुरुषो दृश्यत इत्यादि वाक्यार्थानां, यतो वा इमानि भूतानि जायन्ते, स इदं सर्वमसृजत इत्यादि सृष्टयादिवाक्यार्थानां च प्रत्यक्षादिप्रमाणान्तराप्राप्तत्वेन निषेधवाक्यैकवाक्यतायाः असम्भवाच्च ।

ननु न कर्मकाण्डस्योपासनाभागस्य च निषेधवाक्यैकवाक्यतां ब्रूमः । येन तदर्थासिध्याऽननुष्ठानं स्यात् । किन्तु सृष्टयादिवाक्यानामेव निषेधवाक्यैकवाक्यतां ब्रूमः इति चेत् सृष्टयादिवाक्यार्थानामपि कर्मकाण्डाद्यर्थवत् मानान्तराप्राप्तत्वेनार्थलिङ्गसत्वेन तद्वाक्यानां निषेध-वाक्यैकवाक्यतास्वीकारायोगात् कर्मकाण्डार्थानामुपासनावाक्यार्थानां च निषेधापातेन मिथ्यात्वापत्तेश्च ।

नन्वेवं तर्हि निषेधवाक्यानां का गतिरिति चेदवेहि- तद्गतेः प्रकारान्तरेण बहुधा वर्णितत्वात् ।

ननु न तौ पशौ करोतीत्यादेरप्रसक्तप्रतिषेधत्वपरिहाराय तावाज्य-

भागौ करोतीति श्रुतिकल्पनामङ्गीकृत्य श्रुतिप्राप्तस्य सर्वथा श्रुत्या निषेधायोगात् विकल्पाश्रयणवत् कर्मकाण्डोपासनाकाण्डसृष्टिवाक्य-प्राप्तार्थानां निषेधवाक्यैकवाक्यत्वासम्भवात् विहितप्रतिषिद्धत्वेन विकल्प एवाश्रीयते । एतावांस्तु विशेषः- तत्र विहितं प्रतिषिद्धं चोभयमपि व्यावहारिकम् । प्रकृते तु विहितं व्यावहारिकं निषेधस्तु पारमार्थिक इतीति चेत् न। विहितनिषेधार्थयोर्भिन्नसत्ताकत्वेन विरोधस्यैवाभावेन विकल्पवार्ताया एव भङ्गापत्तेः । विहितानामर्थानां पारमार्थिकत्वं निषेधस्य व्यावहारिकत्वमिति वैपरीत्यापत्तेश्च। बहुबाधस्यान्याय्यत्वाच्च ।

किञ्च अनेकविधप्रपञ्चस्य ब्रह्मणि प्राप्त्यभावेन तन्निषेधासम्भवात् तद्वाक्यैकवाक्यतायाः सुतरां वक्तुमशक्यत्वात् ।

यद्यपि प्रपञ्चस्य स्वकालदेशयोः प्रत्यक्षादिना प्राप्तिरस्ति । तस्य स्वदेशकालयोः प्रत्यक्षादिना प्राप्तत्वेऽपि ब्रह्मणि प्राप्तेः श्रुतिमन्तरेणा-सम्भवात् । नहि यत्र कुत्रापि प्राप्तिः ब्रह्मणि तन्निषेधोपयोगिनी । अन्यथा यत्र प्राप्तिः तत्रैव तन्निषेध इति सर्वसिद्धान्तो दत्ताञ्जलिः स्यात् । अतोऽलमकालवृष्टिधारया ।

केचिदद्वैतवादिनो नेति नेतीति श्रुतिरपि प्रपञ्चनिषेधार्थमिति भणन्ति । तदपि अभद्रम् । नेतीत्यस्य इति नेतीति उक्तमूर्तामूर्त-विलक्षणार्थत्वस्य स्फुटत्वे तन्निषेधार्थत्वस्वीकारायोगात् । विहितस्य निषेधायोगस्य पूर्वमेवावेदितत्वाच्च ।

(परमते नेह नानेति ब्रह्मणोऽपि निषेधापत्तिः)

वस्तुतस्तु- अनया नेह नानेति श्रुत्या ब्रह्मणि प्रपञ्चमात्रस्य निषेधे

ब्रह्मचैतन्यस्य स्वनिष्ठत्वेन स्वस्यैव स्वप्रतिपन्नोपाधित्वेन नेह नानेति श्रुत्याऽविशेषेण ब्रह्मनिष्ठसर्वनिषेधात् ब्रह्मचैतन्यस्यापि स्वस्वरूप-श्रुतिपतिपन्नोपाधिनिष्ठनिषेधप्रतियोगित्वेन मिथ्यात्वप्रसङ्गः ।

न च नानेति विशेषणादेव ब्रह्मव्यावृत्तिः। नानाशब्दस्य भिन्नार्थकत्वेऽपि ब्रह्मणोऽपि कुतश्चित् भिन्नत्वेनाव्यावर्तकत्वात्। 'तेभ्यो विलक्षणः साक्षी' इत्यादिना ब्रह्मणोऽपि भोक्तृत्वादितो भिन्नत्वेनावेदनात्। अविद्याऽसतोः सकाशात् त्वयापि भिन्नत्वेन ब्रह्मणोऽङ्गीकाराच्च ।

न च किञ्चनश्रुतेः ब्रह्मव्यतिरिक्तपरत्वेन सङ्कोचकमस्ति ।

न च यस्मिन् द्यौरित्यादिना ब्रह्मणि दिवादिकमिव ब्रह्मचैतन्यं क्वचिदप्युपाधौ न केनापि प्रतीतमिति वाच्यम् । य आत्मनि तिष्ठन् यो विज्ञाने तिष्ठन् स्वे महिम्नि प्रतिष्ठितः । आकाशवत् सर्वगतश्च नित्यः । सर्वेषु भूतेषु एतमेव ब्रह्मेत्याचक्षते, इत्यादिश्रुत्या ब्रह्मचैतन्यस्य स्वोपाधिकत्वेन प्रतिपन्नत्वात् ।

न च 'आकाशवत् सर्वगतश्च नित्यः', इत्यत्र सर्वशब्दस्य ब्रह्मव्यतिरिक्तपरत्वेन सङ्कोचे मानमस्ति। निषेधश्रुतेः प्रबलत्वेन यस्मिन् द्यौरित्यादिश्रुतेः निषेध्यसमर्पकत्ववत् मिथ्यात्वश्रुतेरपि निषेध्यसमर्पकत्वेन निषेधशेषतया दुर्बलत्वेनासङ्कोचकत्वात् । सत्यं ज्ञानमनन्तमित्यादि-ब्रह्मसत्यत्वप्रतिपादकश्रुतिविरोध इति चेत् । विश्वं सत्यं यच्चिकेत तत् सत्यमिति याथातथ्यतोऽर्थान् व्यदधात् शाश्वतीभ्यः समाभ्यः इत्यादि प्रपञ्चसत्यत्वप्रतिपादक श्रुतिविरोधस्य तुल्यत्वादिति ।

अत्र अभिनवाद्वैतवादिनः - 'जर्तिलयवाग्वा वा जुहुयात्, गवी-

धुकयवाग्वा वा जुहुयात्, अनाहुतिर्वै जर्तिलाश्च गवीधुकाश्चेत्यादौ निषेधप्रसक्त्यर्थतया यथा तद्वाक्यं प्रसञ्जकं तथा यस्मिन् द्यौरित्यादेरपि निषेधप्रसक्त्यर्थतया प्रसञ्जकत्वम् । तथा चास्तु श्रुतिबोधितार्थस्यापि निषेधः' इति भणन्ति ।

तदतिकोमलम् । तथाहि तत्र हि न जर्तिलादिर्होमसाधनत्वेन प्रस-ज्यते । तथात्वे भ्रान्तवाक्यवदप्रामाण्यप्रसङ्गात् । किन्तु जर्तिलादि-वाक्यस्य विधायकत्वे अनाहुतिवाक्यस्यानिषेधरूपत्वापत्त्या वैयर्थ्य-प्रसङ्गात् । वाक्यभेदापत्तेश्च । न च अनाहुतिवाक्यस्य विकल्प एव फलमिति शङ्क्यम् । अजाक्षीरेण जुहोतीति द्रव्यान्तरविधानादेव तत्सिद्धेः । तस्मादनाहुतिवाक्यस्य जर्तिलादिनिन्दाद्वारा पयःस्तावकत्वेन प्रयोजनं वाच्यम् । अतो जर्तिलादिवाक्यस्य पयस्स्तुत्यर्थवादत्वमेव स्वीकर्तव्यम् ।

किञ्च अनाहुतिवाक्ये समासस्थनञ्श्रवणात् यदि प्रतिषेधः तदाऽर्थवादो न स्यात् । उक्तं च तस्मिन्नेवाधिकरणे- यत्र विध्यन्तरेण एकवाक्यत्वं तत्र प्रतिषेधार्थमपहाय अर्थवादार्थो भवतीति। तथाच तदधिकरणविरोध एव भवेत् । अपि च पूर्वाधिकरणे उक्तम्- 'यत्र एकमर्थं उक्त्वा तद्विषय एव नकारः श्रूयते तत्र प्रतिषेधः यथा- अतिरात्रे षोडशिनं गृह्णाति नातिरात्र इति । तस्यात्रापवादः क्रियते' इति । तद्विरोधोऽपि स्यात् । पयसा जुहोतीति वाक्यस्यानर्थक्यं चापतेत् । पूर्वाधिकरणेनेदमधिकरणं गतार्थं च भवेदिति ।

किञ्च तत्वमसीत्याद्यभेदश्रुतीनामपि नेह नानास्ति किञ्चनेति नेति

नेतीत्यादिश्रुत्या ब्रह्मणि अभेदमात्रनिषेधाय प्रतियोगिभूताभेदप्रसञ्जकत्वापातात् । एवं वायव्यं श्वेतमालभेतेत्यादीनामपि न हिंस्यात्सर्वा भूतानीति निषेधाय प्रतियोगिभूतद्रव्यप्रसञ्जकत्वप्रसङ्गाच्च। तथाच प्रसञ्जकत्वे इदं रजतमिति वाक्यवदप्रामाण्यस्य दुर्वारत्वात् । किञ्च नेह नानेति वाक्येऽपि किञ्चनपदेनैव प्रपञ्चसमर्पणात् तद्विधायकवाक्यानां वैयर्थ्यापातात् ।

अन्यथा न कलञ्जं भक्षयेदित्यत्रापि कलञ्जं भक्षयेदिति वाक्यमपेक्षितं स्यात् ।

नन्वेवमपि रुद्ररोदनादिवाक्ये अत्यन्तासतः रुद्ररोदनस्य प्रतिपादनेन प्रसञ्जकत्वं दृष्टमिति वाच्यम् । रोदनस्य तस्माद् बर्हिषि रजतं न देयमिति स्पष्टनिषेधशेषत्वात् विध्यन्तरानाश्रयणाच्च रोदनरूपविध्यनर्हार्थप्रतिपादकत्वाच्च स्वार्थे तात्पर्यं हित्वा असदर्थावलम्बनेन बर्हिषि रजतदाननिन्दायामेव तात्पर्यावधारणात् नाप्रामाण्यम् । प्रकृते तु अनेकेषां प्रपञ्चप्रतिपादकवाक्यानां प्रसञ्जकत्वेनाप्रामाण्यापेक्षया निषेधवाक्यवत् अज्ञातज्ञापकत्वरूपविधायकत्वस्यैव सुरसत्वात् । अन्यथा निषेधवाक्यस्यापि तन्न स्यात् । विधायकत्वेन तच्छेषत्वाभावाच्च ।

किञ्च नेह नानेति वाक्यस्य जगत्सत्यत्वपरत्वेनापि सुवचत्वात् निषेधपरत्वायोगः । तस्यायमर्थः- विरुद्धार्थको नञ् । चेष्टार्थक ईहाशब्दः । भिन्नार्थको नानाशब्दः । जगत्परः किञ्चनशब्दः । सत्तार्थकोऽस्तिशब्दः। तथा च विरुद्धा चेष्टा यस्य तत् । नेहं च तत् नाना च नेहनाना । विरुद्धचेष्टकमिति यावत् । एवं च विरुद्धचेष्टकं किञ्चन जगदस्तीति ।

अपि च 'यस्मिन् द्यौः पृथिवी चान्तरिक्षम् आकाशमोतं च प्रोतं च । सर्वेषु भूतेष्वेतमेव ब्रह्मेत्याचक्षते। यस्मिन् सर्वाणि । आत्मन्येवात्मानं पश्यति' इत्यादिवाक्यानां बहूनामपि प्रपञ्चविधायकानां सत्वेन तद्विरोधापातात् ।

ननु यस्मिन् द्यौः पृथिवीत्यादिवाक्यानां प्रपञ्चपरत्वे तस्य मिथ्यात्वेनोक्तश्रुतीनामप्रामाण्यापत्त्या न विरोध इति चेन्न। अद्यापि प्रपञ्चमिथ्यात्वासिद्धेः । प्रपञ्चमिथ्यात्वसिद्धौ उक्तश्रुतीनामप्रामाण्यं, तदप्रामाण्यसिद्धौ तन्मिथ्यात्वसिद्धिरिति अन्योन्याश्रयात् ।

किञ्च तवैव श्रुतीनां मिथ्याभूतार्थप्रतिपादकत्वेन शुक्तिरजतप्रत्यक्षवत् अप्रामाण्यापत्तेः दुर्वारत्वात् ।

ननु श्रुत्युपस्थापितार्थानङ्गीकारे हि श्रुतेः प्रामाण्यं न स्यात् । नचास्माभिः श्रुतिप्रतिपादितप्रपञ्चो नाङ्गीक्रियते। किं नामास्माभिरनङ्गीकृतं तत्सत्यत्वमप्रतिपाद्यम् । श्रुतौ सत्यपदाश्रवणादिति चेन्न । स्वगोचरार्थाबाधो हि प्रामाण्यम् । तद्बाधश्चाप्रामाण्यम् । तत्कथं श्रुतिवेद्यार्थस्य बाधे श्रुतेः प्रामाण्यम्? सत्यपदाश्रवणमात्रेण तदनङ्गीकारे नेहनानेति एकमेवाद्वितीयमित्यादौ सत्यपदाभावेन द्वितीयनिषेधेऽपि पारमार्थिकत्वं न स्यात् ।

नन्वेवं श्रुतेः षड्विधतात्पर्यलिङ्गयुक्तत्वात् तदर्थः पारमार्थिक इति चेन्न। उपक्रमादि तु स्वार्थ तात्पर्यं ज्ञापयति । एवं च निषेधश्च अद्वैतं चास्तु तात्पर्यलिङ्गोपेतत्वात् । नतु तत्सत्यत्वम् ।

न च व्यावहारिकजगत्परत्वं निषेधश्रुतिविरोधादिति मन्तव्यम् । तर्हि

निषेधश्रुतेः प्रातिभासिकनिषेधपरत्वमस्तु । विरोधस्याविशेषात् । विरोधपरिहारस्यापि साम्यात् । निषेधत्वेन प्राबल्यमिति चेन्न । भूतले घटोऽस्तीति वाक्यात् घटो नास्तीति वाक्यस्याग्नीषोमीयवाक्यात् न हिंस्यादिति वाक्यस्य षोडशिग्रहणवाक्यात् अग्रहणवाक्यस्य सत्यज्ञानादिवाक्यात् असद्वेति वाक्यस्य च प्राबल्यापत्तेः ।

ननु उत्तरत्र मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यतीत्यत्र भिन्नप्रपञ्चदर्शनानर्थश्रवणात् जगन्मिथ्यैवेति चेन्न । नानेव पश्यतीति वाक्यस्य वस्तुतो भिन्नं प्रपञ्चं भिन्नमिव यः पश्यति स मृत्योस्सकाशान्मृत्युमाप्नोतीत्यर्थपरत्वेनापि वाक्यार्थस्य सुवचत्वात् । त्वत्पक्षे च नानेव पश्यतीत्यत्र इवशब्दवैयर्थ्यापाताच्च । नानाशब्देनैव प्रपञ्चसमर्पणात् । किञ्च

आत्मानं चेद्विजानीयादयमस्मीति पूरुषः ।
किमिच्छन् कस्य कामाय शरीरमनुसञ्ज्वरेत् ।

इति अभेदनिन्दाप्रतिपादकवाक्यविरोधात् ।

(विश्वं सत्यमिति श्रुत्यर्थः)

किञ्च - विश्वं सत्यं मघवाना युवोरिदापश्चन प्रमिनन्ति व्रतं वामिति विश्वसत्यत्वप्रतिपादकश्रुतिविरोधात् नेहनानेति श्रुतेः न तन्मिथ्यात्वपरत्वम् । श्रुतेरयमर्थः - हे मघवानौ इन्द्रौ युवोः युवयोः सम्बन्धि विश्वं सङ्कोचकाभावात् सर्वं सत्यं ब्रह्मवदबाध्यमत एव तादृशविश्वान्तर्गतत्वादेव वां व्रतं कर्मविशेषं आपश्चन अबभिमानिन्यो देवता अपि प्रमिनन्ति प्रमित्या विषयीकुर्वन्तीति ।

ननु हे मघवानौ इन्द्रौ इदं विश्वं सर्वं वां व्रतं सत्यं सफलम् आपश्चन

अबभिमानिन्यो देवता अपि सफलत्वेन जानन्ति । यद्वा- वां व्रतं सत्यं व्यावहारिकं जानन्तीत्यर्थपरत्वेनापि श्रुतेरर्थवत्वसम्भवात् न तद्विरोध इति चेत् अत्र वयं ब्रूमः - श्रुतेः त्वदुक्तप्रथमार्थपरत्वे षड्दोषाः । तथाहि- युवयोरिति पदवैयर्थ्यादाद्यो दोषः । सत्यपदस्य रूढ्यर्थत्यागापत्तिरिति द्वितीयो दोषः । प्रमिनन्तीति पदस्यापि मुख्यार्थहानेः तृतीयो दोषः । सफलत्वेनेत्यध्याहारापत्तिश्चेति चतुर्थः । सत्यपदस्याव्यवहितविश्वपदेनान्वयसम्भवे व्यवहितव्रतपदेनान्वयायोगाच्च पञ्चमो दोषः । विश्वपदस्य जगति प्रयोगबाहुल्यात् सर्वमित्यत्र प्रयोगस्य गौणत्वाच्च षष्ठो दोषः ।

किञ्च वां व्रतं सफलमित्यर्थपरत्वेऽपि प्रपञ्चान्तर्गतव्रतस्य सत्यत्वसिद्धिः सफलत्वरूपार्थक्रियाकारित्वात् । यदर्थक्रियाकारि तत्सत्यमिति व्याप्तेः ।

अपि च वां व्रतं सत्यं व्यावहारिकं सत्यमिति द्वितीयपक्षोऽप्यनुपपन्नः। व्यावहारिकसत्वस्याधुनाप्यसिद्धेः । बाध्यत्वरूपव्यावहारिकत्वपरत्वे श्रुतेरप्रामाण्यापत्तेश्च । प्रमिनन्तीत्यनेन विरोधापाताच्च ।

नन्वेवमपि भवत्पक्षे विश्वं सत्यमित्यनेनैव प्रपञ्चस्य सत्यत्वप्राप्तेः प्रमिनन्तिवाक्यं व्यर्थमापद्यते इति चेन्न। विश्वं सत्यं एतावदुक्ते व्यावहारिकत्वं स्यादिति भ्रान्तिवारणार्थं भवत्सम्बन्धिविश्वसर्जनाख्यव्रतमबभिमानिनो देवाः प्रमिनन्ति प्रमित्या जानन्तीत्यर्थः । अनया उत्तरवाक्यस्य सार्थक्यात् । न हि व्यावहारिकरूपबाध्यस्य प्रमाविषयत्वं सम्भवति ।

केचित्तु- आपश्च अबभिमानिन्यो देवता अपि वां व्रतं न प्रमिनन्तीत्यर्थमाहुः तदज्ञानविजृम्भणम्। वैदिकैश्चनेति निपातत्वेन एकपदाङ्गीकारात्तद्विरोधापत्तेः। अवैदिकव्याख्याया अपहसनीयत्वेन उपेक्षणीयत्वाच्च नेदं व्याख्यानं सतां चेतसि अधिरोहति।

यच्चिकेत सत्यमित्तन्न मोघमिति श्रुतिविरोधाच्च। तस्या अयमर्थः- पूर्ववाक्यगतसुपर्णशब्देन प्रकृतः परमात्मा यच्चकार तत्सत्यमित् सत्यमेव। अत एव न मोघमर्थक्रियाकारीति।

ननु एतद्वाक्यान्न सत्यत्वसिद्धिः। यच्छब्दनिर्दिष्टस्योद्देश्यत्वेन ग्रहं संमार्ष्टीत्यत्र ग्रहैकत्ववत् तन्निष्ठसत्यत्वरूपधर्मस्याविवक्षितत्वात्। तन्न मोघमिति अमोधत्वलक्षणार्थक्रियाकारित्वस्यैव विधेयत्वात् सत्यत्वस्यापि विधाने वाक्यभेदप्रसङ्गादिति। तन्न। सत्यत्वस्य विधेयत्वात् उद्देश्यविशेषणत्वासम्भवात्।

अस्तु वा उद्देश्यविशेषणत्वं तस्य। तथापि 'यस्योभावग्नी अनुगतावभिनिम्लोचेदभ्युदियाद्वा पुनराधेयं तस्य प्रायश्चित्तिः' इत्यत्रोद्देश्याग्निगतद्वित्वस्योद्देश्यविशेषणत्वेऽपि विवक्षावत् प्रकृते उद्देश्यविशेषणत्वेऽपि असतः प्रपञ्चस्य साधकत्वायोगेन विधेयामोघत्वनिर्वाहाय सत्यत्वस्य विवक्षणीयत्वात्।

न च वाक्यभेदापत्तिरुभयोर्विधानादिति शङ्क्यम्। सत्यत्वविशिष्टक्रियाकारित्वस्य विधानात्। विशिष्टविधाने वाक्यभेदाभावात्। अन्यथा यदाग्नेयोऽष्टाकपालोऽमावास्यां पौर्णमास्यां चाच्युतो भवतीत्यत्र वाक्यभेदभिया विशिष्टविधिर्न स्यादिति।

अपि च याथातथ्यतोऽर्थान् व्यदधात् शाश्वतीभ्यस्समाभ्य इति प्रपञ्चसत्यत्वप्रापकश्रुतिवाक्यविरोधाच्च। अस्यायमर्थः- कविर्मनीषीति पूर्ववाक्यप्रतिपन्नः परमात्मा बहुवर्षानन्तरं अर्थान् अबाधितान् चकारेति। न च तथाशब्दस्य सत्यवाचकत्वे न मानमिति शङ्क्यम्। सत्यं तथ्यमृतं सम्यगिति कोशस्यैव प्रमाणत्वात्।

ननु विश्वं सत्यमित्यादिश्रुतीनामनुवादकत्वान्न विरोध इति चेन्न मानान्तरप्राप्तस्यैवानुवादकत्वात्। तत्प्राप्तौ च प्रमाणाभावात्। अन्यथा पृथिवी इतरेभ्यो भिद्यते, न हिंस्यात्सर्वा भूतानीत्यत्रापि सिद्धसाधनं स्यादिति। ननु दृष्टान्ते पृथिवीत्वं हिंसात्वं चैकोऽनुगतो धर्मः इति तदवच्छेदेन विधेयस्याप्राप्तत्वेन तत्र अननुवादकत्वमुचितम्। इह तु विश्वत्वं नाम नैको धर्मोऽस्ति। किन्तु विश्वशब्दः सर्वनामत्वात् तेन तेन रूपेण घटपटादीनामुपस्थापकः। तेषु च प्रत्येकं सत्यत्वं गृहीतमेवेति कथं नानुवादकत्वं प्रकारवैलक्षण्याभावादिति चेत्। अत्र ब्रूमः- सर्वनामपदेषु तदादिषु प्रकृतानां तत्तद्रूपेणोपस्थापकत्वेऽपि जगदादिशब्दानामतथात्वस्यानुभवसिद्धत्वेन घटत्वादिप्रकारभिन्नप्रकारेण जगत्सत्यत्वस्य विश्वं सत्यमित्यादिना बोधनात्।

अथ सन् घट इत्यादिप्रत्यक्षेण प्राप्तिर्भविष्यतीति चेत् तत् किं त्वद्रीत्या उत न्यायरीत्या आहोस्विदस्मद्रीत्या। नाद्यः- त्वन्मते सन् घटः सन् पट इत्यत्र सद्रूपब्रह्मण एव भानात् नानुवादकता। वैपरीत्येन सत्यं ज्ञानमनन्तं ब्रह्मेति ब्रह्मप्रापकवाक्यानामेवानुवादकत्वापाताच्च। सन् घट इत्यादिप्रत्यक्षेणैव ब्रह्मणः प्राप्तत्वात्। 'सर्वप्रत्ययवेद्ये च ब्रह्मरूपे व्यवस्थिते' इति सर्वप्रत्ययवेद्यत्वेन प्राप्तिसम्भवाच्च। नापि वाचस्पतिरीत्या प्रत्यक्षं

व्यावहारिकसत्तापरमिति । व्यावहारिकसत्तापरत्वस्यान्योन्याश्रयात् । तथाहि- नेह नानेति श्रुतेः पारमार्थिकसत्तानिषेधपरत्वे सिद्धे तद्विरोधाभावात् विश्वमिति श्रुतेः व्यावहारिकसत्तापरत्वसिद्धिः । तत्सिद्धौ तद्विरोधाभावेन नेहनानेति श्रुतेः पारमार्थिकसत्तानिषेधपरत्वसिद्धिरिति। असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् इति स्मृतिविरोधाच्च। न द्वितीयः । उक्तप्रत्यक्षेण सत्ताजातेरेव प्राप्तत्वात् । सत्यत्वं सत्ताजातिः, सत्तयैव सत्यमिति चेत् समवायादिषु सत्ताया अभावात् तेषां सत्यत्वानापातः । अध्यक्षेण समवायादिपदार्थानां सत्यत्वाग्रहे तदादाय विश्वं सत्यमित्यादि वाक्यानामनुवादकत्वासिध्या विधायकत्वापत्तेश्च। न तृतीयः। वर्तमानमात्रग्राहिप्रत्यक्षेण त्रिकालाबाध्यत्वरूपसत्यत्वाग्रहात्। अतीतानागतातीन्द्रियधर्माधर्मादिसकलपदार्थानां सत्यत्वस्याध्यक्षेणाप्राप्तत्वाच्च नानुवादकतेति ।

प्रत्युत विश्वं सत्यमित्यादिश्रुत्या त्रैकालिकनिषेधाप्रतियोगित्वरूपसत्यत्वविधात्र्या निषेधाय त्रैकालिकनिषेधप्रतियोगित्वरूपमिथ्यात्वानुवादिनी नेह नानेति श्रुतिः किं न स्यात्। नच मिथ्यात्वस्याप्राप्तिरिति शङ्क्यम् । श्रुत्यर्थापरिज्ञानात् दुःशास्त्रपरम्परया वा कुमतपरम्परया वा प्राप्तिसम्भवात् । अस्ति हि श्रुत्यर्थापरिज्ञानात् प्राप्तम्

'इष्टापूर्तं मन्यमाना वरिष्ठं नान्यच्छ्रेयो वेदयन्ते प्रमूढाः ।
ते पुण्यमासाद्य सुरेन्द्रलोकं क्षीणे पुण्ये मर्त्यलोकं विशन्ति ॥'

इति श्रुत्यन्तरेण इष्टापूर्तयोः परमपुरुषार्थसाधनत्वं निषिध्यत इति । अस्ति च कुमतप्राप्तस्यासतः कारणत्वस्य निषेधः-'तस्मादसतः सज्जायत

इति । कुतस्तु खलु सोम्यैवं स्यादिति होवाच । कथमसतः सज्जायेत' इत्यादिः ।

ननु तर्हि नेह नानेति श्रुतेः कोऽर्थ इति चेत् अवेहि पूर्वमेव उक्तश्रुतेर्व्याख्यातत्वात् ।

यद्वा- किञ्चन विश्वं नाना नास्तीत्यविनाभूतमस्तीत्येवार्थः। नानाशब्दो हि विनेत्यर्थे वर्तते ।

'पृथग्विनान्तरेणर्ते हिरुङ्नाना च वर्जने',

इत्यमरोक्तेः ।

नाना विष्णुं मोक्षदो नास्ति देवः ॥

इत्यमरव्याख्यायां नानाशब्दस्य विनार्थत्वेनोदाहृतत्वाच्च । न च जगद् ब्रह्माविनाभूतम् इत्यत्र न मानमिति शङ्क्यम् ।

न तदस्ति विना यस्मान्मया भूतं चराचरम् ।

इति स्मृतेरेव प्रमाणत्वात् ।

न च नानाशब्दस्य सम्बन्धिशब्दतया सम्बन्धिनोऽभावात् कथं विनार्थकत्वमिति वाच्यम् । इहशब्दार्थब्रह्मण एव प्रतिसम्बन्धित्वेनान्वयसम्भवात् । वन्हिं विना धूमो नास्तीत्यादिवत् ब्रह्माविनाभूतं जगदस्तीत्येवार्थसिद्धिः । नतु मिथ्यात्वलाभः ।

ननु ब्रह्मणः इहेति सप्तम्यन्तविरुद्धविभक्त्यवरुद्धत्वेन कथं द्वितीयान्तत्वेनोपस्थितिरिति चेन्न । अन्यत्र धर्मादन्यत्राधर्मादित्यत्र अन्यशब्दस्येव सुपांसुलुगिति सूत्रेण इहेत्यत्रापि सप्तम्याः द्वितीयार्थत्वोपपत्या

विरुद्धविभक्त्यवरुद्धत्वाभावात्। त्वत्पक्षे नानेति वैयर्थ्यात्, आनर्थक्य-प्रतिहतानां विपरीतं बलाबलम् इति न्यायेन उक्तार्थस्यैवानुसरणीयत्वे सुरसत्वात्।

किञ्च 'ते निचिक्युर्ब्रह्म पुराणमग्र्यम्। मनसैवानुद्रष्टव्यम्' इति अव्यव-हितपूर्ववाक्ये ब्रह्मपदश्रवणात् तदुपात्तब्रह्मण एव प्रतियोगित्वेनान्वये दोषगन्धाभावात् तेन वाक्येन न मिथ्यात्वसिद्धिः। अथवा पूर्वं 'तस्मिन् शुक्लमुत नीलमाहुः' इत्यत्र भगवद्रूपाणां भेदस्य प्रसक्तत्वात् तद्भेदोऽत्र निषिध्यत इति। एतद्विस्तरस्तु न्यायामृतादौ स्पष्ट इति सङ्कोचेनात्रा-लिखम्।

तस्मान्नेयं श्रुतिः तन्मिथ्यात्वपरा।

(एकमेवेति श्रुतेः मिथ्यात्वपरत्वायोगः)

नापि सदेव सोम्येदमग्र आसीत् एकमेवाद्वितीयमिति श्रुतिः तन्मिथ्यात्वे मानम्। कालप्रापकेण पूर्वेणाग्रपदेन, तदैक्षत नामरूपे व्याकरोत् इति ईक्षणनामरूपात्मकप्रपञ्चप्रापकेणोत्तरेण च द्वैतवाक्येन विरोधात्।

न चाविरोधाय द्वैतवाक्यस्य लक्षणया अद्वैतपरत्वं वा अतात्त्विक-विषयत्वेन व्यवस्था वा तद्विरोधेनाप्रामाण्यं वास्त्विति न विरोध इति वाच्यम्। द्वैतश्रुतिविरोधेन वैपरीत्यस्यापि सुवचत्वात्।

ननु अपच्छेदन्यायेन परप्राबल्यात्पूर्वस्य द्वैतवाक्यस्य बाधान्न तद्विरोध इति चेन्न, तथापि प्रबलस्याबाधात् पूर्वस्योपक्रमाधिकरणन्यायेन अनुप-सञ्जातविरोधित्वादिना प्राबल्याच्च। न च वाच्यं तदैक्षतेति वाक्यमनु-वादकमिति। सृष्टिकालेक्षणनामरूपव्याकर्तृत्वादिकस्य मानान्तराप्राप्त-

त्वात्। किञ्च उपांशुयाजवाक्यमध्यस्थविष्ण्वादिवाक्यवत् पूर्वोत्तर-द्वैतवाक्यानुसारेण अद्वैतवाक्यस्य नेयत्वाच्च।

किञ्च अद्वितीयशब्देन द्वितीयप्रागभाव उच्यते। उत ध्वंसः। आहो-स्वित्तदत्यन्ताभावः। नाद्यः- प्रपञ्चस्य प्रागभावप्रतियोगित्वसिद्ध्या त्रैकालिकनिषेधप्रतियोगित्वरूपमिथ्यात्वासिद्धेः। त्वन्मते अविद्याकर्मादेः तदा सत्वाच्च। न द्वितीयः। ध्वंसप्रतियोगित्वरूपानित्यत्वप्राप्त्या तन्मिथ्यात्वासिद्धेः। प्रपञ्चान्तःपात्याकाशादेः

'आकाशवत् सर्वगतश्च नित्यः'

इत्यादिश्रुत्या नित्यत्वेन तद्विरोधः स्यात्। नापि चरमः। सदेव सोम्येदमग्र आसीत् इत्यत्र सदेवासीदिति सदभेदेन सत्वमादाय पुनरद्वितीयपदेन तन्निषेधे व्याघातात्। कालप्रापकाग्रपदेन तदैक्षत नामरूपे व्याकरोदिति उत्तरेण च विरोधात्। सद्व्यतिरेकेण नासीदित्युक्तौ तु स्वर्गी ध्वस्त इतिवत् सविशेषणे हीति न्यायेनोक्तरीत्या प्रपञ्चस्यापि सत्वसिद्ध्या तन्निषेधायोगात्। सद्व्यतिरिक्तत्वरूपविशेषणनिषेधेन तदभिन्नत्वापा-ताच्च। अग्रपदवैयर्थ्याच्च। अद्वितीयमित्यत्र द्वितीयाभावस्य सत्वासत्वाभ्यां व्याघाताच्च। तथाहि- द्वितीयाभावस्य सत्वस्य असत्वस्य च द्वितीयत्वेन द्वितीयमात्राभावासिद्धिः। सघटं भूतलमितिवत् द्वितीयाभावेनैव सद्वितीयत्वापाताच्च। तस्यापि निषेधे व्याघातात्।

(द्वितीयाभावस्य सत्यत्वायोगः)

ननु द्वितीयाभावस्य ब्रह्मस्वरूपत्वेन न सद्वितीयत्वापत्तिरिति चेत् अज्ञानविजृम्भितमेतत्। तथात्वे प्रातिभासिकातिरिक्ततात्त्विकाभावा-

प्रतियोगिनः द्वैतस्य तात्विकत्वापातात्। द्वैतप्रपञ्चभ्रमार्थं अधिष्ठान-ब्रह्मस्फुरणावश्यकतया ब्रह्माभिन्नद्वैताभावस्यापि प्रकाशे द्वैतरूपप्रपञ्च-भ्रमासम्भवाच्च।

न च चरमवृत्तेरेवाविद्याभ्रमविरोधित्वाङ्गीकारात् साक्षिप्रकाशस्य भ्रमाविरोधित्वेन सत्यपि ब्रह्मस्फुरणे प्रपञ्चभ्रमः स्यादेवेति शङ्क्यम्। साक्षिणः स्वसमानविषयकाज्ञानभ्रमाविरोधित्वे ज्ञानत्वमेव न स्यात्। तद्विरोधिन एव ज्ञानत्वात्।

वृत्तेरेवाज्ञानविरोधित्वमिति तदप्यसङ्गतम्। तथाहि किं वृत्ति-सामान्यस्याज्ञानविरोधित्वम् उत वृत्तिविशेषस्य। आद्ये- किं परोक्षवृत्तेरुत अपरोक्षवृत्तेः। न प्रथमः - त्वन्मते नित्यातीन्द्रिये आकाशादिष्वपि परोक्षवृत्तौ सत्यामपि तदनिवृत्तेः। नान्त्यः- त्वन्मते अयं घट इत्याद्य-परोक्षवृत्तेरपि घटाद्यवच्छिन्नचिद्विषयत्वात् साच इदानीमस्तीति तथापि तदनिवृत्तेः। न द्वितीयः - वेदान्तजन्यसंस्कारवासितान्तःकरण-वृत्तिनाश्यत्वस्य मिथ्यारजतादौ अदर्शनात् सत्ये भ्रमरादिध्यान-निवर्त्यकीटत्वादौ दर्शनादज्ञानमपि अधिष्ठानसमसत्ताकं स्यात्।

किञ्च अभावस्य ब्रह्मरूपत्वे ब्रह्मणः स्वतः सिद्धत्वेन द्वितीयाभाव-बोधकवाक्यवैयर्थ्यं स्यात्। अभावत्वेन तद्बोधने अखण्डार्थत्वहानेः।

अपि च द्वैताभावस्य प्रतियोगिघटितत्वेन सोपाधिकत्वात् पर-मात्मनो निरुपाधिकत्वात् विरुद्धधर्माधिकरणत्वेन द्वैताभावब्रह्मणो-रैक्यानुपपत्तेः।

अत्र केचित् नवीनाः - प्रतियोगिनो द्वैताभावरूपनिषेधोपलक्षणतया,

द्वैताभावस्य परमात्मस्वरूपत्वमस्त्विति। तन्मन्दम्। एवं तर्हि सार्वज्ञ-सर्वकर्तृत्वादीनामपि सोपाधित्वेऽप्युक्तन्यायेन ब्रह्मस्वरूपत्वोपपत्तौ यः सर्वज्ञः सर्वविदित्यादिवाक्यानामपि सत्यज्ञानादिवाक्यवत् तत्वावेदकत्वं स्यात्। न स्याच्च सत्यादिवाक्यानां तत्वावेदकत्वम्। अखण्डार्थत्व-हानेः। किञ्च उक्तनिषेधः स्वरूपेण उत पारमार्थिकत्वाकारेण। नाद्यः-द्वैतरूपप्रपञ्चस्यासत्वापातात्। न हि उक्तात्यन्ताभावप्रतियोगित्वापेक्ष-यान्यदसत्वमस्ति। नान्त्यः। निराकारस्य ब्रह्मणो मिथ्यात्वं स्यात्। तस्याप्युक्तनिषेधस्य सत्वात्। प्रसज्यप्रतिषेधार्थकत्वेनात्यन्ताभावपक्षे वाक्यभेदात्। द्वितीयादन्यदद्वितीयमिति नञ्तत्पुरुषपक्षे अनपुंसकस्ये-त्यादाविव नार्षेयं वृणीत इत्यादाविव पर्युदासार्थत्वेन एकवाक्यत्व-सम्भवाच्च।

ननु अभावधर्मा नाद्वैतं निघ्नन्तीति मण्डनरीत्या अभावोऽतिरिक्त एव। न च तेन सद्वितीयत्वापत्तिरिति मन्तव्यम्। इष्टापत्तेः। भावद्वितीय-स्यैवानङ्गीकारादिति चेन्न। अभावोऽतिरिक्त इति कोऽभिप्रायः। किम-भावशब्देन व्यवहारालम्बनत्वमात्रं विवक्षितम्। उत सप्तमः पदार्थः। अत्रापि अन्योन्याभावो वा प्रागभावो वा ध्वंसो वात्यन्ताभावो वेति। नाद्यः- भावस्य घटादेरपि स्वाभावाभावत्वात्। द्वितीयेऽपि न प्रथमः। अभेदस्याप्यन्योन्याभाव प्रतियोगित्वेन तत्सत्वासिद्धेः। पारमार्थिका-भावप्रतियोगित्वस्यैव मिथ्यात्वे तन्त्रत्वात्। भेदस्याप्यन्योन्याभावत्वेन तत्सत्वापाताच्च। न द्वितीयतृतीयौ। ध्वंसादेः प्रतियोगिना सह विरोधाय स्वतुल्यसत्वप्रतियोगिसत्वसापेक्षत्वात् प्रतियोगिनो घटादेरपि सत्वं स्यात्। न तुरीयः। तस्याप्यत्यन्ताभावस्य ब्रह्मवत् सत्वेन तत्रापि

दृश्यत्वादि हेतोर्व्यभिचारापातात् । अदृश्यत्वे च तस्य, एकमेव नेह नानेति श्रुत्या तदबोधप्रसङ्गात् । न चेष्टापत्तिः तासां वैयर्थ्यापातात् ।

अपि च अभावत्वादेस्तदाश्रये चाभावाश्रयत्वादेर्भावस्य धर्मस्यावश्यकत्वात् तस्यापि सत्वसिद्धेः । न चाभावत्वादेरभावस्वरूपत्वात् अभावाश्रयत्वादेश्चाधिकरण ब्रह्मस्वरूपत्वान्नोक्तातिप्रसङ्ग इति मन्तव्यम् । सोपाधिकनिरुपाधिकयोः ऐक्यायोगादिति प्रागेवोक्तत्वात् । स्वतुल्यसत्ताकाभावरूपप्रवृत्तिनिमित्तसम्भवेन ब्रह्मणोऽपि सद्वितीयादिपदवाच्यत्वापाताच्च । अखण्डार्थेन वेदान्तेन ब्रह्माभावयोर्द्वयोरपि असिद्धेश्च । अन्यस्य तत्वावेदकस्याभावात् ।

किञ्च अद्वितीयपदेन द्वितीयमात्राभावोक्तौ एकमेवेत्यत्र एकपदं व्यर्थमापद्येत।

वृक्षस्य स्वगतो भेदः पत्रपुष्पफलादितः ।
वृक्षान्तरात्सजातीयो विजातीयः शिलादितः ।
तथा सद्वस्तुनो भेदत्रयं प्राप्तं निवार्यते ।
ऐक्यावधारणद्वैतप्रतिषेधैस्त्रिभिः क्रमात् ।

इति स्वाचार्यवचनानुरोधात् भेदविशेषनिषेधपरत्वोक्तौ

'न त्वत्समश्चाभ्यधिकश्च दृश्यते ।'
'न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यः ।'

इत्यादि श्रुतिस्मृत्यनुसारात् समाभ्यधिकनिषेधपरत्वं किं न स्यात् ।

किञ्च सामान्यनिषेधस्य विशेषपरत्वे प्रमाणाभावात् त्वदभिमताचार्यवचनस्य सर्वासंमतत्वाच्च । बहुलनिरवकाशषड्विधतात्पर्यलिङ्गोपेतद्वासुपर्णेत्यादिश्रुतिविरोधाच्च ।

अपि च न द्वितीयमद्वितीयमिति तत्पुरुषोऽस्तु। नञः अन्योन्याभाव एवार्थः किं न स्यात् ।

न च नञः संसर्गाभावपरत्वमेव, नतु अन्योन्याभावपरत्वमिति शङ्क्यम् । नञः शक्यतावच्छेदकं न ससंर्गाभावत्वं किन्तु अभावत्वमेव लाघवात् । अन्यथा स्तम्भः पिशाचो न, नाहमीश्वरः न जडमित्यत्रापि अनुभवसिद्धा अन्योन्याभावप्रतीतिर्न स्यात् । नापि बहुव्रीहिः । वाक्यभेदापत्तेः । न विद्यते द्वितीयं यस्य तत्तथोक्तमिति बहुव्रीहौ क्रियान्वितस्य नञः प्रसज्यप्रतिषेधार्थकत्वावश्यम्भावात् । किन्तु अकामेनापि नञ्तत्पुरुष एवाश्रयणीयः द्वितीयादन्यदद्वितीयमिति । तथाच तवेष्टसिद्धिः कथं स्यात् ।

ननु तर्हि श्रुतेः कोऽर्थ इति चेत् अवेहि। एकं एकत्वादिगुणविशिष्टम् । यद्वा- मुख्यं स्वतन्त्रमिति यावत् । यद्वा अन्यत् । 'एके मुख्यान्यकेवलाः' इत्यमरोक्तेः । एवशब्दः पार्थ एव धनुर्धर इतिवत् अन्ययोगव्यवच्छेदार्थः । अद्वितीयशब्दश्च समाभ्यधिकरहितपरः ।

एक एवाद्वितीयोऽसावश्वमेधः क्रतुष्वपि ।
एक एवाद्वितीयोऽसौ प्रणवो मन्त्र उच्यते ।

इति वैदिकप्रयोगात् । यद्वा असहायवाची असिद्वितीयोऽनुससार पाण्डवम् इति प्रयोगात् । एवं च एकमेव सगुणमेव ब्रह्म अद्वितीयं समाभ्यधिकरहितमिति श्रुत्यर्थः ।

अपि च 'सलिल एको द्रष्टाद्वैतो भवत्येष ब्रह्मलोकः सम्राडिति होवाच' इति भेदप्रतिपादकसमाख्याश्रुतिविरोधः स्यात्। न च तस्यापि अद्वैतपरत्वं किं न स्यादिति शङ्क्यम्। जलप्रापकसलिलादिपदेन 'उत्तरेण एषास्य परमा गतिः। एषास्य परमा सम्पत्। एषोऽस्य परमानन्दः। एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीति जीवेश्वरभेदप्रतिपादकेन च विरोधात्। तस्मान्नेयं श्रुतिः तत्र मानम्।

(वाचारम्भणश्रुत्यर्थः)

नन्वेवमपि 'वाचारम्भणं विकारो नामधेयम्' इति श्रुतिस्तत्र प्रमाणमिति चेन्न। वाचारम्भणशब्दस्य मिथ्यात्वे योगरूढ्योरभावात्।

नच आरभ्यत इति आरम्भणमिति योगः स्यादिति शङ्क्यम्। योगेऽपि कर्तृकर्मणोः कृति इति कृद्योगे तृतीया न स्यात्। अथ करणे तृतीया कुतो न भवेदिति चेन्न । वाचारब्धकाव्यादेरिव मिथ्यात्वलाभो न स्यात्। वागालम्बनमात्रमिति व्याख्यायामश्रुतकल्पना भवेत्। अक्षरसाम्येन निर्वचनेऽपि मात्रशब्दाश्रवणात्। त्वया नामधेयमित्यस्यापि नाममात्रं ह्येतदिति व्याख्यानात् पौनरुक्त्यं स्यादिति।

मृत्तिकेतीत्यत्रार्थविवक्षायाम् इतिशब्दवैयर्थ्यापाताच्च। पदार्थविपर्यासे खल्वत्रेतिशब्दः। नचात्र इतिशब्दः प्रकारार्थः इति मन्तव्यम्। प्रकारस्यानुपादानादिति।

किञ्च उपादानब्रह्मसत्तातिरेकेण उपादेयप्रपञ्चसत्तामनङ्गीकुर्वतस्तव मते यथा सोम्येत्यादयः दृष्टान्ताः किं परिणाम्युपादाने उत उपादानत्वमात्रे, आहोस्वित् विवर्तत्वे। नाद्यः। ब्रह्मणोऽपि विकारित्वं स्यात्।

न च इष्टापत्तिस्तथासति निर्विकारोऽक्षरः शुद्ध इति श्रुतिविरोधो भवेत्।

न च ब्रह्म अविद्याविशिष्टमुपादानमिति न श्रुतिविरोध इति वाच्यम्। त्वया शुद्धब्रह्मज्ञानेनैव सर्वविज्ञानस्य प्रतिज्ञानात् तद्विरोधः स्यादिति। यदि विशिष्टज्ञानेन सर्वविज्ञानं प्रतिज्ञातं तदा अनाद्यविद्यादीन् प्रति उपादानत्वायोगेन ब्रह्मज्ञानेनाविद्यादेः ज्ञानं न स्यात्।

न द्वितीयः - मृदा ज्ञातया मृण्मयं विज्ञातं स्यादिति तावतैव पूर्णत्वेन यथा सोम्यैकेन मृत्पिण्डेन मृण्मयं विज्ञातं स्यात्, यथा सोम्यैकेन लोहमणिना सर्वं लोहमयं विज्ञातं स्यात्, यथा सोम्यैकेन नखनिकृन्तनेन सर्वं कालायसं विज्ञातं स्यादिति मृत्पिण्डादिवाक्यत्रये प्रत्येकं श्रुतानामेकशब्दपिण्डशब्दसर्वशब्दानां निष्प्रयोजनत्वविरुद्धार्थत्वरूपवैयर्थ्यं स्यात्। न हि सर्वं मृण्मयादिकं एकमृत्पिण्डादिविकारः। नखनिकृन्तनस्यान्त्यावयवित्वेन उपादानत्वस्यैवासम्भवाच्च। वाचो घटपटादीनामुपादानत्वस्य कथञ्चिदपि असम्भवाच्च।

न तृतीयः- मृद्धटयोः सत्वसाम्यात् मृत्तिकेत्येव सत्यमिति विशिष्य मृत्तिकासत्यत्वोक्तिरनुपपन्ना स्यात्।

किञ्च रूप्यादौ शुक्तिज्ञानेन तज्ज्ञानादर्शनात् मृत्त्वज्ञानेऽपि घटादिज्ञानं न स्यात्।

अपि च कथं विवर्तपक्षे मृत्पिण्डमृण्मयादिदृष्टान्ताः? दृष्टान्तस्य मृण्मयादेः मृदाद्युपादानकत्वेन तद्विवर्तत्वाभावात्।

किञ्च नखनिकृन्तनस्यान्त्यावयवित्वेन कार्ष्णायसम्प्रति उपादानत्वा-

भावात् । यथा सोम्येत्यादिषु दृष्टान्ततया कथितानां मृत्पिण्डादीनां घटादिकं प्रति विवर्तोपादानत्वासम्भवाच्च ।

वाचस्पतिस्तु- शुक्तौ ज्ञातायां रूप्यं तत्वतो ज्ञातं भवति । सा हि तस्य तत्वं ज्ञेयम् । ब्रह्मज्ञानात् सर्वं तत्वतो ज्ञातं भवतीत्याह । स स्थूलदृश्वा । प्रपञ्चतत्वस्य ब्रह्मरूपत्वात् ब्रह्मज्ञाने ब्रह्मैव ज्ञातं भवतीति स्यात् । ब्रह्मज्ञानस्य ब्रह्मज्ञानं प्रति कारणत्वं भवेत् । येनाश्रुतं श्रुतं भवतीत्यत्र अश्रुतादिपदानां वैयर्थ्यापाताच्च ।

किञ्च असाधारणस्वरूपं असाधारणधर्मो वा तत्वम् । नच शुक्तिज्ञाननिवर्त्यस्य रूप्यस्य शुक्तिः स्वरूपं धर्मो वा। अपि च शुक्तौ रूप्यधीः आनन्दादौ ब्रह्मधीः प्रमा स्यात् । तत्वतत्विनोरभेदात् । न च घट घटत्वादौ व्यभिचारः । तस्य सपक्षत्वात् । किञ्च कार्यकारणभावश्च कथं घटेत तस्य पूर्वपश्चाद्भाव घटितत्वात् ।

अपि च शुक्त्यवच्छिन्नसत्तैव रजतावच्छिन्नसत्तेत्येकसत्तावादिनोऽपि पृथक् रजतस्वरूपानभ्युपगमे सत्तां किमवच्छिन्द्यात् । रजतादिप्रत्ययश्च किंविषयकः स्यात् ।

किञ्चास्तु सत्तैक्यम् । तथापि तार्किकमत इव भेदावश्यम्भावात् ।

वस्तुतस्तु सत्ताभावे पृथक् स्वरूपं कथं घटेत। अन्यथा शशशृङ्गस्यापि स्वरूपं कुतो न भवेत् । असत्ताऽविशेषात् । तथाच पृथक् स्वरूपाङ्गीकारे स्वरूपात्मिकायाः सत्तायाः अनिवार्यत्वमेव । स्वरूपसत्वेऽपि अतिरिक्तसत्ताभावादेव मिथ्यात्वे ब्रह्मणो मिथ्यात्वं स्यात् ।

किञ्च प्रपञ्चस्य मिथ्यात्वे ब्रह्मज्ञानात् जडादिज्ञानं तव कथं भवेत् ।

त्वया जडभेदस्याङ्गीकारात् । ब्रह्मसत्तैव तत्तदवच्छिन्ना सर्वं निर्वहेदिति चेत् एवं कथनेऽपि स्वरूपपार्थक्यस्य दुर्निवारत्वात् । अन्यथा सा केनावच्छिद्येत ।

किञ्च परमते येनाश्रुतमित्यत्र येनेति तृतीयाश्रुतिर्विरुध्येत। तस्याः सूक्तवाकाधिकरणन्यायेन प्रबलकारकविभक्तित्वस्याश्रयणीयत्वात् । ब्रह्मणः सर्वात्मकत्वेन ब्रह्मज्ञानात् सर्वज्ञानमिति वदतः ब्रह्मज्ञानजन्यत्वं सर्वज्ञानस्य कथं घटेत। तथाच नेयं श्रुतिरपि तत्र प्रमाणम् ।

(तत्त्वमसि श्रुत्यर्थः)

न चैवमपि तत्वमसीति श्रुतेरभेदे मानत्वेन तद्विरोधात् जीवेश्वरभेदप्रतिपादकानां वाक्यानां भेदे कथं तात्पर्यमिति चेत् तत्त्वंपदयोः शोधितचिन्मात्रे लक्षणामङ्गीकृत्य तदभेदोऽनेन वाक्येन प्रत्याय्यत इत्यङ्गीकारो न युक्तः । तथा सति त्वन्मते बाधायां सामानाधिकरण्यात् पदद्वयलक्षणा स्यात् । मुख्यार्थत्यागापत्तेश्च ।

ननु त्वन्मतेऽपि तत्सहचरितत्वादौ लक्षणादोषस्समान इति चेन्न । तावके मते पदद्वयलक्षणा । ततो वरं मत्पक्षे एकपदलक्षणा । अत एव दशमे रथघोषेण माहेन्द्रस्तोत्रमुपाकरोतीत्यत्र रथश्च घोषश्च तेन रथघोषेणेति द्वन्द्व उत रथस्य घोष इति षष्ठीतत्पुरुषो वेति सन्देहे षष्ठीतत्पुरुषस्य पूर्वपदे लाक्षणिकत्वेन द्वन्द्वसमास एवेति पूर्वपक्षे प्राप्ते इतरेतरद्वन्द्वस्य द्विवचनाभावात् समाहारद्वन्द्वस्य पदद्वयलाक्षणिकत्वेन षष्ठीतत्पुरुषापेक्षया गुरुत्वात् षष्ठीतत्पुरुष एवाङ्गीक्रियते इति रथघोष एव मन्त्रस्य निवर्तकः इति सिद्धान्तितम् । अत एव नवमे- यावत्या

वाचा कामयीत तावत्या दीक्षणीयायामनुब्रूयादित्यत्र विधीयमानस्वर-विशेषः फलवत्परमापूर्वार्थ एव । न तु दीक्षणीयावान्तरापूर्वसाधनार्थ इति प्राप्ते स्वापूर्वं लक्षयित्वा तद्वारा परमापूर्वे लक्ष्यमाणे लक्षणाद्वयं स्यात् । स्वापूर्वे लक्ष्यमाणे तु एका लक्षणेति, परम्परया सफलत्वाच्च दीक्षणीयापूर्वार्थत्वमिति निश्चितम् ।

तस्मात् तत्पद एव एकस्मिन् लक्षणामङ्गीकृत्य वाक्यार्थवर्णनस्य स्वरसत्वात् । तथाहि- त्वं तत्सहचरितोऽसि। तत्साहचर्यात्ताच्छब्द्यम् । वसन्तसहचरितमध्ययनं वसन्ताध्ययनमिति महाभाष्योक्तेः । प्रसिद्धं च जीवस्य ब्रह्मसहचरितत्वं द्वा सुपर्णा सयुजेत्यादौ । यद्वा- ब्राह्मणोऽस्य मुखमासीदित्यादिवत् तज्जन्यत्वमादाय तदिति त्वंपदार्थो व्यपदिश्यते। एतस्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतान्यपि उच्चरन्तीति श्रुतेः । आत्मन आकाशस्सम्भूतः इत्यादि श्रुतेश्च । अथवा त्वं सिंहोऽसि तत्सदृशोसीति गौणव्यवहारमादायापि वाक्यार्थवर्णन-सम्भवात्। सप्तसु प्रथमेति त्वं तस्मिन्नसीति वार्थः। सदायतनाः सत्प्रतिष्ठा इति श्रुतेः । तस्मात् भेदपरत्व एव स्वारस्यम् ।

किञ्च अभेदपरत्वे आद्ये खण्डे स यथा शकुनिः सूत्रेण प्रबद्धो दिशंदिशं पतित्वेत्यादिनोक्तयोः शकुनिसूत्रयोः, षष्ठे लवणमेतदुदक इत्यादि-नोक्तयोर्लवणोदकयोः, सप्तमे यथा सोम्य पुरुषं गन्धारेभ्य इत्यादिनोक्तयोः पुरुषगन्धारदेशयोः, नवमे अपहार्षीत् स्तेयमकार्षीत् इत्यादिनोक्तयोः स्तेनापहार्ययोश्चैक्यासम्भवात् स्पष्टमत्र दृष्टान्ते भेदकथनात्तद्विरोधः स्यात् ।

अपि च भेद एव षड्विधतात्पर्यलिङ्गसत्वात् भेदपरत्व एव स्वार-

स्यम् । तथाहि- एकमेवाद्वितीयमिति समाभ्यधिकराहित्यस्योपक्रमात्, ऐतदात्म्यमिति एष चासौ आत्मा च एतदात्मा तस्येदमिति तस्यैवोप-संहारात्, तत्वमसीति नवकृत्वोऽभ्यासात्, शास्त्रगम्येश्वरभेदस्या-प्रसक्त्याऽपूर्वत्वात्, अथ सम्पत्स्यत इति फलश्रवणात्, येनाश्रुतं श्रुतं भवतीत्याद्यर्थवादात्, शकुनिसूत्रादिदृष्टान्तैरुपपादनादुपपत्तेः ।

ननु आद्ये खण्डे स्वमपीतो भवतीत्यत्र स्वमपीतो भवतीति स्पष्टम् अभेदो भासते कथं तत्र भेद इति चेन्न। स्वशब्दो भगवत्पर एव।

स्वातन्त्र्यात् स्व इति प्रोक्तः आत्मा चैवाततत्वतः ।
ब्रह्मायं गुणपूर्णत्वाद् भगवान्विष्णुरव्ययः ।

इति श्रुतेः । तथाच परमात्मानं तिरोहितस्सन् प्राप्तो भवतीत्यर्थः । न त्वभिन्न इति । अपेः अपिधाने इणश्च गतौ निष्ठायाश्च कर्तरि क्तः इति क्लृप्तत्वात् । ऐक्ये योगरूढ्योरभावाच्च । अपीत इत्यस्य भवतेश्चा-कर्मकत्वेन श्रुतद्वितीयाऽयोगाच्च । अश्रुततृतीयाकल्पनाप्रसङ्गाच्च ।

यथास्मिन्नाकाशे श्येनो वा सुपर्णो वेति सुषुप्तिविषये भिन्नश्येननीड-दृष्टान्तोक्तेः । प्राज्ञेनात्मना सम्परिष्वक्त इति भेदश्रुतेश्च ।

द्वितीये खण्डे च नानावृक्षाणां रसानां मधूनां नैक्यम् । किन्तु तन्तव इव पटम् अन्योन्यं भिन्ना एव प्रागसिद्धं मधु उत्पादयन्ति । अन्यथा दार्ष्टान्तिके सति सम्पद्य न विदुः सति सम्पत्स्यामह इति त इह व्याघ्रो वेति सतो भेदस्याज्ञानेनैवानर्थो न श्रूयेत ।

तृतीये इमाः सोम्य नद्य इत्यादिनोक्तयोः नदीसमुद्रयोश्च नैक्यम् । किन्तु भेद एव। प्राक् भिन्नानां पश्चादैक्यायोगात् । नदीनां सप्तानां

मिश्रभूतानामपि पुनर्वियुज्य समुद्रगमनाच्च । तादृगेव भवतीति सावधारणश्रुतिविरोधाच्च। यतो वृद्धिः प्रदृश्यत इति सयुक्तिकस्मृति-विरोधाच्च। भेदाभावे ताः समुद्रात् समुद्रमेवापियन्ति स समुद्र एव भवति, इत्यत्र ताः समुद्र एव भवन्तीति श्रुतिशरीरं स्यात् । दार्ष्टान्तिके 'सति सम्पद्य न विदुः सत आगच्छामह इति, त इह व्याघ्रो वा' इति भेदज्ञानिनोऽनर्थोक्तिश्च न स्यादिति । समुद्रे महत्वात् वृद्ध्यदर्शनम् ।

चतुर्थे खण्डे च अस्य यदैकां शाखां जीवो जहातीति उपक्रम्य अनेन जीवेनात्मना इत्यत्र जीवशब्दः ईश्वरपरः मोदमान इति संसारिणः भिन्नत्वेनोक्तत्वात् ।

विष्णुर्जीव इति प्रोक्तः सततं प्राणधारणात्,

इति स्मृतेः ।

अष्टमे पुरुषं सोम्योपतापिनम्, इत्यत्र मरणदृष्टान्तेनेश्वराधीनतोक्त्या भेदप्रतिपादनात् । एषोऽणिम्न एवं महान्यग्रोधः तिष्ठतीत्यत्राणिमशब्दः परमसूक्ष्मेश्वरपरः । स य एषोऽणिमैतदात्म्यमिदं सर्वमिति श्रुतौ ईश्वरे तस्य प्रयोगात् । न तु परीत्या धानापरः । तासां किमत्र पश्यसीति अण्व्य इवेमा धाना भगव इति भावप्रत्ययरहितेन स्त्रीलिङ्गबहुवचनान्तेन इवशब्दशिरस्केनाणुशब्देन निर्दिष्टतया तद्विपरीताणिमशब्दानर्हत्वात् । न निभालयसे इत्युक्तादृश्यत्वायोगाच्च । तथाचोक्तश्रुतिः नाभेदे मानम् । एतद्विस्तरस्तु न्यायामृते स्पष्ट इति ।

किञ्च विशिष्टयोरेव जीवेश्वरयोरभेदोऽस्तु । किं बाधायां सामानाधि-करण्यमुररीकृत्य पदद्वयलक्षणया । ननु विशिष्टयोर्न भेदः विरुद्धधर्माधि-

करणत्वात् । अन्यथा घटत्वपटत्वरूपविरुद्धधर्माधिकरणयोः घटपट-योरभेदः स्यादिति चेन्न । सर्वज्ञत्वाल्पज्ञत्वविशिष्टयोरपि निर्दोषश्रुत्या लक्षणां विनापि तात्विकाभेदबोधने मानान्तरविरोधाभावात् किं पदद्वय-लक्षणया ।

न च प्रत्यक्षेण जीवेश्वरौ भिन्नौ विरुद्धधर्माधिकरणत्वात् इत्यनुमानेन च भेदस्य गृहीतत्वात् तद्विरोध इति शङ्क्यम् । सम्भावितदोषेणातत्वावेदकेन प्रत्यक्षानुमानादिना मिथ्याभेदे गृहीतेऽपि तात्विकाभेदबोधने तद्विरोधा-भावात् ।

न च विरुद्धधर्मस्य सदा सत्वे भेदस्तात्विक एव स्यादिति मन्तव्यम् । अस्याप्यनुमानस्य निर्दोषश्रुतिविरुद्धत्वेनातात्विकविषयत्वात् । तथाच विशिष्टयोरपि अभेदोऽस्तु किं पदद्वयलक्षणयेति । एतद्विस्तरस्तु चन्द्रिकायां स्पष्ट इति अत्र सङ्कोचेनैव दूषणमलिखम् ।

केचित्तु अभिनवाद्वैतवादिनः- तत्वमसीत्यादौ, न पदद्वयलक्षणा । नापि एकपदलक्षणा । किन्तु स्वातन्त्र्येणोपस्थितयोश्चिन्मात्रयोर-भेदान्वयोऽस्तु । किं लक्षणाद्वयेन । यथा स्वातन्त्र्यरूपविशेष्यत्वेनोपस्थिते घटे अनित्यत्वान्वयः । अन्यथा घटो नित्य इतिवत् घटोऽनित्य इत्यत्रापि लक्षणा स्यादित्याहुः ।

अत्र ब्रूमः- तथात्वे तव स्वाचार्यवचनविरोधो भवेत् । तदाहुस्तवाचार्याः तत्वमसीत्यत्र तत्वंपदयोः चिन्मात्रे जहदजहल्लक्षणेति । न्यायविरोधश्च अन्यान्वितेनोपस्थितेऽन्यान्वयासम्भवात् घटस्य घटत्वत्वविशिष्टरूपघट-त्वान्वितत्वेनोपस्थितेः कथं अनित्यत्वान्वयः । घटत्वस्य नित्यत्वात् ।

अत एव यजति इति यागान्वितायां भावनायां दानरूपधात्वर्थान्वयो नेति मीमांसकाः। अन्यथा तत्रापि विशेष्यतया स्वतन्त्रोपस्थितायां भावनायां दानान्वयः स्यात्। तथाच अन्यानन्वितत्वमेव स्वातन्त्र्यम्। तादृग्रूपेण भावना नोपस्थितेति चेदनित्यो घटः तत्वमसीत्यत्रापि विशिष्ट-शक्त्या अन्यान्वितत्वेन विशेष्टोपस्थितेस्तुल्यत्वात् अन्यानन्वितत्वेनोप-स्थित्यर्थं लक्षणा वाच्या। इदमेव मनसि निधाय त्वदाचार्याः तत्वंपद-योर्लक्षणेति तत्रतत्रावदन्नपि।

(यथा नद्य इत्याथर्वणश्रुत्यर्थः)

'यथा नद्यः स्यन्दमानाः समुद्रायणाः समुद्रं प्राप्यास्तं गच्छन्ति
नामरूपे विहाय। तथा विद्वान् नामरूपाद्विमुक्तः
परात्परं पुरुषमुपैति'

इति श्रुतिरभेदे न मानम्। नीरक्षीरयोर्मेलने इदं क्षीरमिदं नीरमिति व्यवहाराभावेऽपि तयोर्भेदः परस्परम्, न द्रव्यान्तरोत्पत्तिः। तथा शुद्धो-दकमिलितं शुद्धमुदकान्तरमपि ततो भिन्नमेव तिष्ठति। न द्रव्यान्तर-मुत्पद्यते। तत्र बलवत्सजातीयसम्बन्धेनात्यन्तसादृश्येन च दोषेण परस्परवैधर्म्यज्ञानाभावान्न परस्परभेदप्रतीतिरिति अभ्युपगन्तव्यत्वात्। अन्यथा नीरक्षीरयोर्मेलनानन्तरं हंसेन नीरात् क्षीरस्य पृथक्करणं न स्यात्। सप्तनदीनामपि समुद्रे प्रवेशस्थले पृथग्भूतानां स्वस्वनाम्नो विभक्ततया नीयमानानां उपलम्भो न स्यात्।

ननु तर्हि ऐक्यबुद्धिव्यवहारौ न स्यातामिति चेन्न। स्थानैक्यमादाय तयोरुपपत्तेः। यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवतीति सादृश्य-

श्रवणात्तादृगेव भवतीति अवधारणे च भेदावश्यम्भावात्। अन्यथा तदेव भवतीति श्रुतिशरीरं स्यात्।

समुद्रे अस्तं गच्छन्तीत्यस्य का गतिरिति चेन्न। अस्तंगतस्सवितेतिवत् तद्व्यवहारस्यापि उपपत्तेः। नामरूपाग्रहणमपि तेन तेनासाधारणरूपेण उपपद्यत इति। अन्यथा पूर्वोक्तबाधकानि त्वया कथं परिहर्तव्यानि स्युः। दार्ष्टान्तिके च परात्परं परुषमुपैति दिव्यमित्यत्र परात्परोक्तिः उपैतीति प्राप्यप्रापकभावश्चाभेदे कथं घटेत। विमुक्त इत्यनेन परममुक्तौ भेदकथनं च कथम्? अन्यथा विमुक्त इति व्यर्थं स्यात्। विमुक्तश्च विमुच्यत इत्यत्रेव प्रकृते समाधानं स्यादिति चेत्। यथा निर्मन्थ्येन इष्टकाः पचन्तीत्यत्र अतीतगत्या प्रयोगः, यथा च यूपं तक्षतीति भाविगत्या प्रयोगः, तथा विमुक्तश्चेति भाविगत्या प्रयोगस्य वक्तव्यत्वात्। विमुक्तस्य पुनः विमोचनासम्भवात्। बह्वीनां निरवकाशानां भेदश्रुतीनां विरोध-स्यापरिहार्यत्वाच्च।

यथा नद्यः स्यन्दमानाः समुद्रायणाः
समुद्रं प्राप्यास्तं गच्छन्ति।

इति समुद्रस्याश्रयत्वप्रतिपादकश्रुतिविरोधाच्च। तथाचोक्तश्रुतिर्नाभिदे मानम्।

(ब्रह्मैवेदं विश्वमित्याथर्वणश्रुत्यर्थः)

नापि ब्रह्मैवेदं विश्वमिति जगतो ब्रह्मात्मकत्वप्रतिपादकं वाक्यमभेदे मानम्। इदं वाक्यं जगतः न ब्रह्मात्मकत्वं प्रतिपादयति।

पुरस्तात्पश्चाद्दक्षिणतश्चोत्तरेण ।
अधश्चोर्ध्वं च प्रसृतम् ।

इत्याधाराधेयभावप्रतिपादकेन पूर्वेण, वरिष्ठमित्युत्तरेण च विरोधात् ।

न हि सर्वात्मकत्वे पुरस्तादित्यादिशब्देन देशविशेषवृत्तित्वं सर्वस्माद्वरिष्ठत्वं वा ब्रह्मणो युज्यते। न च पुरस्तादित्यादावस्तातिः प्रथमार्थे नतु सप्तम्यर्थे इति न तद्विरोध इति शङ्क्यम् । उत्तरेणेत्यनेनान्यथा नेतुमशक्येन प्रायपाठात्प्रथमार्थत्वासम्भवात् । अस्तातिः प्रयोगप्राचुर्येण सप्तम्यर्थ एव प्रसिद्धश्च । पदद्वयलक्षणादोषाच्च ।

नापि स एवेदं सर्वमिति श्रुतिरपि प्रमाणम्। परेण बाधायां सामानाधिकरण्यस्वीकारात् पदद्वयलक्षणादोषात् । स एवाधस्तादित्यादि सर्वगतत्वप्रतिपादकोपक्रमविरोधाच्च। ननु ततोऽपि उपक्रमरूपेण यत्र नान्यत् पश्यति नान्यत् शृणोति नान्यद्विजानातीति वाक्येनान्यनिषेधप्रतिपादकेन विरोधादस्तातिः प्रथमार्थ एवास्त्विति चेन्न । उक्तवाक्यस्यान्यनिषेधपरत्वे यत्र नान्यदित्येव श्रुतिशरीरं स्यात्। पश्यतीत्यादिकमनर्थं च भवेत्। एवं पश्यन्नेवं विजानन् तस्य सर्वेषु कामचारो भवतीति वाक्यशेषविरोधाच्च ।

नापि नात्र काचन भिदास्तीति वाक्यमभेदे प्रमाणम् । उक्तश्रुतेरपि अत्र परमात्मनि काच कापि भिदा भेदः नास्तीति न, अपि तु अस्त्येवेत्यर्थपरतयापि योजयितुं शक्यत्वात् ।

पूर्वोक्तभेदश्रुतिविरोधेनोक्तार्थस्यैव स्वरसत्वाच्च ।

नापि सर्वं खल्विदं ब्रह्म । ब्रह्मैवेदं सर्वम् । पुरुष एवेदं सर्वम् । इदं सर्वं

यदयमात्मेत्यादि श्रुतयोऽभेदे मानम्। किञ्चिदुद्दिश्य किञ्चिद्विधीयते इति मीमांसकानां रीतिः । तथाच प्रकृते सर्वमुद्दिश्य तस्य ब्रह्मत्वं विधीयते उत ब्रह्म उद्दिश्य तस्य सर्वत्वादिकम् । नाद्यः । व्याहतेः । नहि जडस्य चेतनत्वं सम्भवति। न चरमः । व्याहतेः । न च चेतनस्य ब्रह्मणः जडत्वं भवेत्। 'अजडम्' इति श्रुतिविरोधश्च स्यात्। न च बाधायां सामानाधिकरण्यात् पदद्वयलक्षणया चिन्मात्रयोरभेदो भवत्विति शङ्क्यम् । पदद्वयलक्षणापेक्षया एकस्मिन् तत्पदे लक्षणायाः ज्यायस्त्वात् मुख्यार्थहानेश्चेत्यादिदूषणानां पूर्वमेव तत्वमसीतिश्रुतावेवावेदितत्वात् ।

यद्वा- मीमांसकैर्यथा उत यत्सुन्वन्ति तत् सामिधेनीरन्वाहुरित्यत्र यत् सुन्वन्ति यत्र हविर्धाने सोममभिषुण्वन्ति तत् तत्र सामिधेनीरनुब्रूयादिति सप्तम्यर्थे प्रथमा स्वीकृता तथा सदायतनाः सत्प्रतिष्ठा इति श्रुत्या त्वं तत् तस्मिन्नसि इत्यर्थाङ्गीकारात् नैकपदलक्षणापि मन्मते शक्यार्थस्यैवाङ्गीकारात् ।

यदा तूक्तश्रुतीनामभेदपरत्वं तदा वाक्यविरोधः। तथाहि- सर्वं खल्विदं ब्रह्मेत्यत्र भेदानङ्गीकारे ज्यायान् पृथिव्याः ज्यायानन्तरिक्षात् इति भेदप्रतिपादकवाक्यविरोधः। ब्रह्मैवेदं सर्वमिति वाक्ये तदनङ्गीकारे अस्यां पृथिव्यां तेजोमयोऽमृतमय इति पूर्ववाक्यविरोधः । पुरुष एवेदं सर्वमिति वाक्ये भेदाप्रतिपादने स भूमिं विश्वतो वृत्वेति पूर्ववाक्यविरोधः, उतामृतत्वस्येशान इति उत्तरवाक्यविरोधश्च स्यात्। इदं सर्वं यदयमात्मेत्यत्राभेदाङ्गीकारे सर्वं तं परादात् योऽन्यत्रात्मनः सर्वं वेदेति पूर्ववाक्यविरोधः, यथा दुन्दुभेर्हन्यमानस्येति भेदप्रतिपादकोत्तरवाक्यविरोधश्च स्यात् ।

नापि तदात्मानमेवावेदहं ब्रह्मास्मीति वाक्यमभेदे मानम् । तद्योयो देवानां प्रत्यबुध्यत तथर्षीणां तथा मनुष्याणामिति भेदवाक्यशेष-विरोधात् ।

नापि अथ योऽन्यां देवतामुपास्ते अन्योऽसावन्योऽहमस्मीति न स वेद, यथा पशुरिति वाक्यं मानम् । अस्यार्थः - योऽन्यो जीवः अन्यां विलक्षणां देवतामुपास्ते किमिति ? अन्योऽसौ परमात्माऽहमस्मीति, न स वेद यथा पशुः । अन्यथा अहमर्थस्यापि विशेष्यत्वे देवतामुपास्ते इति अयुक्तं स्यात् । न च व्यवहितान्वयदोषः स्यात् । यस्य येनार्थसम्बन्ध इति न्यायेन सन्निधानात् योग्यतायाः बलवत्वादिति ।

कटाक्षमात्रविदलितनिखिलस्मार्तमण्डलीकाः सुब्रह्मण्यभ्रातृ-चरणास्तु- यो जीवः अन्यां देवतां असौ अन्योऽहमन्योऽस्मीति नोपास्ते स तथा वेद यथा पशुः । न च व्यवहितान्वयदोषः तस्य सह्यत्वात् । आनर्थक्यापेक्षया व्यवहितान्वयस्यैव ज्यायस्त्वात् । सन्निधानापेक्षया योग्यताया एव बलवत्त्वाच्च ।

नापि यो वै भूमा तत् सुखम् । नाल्पे सुखमस्ति। भूमैव सुखमिति वाक्यं मानमिति । तत्र पूर्ववाक्ये अल्पशब्देन चेतनमेव गृह्यते, न चाचेत-नम् । तत्र सुखस्याप्रसक्ततया तन्निषेधासम्भवात् । तथात्वे भूम्नः सुख-रूपत्वादपरिच्छिन्नसुखरूपत्वम् अस्वतन्त्रचेतनरूपजीवे अल्पसुखवत्वमेव च तद्वाक्ये उच्यते । तथाचापरिच्छिन्नसुखवत्वाल्पसुखवत्वाभ्यां जीव-ब्रह्मणोर्भेदस्यैव कथनात् नाभेदे प्रमाणम् ।

नापि स यो ह वै तत् परमं ब्रह्म वेद ब्रह्मैव भवतीति वाक्यमैक्ये

प्रमाणम् । अत्रापि ब्रह्मशब्दो जीवपरः । बृहजातिजीवकमलासन-शब्दराशिषु इति वचनात् । द्वे ब्रह्मणी वेदितव्ये इति श्रुतेः । ब्रह्माणि जीवाः सर्वेऽपीति स्मृतेश्च । तथाच परमं ब्रह्म वेद स जीव एव भवति नतु परमं ब्रह्म । यद्वा- ब्रह्म भवति बृहद् भवति यथायोग्यतया पूर्णो भवति । अत एवाद्यो ब्रह्मशब्दः परमत्वेन श्रुतौ विशेषितः । अन्यथा तद्वैयर्थ्यापत्तेः । 'अस्य महिमानमिति वीतशोक' इति भेदप्रतिपादक-वाक्यशेषविरोधश्च स्यात् । अन्यथा अक्ताः शर्करा इत्यत्र तेजो वै घृतमिति वाक्यशेषानुसारेणाक्तापदस्य द्रवद्रव्यविशेषपरत्वं न स्यात् । न स्याच्च श्येनेनाभिचरन् यजेतेत्यत्र श्येनपदस्य यथा वै श्येनो निपत्यादत्त इति वाक्यशेषानुसारेण यागपरत्वम् । अपि च पूर्ववाक्ये यथा नद्यः स्यन्दमानाः समुद्रायणाः इति नदीसमुद्रदृष्टान्तोक्तिः परात्परं पुरुषमुपैति दिव्यमिति ब्रह्मप्राप्त्युक्तिश्चायुक्ता स्यात् । अभेदे च प्राप्नोतीति प्राप्यप्रापकभावश्च विरुध्येत । तस्य च भेदघटितत्वात् ।

किञ्च त्वत्पक्षे नित्यब्रह्मभावस्यापूर्वभावोक्तिरयुक्ता च भवेत् । आरोपनिवृत्तेरप्यशाब्दत्वात् ।

नापि ब्रह्मैव सन् ब्रह्माप्येतीति वाक्यं मानम् । अत्रापि जीव एव सन् ब्रह्माप्नोतीति कर्तृकर्मभावेन भेद एवोच्यते ।

नापि विज्ञानमयश्च आत्मा परेऽव्यये सर्व एकीभवन्तीति वाक्यं मानम् । अत्र सायं गावो गोष्ठ एकीभवन्ति, इह ग्रामे सर्वे महाजनाः एकीभूताः इत्यत्रेव स्थानैक्यमत्यैक्यमादाय एकीभाव उपपद्यते। भवत्पक्षे तु ऐक्यस्य प्रागेव सिद्धत्वादभूततद्भावार्थच्विप्रत्ययबाधः । परेऽव्यये इति श्रुतसप्तमीहानिः अश्रुततृतीयाकल्पनापत्तिश्च। निरञ्जनः परमं

साम्यमुपैतीति वाक्येन परात्परं पुरुषमुपैति दिव्यमिति उत्तरवाक्येन विरोधश्च भवेत्।

नापि द्वितीयाद्वै भयं भवतीति वाक्यं मानम्। अत्र द्वितीयादित्यस्य विजातीयादित्येवार्थः। लोके विरोधिनः विजातीयादेव भयदर्शनात्। अन्यथा पुत्रकलत्रादितो भयं स्यात्। पूर्वत्र तस्मादेकाकी बिभेतीति उत्तरत्र च तस्मादेकाकी न रमते इति श्रवणाच्च।

नापि उदरमन्तरं कुरुते अथ तस्य भयं भवतीति श्रुतिः मानम्। अस्याः श्रुतेरभेदनिन्दापरत्व एव स्वरसत्वात्। तथाहि- यः पुरुषः उदरमीषदन्तरं भेदं व्यावहारिकमिति यावत् पारमार्थिकभेदवति भगवति व्यावहारिकभेदं करोति अथ तस्य भयं भवतीति।

यद्वा- अत्यन्तभेदवति ईषद्भेदं स्वल्पभेदं कुरुते तस्य भयं भवति।

नन्वेवमपि,

यस्मिन् सर्वाणि भूतानि आत्मैवाभूद् विजानतः।
तत्र को मोहः कः शोकः एकत्वमनुपश्यतः॥

इति श्रुतेः स्पष्टमानत्वादिति चेदत्र ब्रूमः- उक्तश्रुतेः यस्मिन् भगवति नारायणे सर्वाणि भूतानि आत्मैवाभूत् आत्मपदे लक्षणां स्वीकृत्य आत्माधीनमेवाभूत् इति विजानतः एकत्वं एके मुख्यान्यकेवलाः इत्यमरोक्त्या एकत्वं मुख्यत्वं अन्यत्वं वा पश्यतोऽधिकारिणः को मोहः कः शोकः इत्यर्थपरतया व्याख्यानस्यातिस्वरसत्वात् का प्रत्याशा अभेदे? न च लक्षणैव दोष इति शङ्क्यम्। परमते बाधायां सामानाधिकरण्यात् आत्मपदस्य चिन्मात्रे लक्षणाया आवश्यकत्वात्। उक्तदोषस्योभयपक्षेपि समत्वात्।

किञ्च त्वन्मते सर्वाणि भूतानीत्यत्रापि चिन्मात्रे लक्षणा स्यात्। जडाभेदे अजडमिति श्रुतिविरोधाच्च। आत्मैकत्वपदयोरन्यतरपदस्य वैयर्थ्याच्च। सर्वाणि भूतानि आत्मैवाभूत् इत्येतावतैव सर्वभूतात्मकत्वस्य बोधनात् एकत्वमनुपश्यत इत्यस्यापि वैयर्थ्याच्च। तथाचानर्थक्यापेक्षया एकपदलक्षणाया एव ज्यायस्त्वात्।

अत एवोक्तं वैश्वदेवेन यजेतेत्यत्र किं विश्वेदेवदेवतागुणो विधीयते उत आग्नेयोऽष्टाकपाल इत्यादिवाक्यविहिताः यागाः अनूद्यन्त इति संशये समुदायानुवादकत्वे आनर्थक्यात् देवतागुणविधिः। न च उत्पत्तिशिष्ट-देवतावरुद्धयागेषु नोत्पन्नशिष्टदेवतान्तरविधानं सम्भवतीति वाच्यम्। आनर्थक्यप्रतिहतानामिति न्यायेनोत्पन्नशिष्टविधानसम्भवादिति पूर्वपक्षे प्राप्ते अष्टानां यागानां समुदायसम्पादनेन सार्थक्यसम्भवेनानुवादकत्व-सम्भवात्। न च समुदायसम्पादनस्य नैष्फल्यम्। प्राचीनप्रवणे वैश्वदेवेन यजेतेत्येतद्वाक्यविहितदेशविशेषसम्बन्धस्य सर्वयागसम्बन्धसिद्धेरेव प्रयोजनत्वात्। अन्यथा हि वैश्वदेवयागस्यैव देशविशेषसम्बन्धः सिध्येत्। न तु सर्वेषां यागानाम्।

न चास्मिन्वाक्येऽपि वैश्वदेवशब्देन विश्वदेवदेवताकयागस्यैवानुवादात् न सर्वेषां देशविशेषसम्बन्धः सिध्यतीति वाच्यम्। विनाप्येतद्वाक्यं वैश्वदेवयागस्य देशविशेषसम्बन्धस्य सिद्धौ एतद्वाक्यानर्थक्यापत्तेः। वाक्यानर्थक्याद्वरं लक्षणाश्रयणमिति न्यायेन वैश्वदेवशब्दस्य वैश्व-देवावैश्वदेवसमुदाये लक्षणाङ्गीकृतेति।

आत्मानं चेद्विजानीयादयमस्मीति पूरुषः।
किमिच्छन् कस्य कामाय शरीरमनुसञ्ज्वरेत्।

तस्मादेकाकी बिभेतीत्याद्यभेदनिन्दाप्रतिपादकवाक्यविरोधाच्च। पूर्वत्र परमोक्रमे,

ईशावास्यमिदं सर्वं यत् किञ्च जगत्यां जगत् ।

इति वाक्ये भेदोपक्रमात्, उपसंहारे,

विद्यां चाविद्यां च यस्तद्वेदोभयं सह ।
अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते ।

इति वाक्ये भेदोपसंहाराच्च नोक्ता श्रुतिरभेदे मानम् ।

नन्वेवमपि न वा अरे पत्युः कामाय पतिः प्रियो भवतीति श्रुतिरभेदे प्रमाणम् । अत्रोच्यते- अस्याः श्रुतेः पत्यादीनां भार्यादीन् प्रति अहं प्रियः स्यामिति इच्छया तान् प्रति न प्रियत्वं किन्तु परमात्मन इच्छयैवेत्यर्थः।

पतिर्जायाप्रियो नैव स्वेच्छया तु भविष्यति ।
विष्णोरिच्छावशेनैव स्वयं च स्वप्रियो भवेत् ।

इत्यादिवचनात् । परमात्मेच्छाभावे सुभगे पुरुषे पत्यादौ जायादीनां प्रीत्यभावदर्शनाच्च । अन्यथा पत्यादीनां स्वीयत्वेनैव प्रियत्वात् स्वयमेव निरुपाधिकप्रिय इति परोक्तार्थाङ्गीकारे दुःखादेरपि स्वीयत्वेनैव प्रियत्वात् स्वयं निरुपाधिकाप्रियः स्यात् ।

(सूक्ष्मात् सूक्ष्मतरं नित्यमिति कैवल्योपनिषदर्थः)

नापि 'सूक्ष्मात् सूक्ष्मतरं नित्यं तत्त्वमेव त्वमेव तत्' इति श्रुतिरपि जीवेश्वराभेदे मानम् । तस्याः भेदपरत्व एव स्वारस्यात् । तथाहि- तत्परं ब्रह्म त्वद्गतमेव त्वं च तद्गतः । न च लक्षणादोषः । पदद्वयलक्षणापेक्षया एकपदलक्षणायाः ज्यायस्त्वात् ।

वस्तुतस्तु तत् तदेव, त्वं त्वमेवेति व्याख्यायाः सुरसत्वात् ।

न च शङ्क्यं व्यवहितान्वयदोष इति । पदद्वयलक्षणारूपानेक-श्रुतिमनुरुध्य यदा लिङ्गं बाधितुमुचितं तदा किमु वक्तव्यं ततोऽपि दुर्बलतरं सन्निधानं बाधनीयमिति ।

किञ्च सूक्ष्मात् सूक्ष्मतरं नित्यमिति स्पष्टमेव भेदप्रतिपादकपूर्व-वाक्यविरोधः स्यात् । तथाच व्यवहितान्वयस्य सह्यत्वात् । किञ्च त्वत्पक्षे तदादिपदयोः लक्षणा, सूक्ष्मात् सूक्ष्मतरं नित्यमिति भेदप्रतिपादक-पूर्ववाक्यविरोधश्चेति दूषणद्वयम् । मामके पक्षे तु व्यवहितान्वयदोष-मात्रम् । अत एव सप्तदशारत्निर्वाजपेयस्य यूपो भवतीत्यत्र पर्यग्निकृतं पात्नीवतमुत्सृजतीत्यत्र च व्यवहितान्वय इति सिद्धान्तितम् ।

ननु तर्हि क्वापि व्यवहितान्वयो दोषो न स्यात् । न चेष्टापत्तिः । तरसमयाः सवनीयाः पुरोडाशा भवन्तीत्यत्र सन्निहितं सवनीयमुद्दिश्य तरसविधानं न स्यात् इति चेन्, असति बाधके तन्न्यायस्यानुसरणीय-त्वात् । प्रकृते बाधस्य उक्तत्वाच्च। अन्यथा बाधकसद्भावेऽपि अव्यवहि-तान्वयस्वीकारे सप्तदशारत्नित्वस्य वाजपेयेऽन्वयः स्यात् । नतु यूपे । तथाचोक्ता श्रुतिरभेदे न मानम् ।

ननु ब्रह्मैव स्वाविद्यया संसरतीति उत्तरत्र मायापरिमोहितात्मा कथ्यते 'स एव मायापरिमोहितात्मा' इत्यादिना । 'स एव' इत्यनेन परमात्मानं परामृश्य 'शरीरमास्थाय करोति सर्वम्' इति तस्यैव मायावृतत्वेन जीवभावापन्नस्य कर्तृत्वादिकथनात् । अन्यथा स एवेत्यनेन किं परामृश्ये-तेति चेन्न । अव्यवहितपूर्ववाक्ये 'पाशं दहति पण्डितः' इत्यत्र ज्ञानकार्य-

संसाररूपपाशदहनमुक्तम् । तमेव पण्डितं परामृश्य तस्यैवाज्ञानावस्था वर्ण्यते 'स एव मायापरिमोहितात्मा' इत्यादिना 'पुनश्च जन्मान्तरकर्म-योगात् स एव जीवः स्वपिति प्रबुद्धः' इत्यन्तेन । तस्यैव जाग्रदवस्थालक्षण-पुरत्रयक्रीडनमप्युच्यते 'पुरत्रये क्रीडति' इत्यनेन । स एवेत्यनेन प्रथमान्तेन स्वसमानविभक्तिकस्य पण्डित इत्यस्य वक्ष्यमाणस्य 'जीवः सुखरूप-मेति' इत्यत्र जीव इत्यस्येव परामर्श उचितः । न तु भिन्नविभक्तिकस्य 'आत्मानमरणिं कृत्वा' इत्यत्रोक्तस्यात्मानमित्यस्य, उमासहायमित्यस्य वा, संपश्यन् ब्रह्म परममित्यत्र नपुंसकब्रह्मशब्दितस्य व्यवहितस्य वा परमार्शः उचितः । एवमेव चावश्यमङ्गीकर्तव्यम् । अन्यथा प्रदर्शितवाक्य-विरोधस्यानिस्तारो भवेदिति ।

तथाच पाशं दहतीति ब्रह्मज्ञानस्य संसाररूपपाशदहनफलवत्त्व-मुक्त्वा तदज्ञानिनः दुःखरूपसंसारानुवृत्तिरेवेति अज्ञाननिन्दया ब्रह्मज्ञान-प्रंशसारूपार्थवादत्वम् । 'स एव माया परिमोहितात्मा' इत्यादि 'पुरत्रये क्रीडति' इत्यन्तस्य तथैव 'यस्मिन् लयं यान्ति पुरत्रयं च । एतस्माज्जायते प्राणः मनः सर्वेन्द्रियाणि च' इत्यस्य 'यस्मिन् ब्रह्मणि जाग्रदाद्यवस्था-लक्षणं पुरत्रयं लयं याति एतस्माद् ब्रह्मणः प्राणादिकं जायते' इत्यर्थस्य ज्ञेयब्रह्मस्तुतिरूपार्थवादत्वम् । तथा च नेदं वाक्यमभेदे मानमिति ।

(प्रपञ्चो यदि विद्येतेति श्रुत्यर्थः)

प्रपंचो यदि विद्येत निवर्तेत न संशयः ।
मायामात्रमिदं द्वैतमद्वैतं परमार्थतः ॥

इति श्रुतिरप्यभेदे भेदस्यौपाधिकत्वे च न मानम् । तद्वैक आहुरिति श्रुतौ

बौद्धमत प्राप्तमसत्कारणत्वं निरस्य सत्कारणत्वं व्यवस्थाप्यते यथा, तथा मतान्तरप्राप्तं भेदस्यौपाधिकत्वं निरस्य सत्यत्वमिहोच्यते । तथा हि । भेदप्रपञ्चो यदि विद्येत उपाध्यधीनस्थितिकस्तदधीनोत्पत्तिको वा स्यात् तर्हि निवर्तेत । औपाधिकस्फटिकलौहित्यस्योपाधिनिवृत्त्या निवृत्तिदर्शनात् । न च निवर्तते। मोक्षेऽपि भेदश्रुतेः । तस्मान्नोपाध्यधीन-स्थितिको, न वा तदधीनोत्पत्तिक इति । यद्वा भेदप्रपञ्चो यदि विद्येत। विद्लृ लाभ इति धातुः । तथा च यदि विद्येत लभेत उत्पद्येतेत्यर्थः । तर्हि निवर्तेत । न च निवर्तते । मुक्तावपि.

'परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते ।
स तत्र पर्येति जक्षन् क्रीडन् रममाणः स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वा ॥
सत्यं ज्ञानमनन्तं ब्रह्म यो वेद निहितं गुहायाम् ।
सोश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेति ॥
अत्रान्तरं वेदविदो विदित्वा लीना ब्रह्मणि योनिमुक्ताः ॥
परमं साम्यमुपैति ।
न यत्र माया किमुतापरे हरेरनुव्रता यत्र सुरासुरार्चिताः ।
श्यामावदाताः सुरुचः सुपेशसः ॥'

इत्यादि भेदश्रुतिस्मृत्यादेः सत्वात् । तस्माद् भेदोऽनादि नित्यः ।

न च सत्तार्थकत्वाद् विदेः कथं विद्येतेत्यस्य उत्पद्येतेति व्याख्यानमिति शङ्क्यम् । विद सत्तायामिति धातुः । उत्पत्तिरपि सत्तायोग एव । तथा चोक्तव्याख्याने बाधकाभावात् । न चैवमपि विद उक्तप्रकारेण उत्प-त्त्यर्थकत्वेऽपि उत्पत्तौ प्रयोगस्यादर्शनात् असाधुत्वमेवेति शङ्क्यम् ।

सत्तार्थकस्यापि भवतेरुत्पत्तौ प्रयोगदर्शनात् समानन्यायेन विदेरप्युत्पत्तौ प्रयोगस्य साधुत्वात्। अत एवोक्तं भावाधिकरण वार्तिके -

तेन भूतेषु कर्तृत्वं प्रतिपन्नस्य वस्तुनः।
प्रयोजकक्रियामाहुर्भावानां भावनाविदः ॥

इति। तथा चास्ति सत्तार्थकस्य भवतेरुत्पत्तौ प्रयोगः। उत्पत्तिरपि सत्तालाभ एव।

अत्र मायिनः- प्रपञ्चो यदि विद्येतेत्यत्र विश्ववाची प्रपञ्चशब्दः कथं भेदवचन इति। अत्र ब्रूमः। प्रपञ्चशब्दस्य लोके वेदे चास्तु जगति प्रसिद्धिः। प्रपञ्चान्तर्गत भेदस्यापि तच्छब्दवाच्यत्वस्य सुवचत्वात्। अन्यथा तवापि नेह नानेति श्रुत्या प्रपञ्चमिथ्यात्वसिद्धावपि तदन्तर्गतस्य भेदस्य मिथ्यात्वं न सिध्येत्। न चेष्टापत्तिः। तावके मते भेदमिथ्यात्वे 'भेदो मिथ्या' इति पृथग् भेदमिथ्यात्वावेदकश्रुतेरभावात्।

न च तन्मिथ्यात्वे 'मायामात्रमिदं द्वैतम्' इति वाक्यमेव प्रमाणमिति चेन्न। तस्य प्रकारान्तरेण व्याख्यास्यमानत्वात् न तेन तत्सिद्धिः।

न चैवमपि 'नात्र काचन भिदाऽस्ति' इति वाक्यं कुतोऽत्र न प्रमाणमिति मन्तव्यम्। अस्यापि 'अत्र ब्रह्मणि का च कापि भिदा नास्तीति न' इत्येवंपरतया पूर्वं व्याख्यातत्वात्। यद्वा अत्र ब्रह्मणि स्वगुणरूपादिना काचन भिदा नास्तीत्येवंपरत्वेनापि व्याख्याने बाधकाभावादिति न किञ्चिदेतत्।

न चैवमपि सामान्यशब्दस्य विशेषे कथं पर्यवसानमिति शङ्क्यम्। प्रकृते प्रपञ्चशब्देन विश्वग्रहणे यदि निर्वह्निः स्यात् तर्हि निर्धूमः स्यात्

इत्यत्रेव नच निवर्तते तस्मादनादिनित्य इति विपर्यये पर्यवसाने बाधकसद्भावेन सामान्यशब्दस्य विशेषे पर्यवसानस्यैव सुवचत्वात्। नहि सर्वोऽपि प्रपञ्चः 'यतो वा इमानि भूतानि जायन्ते' इत्युत्पत्तिप्रतिपादकश्रुत्या, 'विश्वमायानिवृत्तिः' इति वाक्येन च तन्नाशोपपादक 'लीना ब्रह्मणि' इति श्रुत्या च विरोधात् अनादिः ध्वंसाप्रतियोगिरूपो नित्यः। किञ्च परमोपक्रमे एष सर्वेश्वरः एष सर्वज्ञः एषोऽन्तर्यामी एष योनिः सर्वस्य प्रभवाप्ययो हि भूतानामित्यत्र भेदघटित सर्वेश्वरत्व सर्वज्ञत्व सर्वान्तर्यामित्व सर्वोत्पादकत्वादि धर्माणां अव्यवहितपूर्वत्र च

तुरीयं पदमश्नुते,
अनादिमायया सुप्तो यदा जीवः प्रबुध्यते।
अजमनिद्रमस्वप्नमद्वैतं बुध्यते तदा ॥

इत्यत्र च भेदघटित धर्माणां कथनात् भेदरूपविशेषे पर्यवसानस्यैव स्वरसत्वात्।

वस्तुतस्तु तावके मते प्रपंचशब्देन विश्वग्रहणे यदि निर्वह्निः स्यात् तर्हि निर्धूमः स्यात् इत्यत्रेव न च निवर्तते इति विपर्यये पर्यवसानं कथं भवेत्? त्वया अविद्यानिवृत्त्या तत्कार्य प्रपञ्चस्यापि निवृत्त्यङ्गीकरात्। तस्मादस्मदुक्तार्थ एव स्वरस इति।

न चैवमपीदं श्लोकद्वयं प्रपंचमिथ्यात्वपरत्वेन यथाकथञ्चिद् व्याख्येयम्। पूर्वत्र सर्वभावानां सतामिति विशेषणात्। इच्छामात्रं प्रभोः सृष्टिरिति वाक्येन स्वमतस्योक्तत्वाच्च। अन्यैर्विकल्पितेति अन्यशब्देन दूष्यमतत्वेनोक्तायाः स्वप्नतुल्यदृष्टेर्विरोधस्याकिञ्चित्करत्वाच्च। स्वाप्नपदार्थस्य

सत्यत्वाच्च। अन्यथा तत्र दृष्टात्मादेरपि मिथ्यात्वापत्तेः। विश्वं सत्यमित्यादिश्रुतिविरोधाच्च नेयमपव्याख्या सतां चेतस्यधिरोहति। ननु विद्यतेरस्तित्वार्थकत्वं किं न स्यादिति चेत् तथात्वे यद्यदस्ति तत्तन्निवर्तत इति व्याप्तेर्ब्रह्मणि व्यभिचारात् तर्क आभासः स्यात्।

अत्र केचिदभिनवाः श्रौतहेतोर्व्याप्तेरनावश्यकत्वात् कथमस्याभासत्वमित्याहुः। तन्न। श्रौतस्यापि हेतो व्याप्तेरावश्यकत्वात्। अत एव 'शूर्पेण जुहोति, तेन ह्यन्नं क्रियते' इत्यत्र हिशब्दसूचितहेतुत्वस्य होमसाधनतायामन्नकरणत्वस्य हेतोर्व्याप्तिरुक्ता। तथाहि तेन ह्यन्नं क्रियत इत्यत्र हिशब्दस्य हेतुवाचितया प्रसिद्धेः तेन ह्यन्नमिति वाक्यं हेतुकल्पकतया विध्यन्वयि। श्रुत्यनुग्रहसंभवात्। स्तावकत्वे च श्रुतहानिः लक्षणाकल्पनमानर्थक्यं च स्यात्। नच हेतुसमर्पकत्वे किं प्रयोजनमिति शङ्क्यम्। अन्नकरणहेतुत्वान्यथानुपपत्त्या येनयेनान्नं क्रियते तेनतेन होतव्यमिति कल्पितव्याप्तिवचनेन अन्नकरणस्य दर्वीपिठरादेरपि होमसाधनत्वसिद्धिः प्रयोजनम्। कल्पितवचनेनैव शूर्पस्यापि होमसाधनत्वसिद्धेः शूर्पेण जुहोतीत्यवयुत्यानुवाद इति पूर्वपक्षः। सिद्धान्तस्तु शूर्पेण जुहोतीति प्रत्यक्षविधौ जाग्रति न कल्पितवचनस्य विधायकत्वं युक्तम्। अन्यथा कल्पितवचनस्य शूर्पेतर दर्वीपिठरादि विषयत्वावश्यकत्वेन तेषां प्रत्यक्षविहितेन शूर्पेण विकल्पसमुच्चयबाधाः स्युः। अस्तु वा हेतुसमर्पकतयान्वयः। तथापि शूर्पगतमेवान्नकरणत्वं हेतुत्वेनानूद्यते। तस्यैव शूर्पहोतव्यताव्याप्तेः। लोके हेतोः सामान्यमुखेन प्रवृत्तावपि वेदे प्रमाणान्तराभावेन श्रुतमात्र एव हेतुत्वान्वयौचित्यात् इति।

(मायामात्रमिति श्रुत्यर्थः)

तर्हि स्वतन्त्रं किम्? नेत्याह मायामात्रमिति। ईश्वरेच्छाधीनमित्यर्थः। न च मायाशब्दस्येच्छार्थकत्वे न मानमिति वाच्यम्।

विष्णोरिच्छावशत्वात्तु मायामात्रमिति स्मृतम्।

इति स्मृतेरेव प्रमाणत्वात्। अत एव पूर्ववाक्ये

स्वप्नमायासरूपेति सृष्टिरस्यैर्विकल्पितेति

सृज्यस्य वियदादेः स्वप्नमायासरूपत्वं मतान्तरत्वेनोक्तम्। इच्छामात्रं प्रभोः सृष्टिरितीश्वरायत्तत्वोक्तेरुत्तरत्र मायाशब्देनेश्वरेच्छाया ग्रहणे एकदेशिप्रत्यभिज्ञानमपि संगच्छते। न चैवमपि स्वप्नमायासरूपेति पूर्वोक्तमायाया एव उत्तरत्रापि मायामात्रमिति वाक्ये मायाशब्देन प्रत्यभिज्ञानेनेश्वरेच्छाया लाभः कथमिति वाच्यम्। स्वप्नमायेत्यत्र मायाशब्देन मिथ्यार्थविशेषग्रहणेऽपि प्रकृते मायाशब्देन ईश्वरेच्छाया एव ग्रहणे स्वरसत्वात्। अन्यथा मतान्तरत्वेन मायाशब्दवाच्यमुद्भाव्य तत्रैव श्रुतौ स्वमतत्वेन इच्छामात्रमिति जगति इच्छाधीनत्वोक्तिर्न स्यात्। मायाशब्दस्य सत्ये विदुषामपि प्रयोगात् मिथ्यार्थत्वासिद्धेश्च। सत्येऽपि सर्वथा स्वातन्त्र्यरहिते देवदत्त इव ईश्वराधीनतया सर्वथा स्वातन्त्र्यशून्ये द्वैतप्रपंचेऽपि मायाशब्दप्रयोगस्योपपन्नत्वाच्च।

ननु मायाऽविद्या च स्वयं भवतीति श्रुत्या मायाऽविद्ययोरभेदज्ञानात् मिथ्याभूतार्थ एव प्रयोगो मुख्यः, अन्यत्र गौण इति चेन्न। एतावंतं कालं शुक्त्यज्ञानमासीत् इति प्रत्यक्षेण, तम आसीदिति श्रुत्या च अविद्याया एव सत्यत्वावेदनेन तन्मिथ्यात्वस्य मिथ्याभूतार्थे मुख्यप्रयोगस्य चायोगात्।

केचित् पूर्ववाक्ये स्वप्नमायासरूपेति सृष्टिरन्यैर्विकल्पितेति सृष्टेर-सत्वेनोक्तत्वात् उपक्रमस्य स्वरुं करोतीत्यत्रेव बलवत्त्वात् तद्विरोधः स्यादित्याहुः । तन्मन्दम् । स्वप्नमायासरूपेति सृष्टिरन्यैर्विकल्पितेति ऐन्द्रजालिकत्वस्य दूष्यमतान्तरत्वेनोक्त्वा इच्छामात्रं प्रभोः सृष्टिरिति इच्छाधीनत्वस्य स्वमतत्वेनोक्तेश्च विरोधाभावात् । असति बाधके उपक्रमस्य बलवत्त्वात् । बाधकस्योक्तत्वाच्च । उपक्रमस्योपसंहारानु-सारित्वेनैव प्रकृते नयनस्योचितत्वात् । अत एव चतुर्थ तृतीयपादे वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते इत्युपक्रम्य यस्मिन् जात एतां इष्टिं निर्वपति स पूत एव तेजस्वीत्यधिकरणमनुकूलितं भवति। प्रभवः सर्वभावानां सतामिति विनिश्चय इत्यत्र सत्तार्थकभावपदेन सतामिति विशेषणेन च सत्वस्योक्तत्वात् सृष्टेर्नासत्वमिति ।

अन्ये तु जीवेश्वरभेदो मिथ्या। अविद्यानियतप्रतिभासत्वात् शुक्ति-रूप्यवदित्यनुमानं तन्मिथ्यात्वे प्रमाणमित्याहुः । तदप्यमङ्गलम् । अविद्यानियतप्रतिभासत्वहेतोश्चैतन्ये व्यभिचारस्य स्फुटत्वात् नानुमाऽत्र मानम् ।

वयं तु ब्रूमः । मायामात्रमित्यत्र मायाशब्देन शक्तेरेव ग्रहणात् । न च मायाशब्दस्य शक्तौ प्रयोगे किं मानमिति शङ्क्यम् ।

'एकस्त्वमेव भगवन्निदमात्मशक्त्या
मायाख्ययोरुगुणया महदाद्यशेषम् ॥'

इति भागवते मायाशब्दस्य शक्तौ प्रयोगदर्शनात् । श्रुतीनां भेदनिन्दा-परत्वाभावस्य पूर्वं बहुधा साधितत्वात् । प्रत्युत अभेद निंदा परत्वेनैव व्याख्यातत्वाच्च ।

नन्वद्वैतः सर्वभावानामिति श्रुतमद्वैतं कथमिति तत्राह अद्वैतं परमार्थत इति। ल्यब् लोप निमित्ता पञ्चमी । परमं स्वतन्त्रमर्थमपेक्ष्य । नच परमार्थशब्दस्य तात्विकेऽर्थे रूढत्वात् कथमनेन शब्देन स्वतन्त्रार्थाभि-धानमिति वाच्यम्। स्वतन्त्रं परमार्थाख्यमिति स्मृतेः प्रकृतेऽपि स्मार्तरूढेः सत्वात् । तस्य लोकरूढ्यपेक्षया बलवत्त्वाच्च । नचैवमपि बहुत्वाल्लोक-प्रसिद्धिर्बलीयसीति शङ्क्यम्। शास्त्रे शास्त्रीयार्थस्यैव ग्राह्यत्वात्। अन्यथा यववराहाधिकरणविरोधः स्यात् । तत्र हि यववराहादिशब्दा लोके प्रियङ्ग्वादौ प्रसिद्धावपि

'वसन्ते सर्वसस्यानां जायते प्रत्रशातनम् ।
मोदमानास्तु तिष्ठन्ति यवाः कणिशशालिनः ॥'

इति स्मृत्या, वराहं गावोऽनुधावन्तीति श्रुतिवाक्येन च दीर्घशूकसूकरार्था एव गृह्यन्ते। किञ्च क्लृप्तावयव शक्त्यैव उत्तमार्थत्वेन परमार्थशब्दसम्भवे समुदायशक्तिकल्पनाया अयोगात्। अत एव प्रोक्षण्यधिकरणे प्रोक्षणी-शब्दस्य जले योग एवेत्युक्तम् । उक्तं च वार्तिके-

'भवेतां यदि वृक्षस्य वाजिकर्णौ कथञ्चन ।
अदृष्टां समुदायस्य शक्तिं कः कल्पयेत् ॥' इति ।

नच योगमात्रेण कथं स्वतन्त्रार्थकत्वमिति शङ्क्यम् । पङ्कजशब्दस्य कुमुद इव अत्रापि रूढिरबाधिकेति वक्तुं शक्यत्वात् । वस्तुतस्तु योगरूढिरेषा । स्मृतिरूढेरुक्तत्वात् । तथाच परमार्थ वस्त्वपेक्षया अद्वैतमित्यर्थः ।

सलिल एको द्रष्टाऽद्वैतो भवति, एष ब्रह्मलोकः सम्राडिति होवाच ।

एषास्य परमा गतिः । एषास्य परमा सम्पत् । एषोऽस्य परमो लोकः । एषोऽस्य परम आनन्दः । एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीत्यादि श्रुतेः ।

किञ्च तावके पक्षे सार्वविभक्तिकस्तसिरिति परिभाषया प्रथमार्थे तसिः । मामके पक्षे तु पंचम्यास्तसिलिति सूत्रेण पंचम्यर्थे तसिल् । तथाच परिभाषाया गौणत्वेन मुख्यसूत्रार्थग्रहणस्यैवोचितत्वात् । अपि च सर्वभावानां मध्ये अद्वितीय इत्युक्त्या स्वातन्त्र्यमेव सिध्यति ।

नापि

'विकल्पो विनिवर्तेत कल्पितो यदि केनचित् ।
उपदेशादयं वादो ज्ञाते द्वैतं न विद्यते ॥'

इति श्रुतिर्मिथ्यात्वे मानम् । अत्रायमर्थः । विकल्पो विविधप्रकारः प्रपञ्चः यदि केनचित् अविद्यारूप दोषेण कल्पितः आरोपितः स्यात् तर्हि विनिवर्तेत । तस्मान्न केनचत् कल्पितः । ननु तर्हि कुतो मायावाद आरोपित इति प्रवादः? इत्यत आह उपदेशादिति । परम्परागत गृहगोष्ठीत इत्यर्थः। विशेषदर्शने सति कथमेतादृशोपदेशप्रवृत्तिरित्यत आह ज्ञात इति । 'विश्वं सत्यम्' 'यच्चिकेत सत्यमित् तन्न मोघम्' 'याथातथ्यतोऽर्थान् व्यदधात् शाश्वतीभ्यः समाभ्यः ।' 'सत्यकामः सत्यसङ्कल्पः' 'सन् घटः सन् पटः' 'वियदादिप्रपञ्चो विमतो वा परमार्थसन् प्रामाणिकत्वादर्थक्रियाकारित्वाच्च' इत्यादि प्रमाणैरबाध्यत्वेन ज्ञाते प्रमिते सति अकारप्रश्लेषेणाद्वैतं प्रपञ्चविषयकारोपितत्ववादो न विद्यते स्वात्मानं न लभत इत्यर्थः । न च विशेषादर्शनात् पूर्वं प्रवर्तमानो यादृशस्तादृशो व्यवहारः विशेषदर्शने सति प्रवर्तमानो दृष्टचर इति । नन्वकारप्रश्लेषस्यानुमानिकत्वात् कथमद्वैतमिति

पदच्छेद इति चेत् भेदस्योक्त बहुप्रमाण प्रमितत्वेन प्रामाणिक गौरवस्य सह्यत्वादिति । यद्वा अज्ञाते द्वैतं न विद्यत इत्यर्थपरत्वेनापि आचार्यैर्व्याख्यातत्वान्नोक्तदोष इति । अपि च

प्रभवः सर्वभावानां सतामिति विनिश्चयः ।
सर्वं जनयति प्राणश्चेतोंशून् पुरुषः पृथक् ॥

इति पूर्ववाक्ये सतामिति विशेषणेन सत्यत्वपरेण, पृथगित्यनेन भेदपरेण च विरोधः ।

किञ्चायं श्लोको यदि तर्काकारप्रदर्शनपरो न स्यात् तदा तस्मिन् श्लोके लिङ्प्रत्ययः, यदिशब्दः, यदिशब्द् नित्यसम्बन्धानुमितस्तर्हिशब्दश्चानुपपन्नः स्यात् । ननु तर्कस्याप्रमाणत्वादिष्टापत्तिरिति चेदवैहि, तर्कस्य विपर्यय पर्यवसानद्वारा अर्थबोधकत्वेन प्रमाणत्वादिति ।

(ब्रह्म वेद ब्रह्मैव भवतीति श्रुत्यर्थः)

अत्र केनचिदुक्तं ब्रह्म वेद ब्रह्मैव भवतीति श्रुतिरभेदे भेदस्यौपाधिकत्वे च प्रमाणमिति । तदपि न । उक्तश्रुतेर्भेदपरत्वेन व्याख्यातप्रायत्वात् । ब्रह्म वेद ब्रह्मज्ञानी ब्रह्मैव प्राप्नोतीत्यर्थपरत्वेन व्याख्याने बाधकाभावाच्च । धातूनामनेकार्थत्वाच्च । अन्यथा प्राप्त्यर्थक भूधात्वर्थस्तु त्वत्पक्षे अनुपपन्नः स्यात् । ब्रह्मणः स्वकर्मकज्ञानं विना स्वतः सिद्धत्वात् भेदज्ञानफलत्वानुपपत्तेश्च । ननु भूधातोः प्राप्त्यर्थकत्वे मानाभावात्, प्राप्त्यर्थकत्वे भवतीत्यत्र भवत इति च स्यात् । न चेष्टापत्तिः । परस्मैपदस्यानुपपन्नत्वादिति चेन्न। भूधातोः प्राप्त्यर्थकत्वस्य भू प्राप्ताविति स्मृतिसिद्धत्वेन प्रमितत्वात् । 'ब्रह्मैव सन् ब्रह्माप्नोति' 'ब्रह्मविदाप्नोति

परम्' इत्यादि श्रुत्यनुवादितया ब्रह्म वेदेति द्वितीयान्तस्येव, ब्रह्मैव भवतीति द्वितीयब्रह्मशब्दस्यापि द्वितीयांतस्यैव प्रत्यभिज्ञाया अविरोधाय ग्राह्यत्वाच्च । यदा पश्यः पश्यते इत्यत्रात्मनेपदस्येव, ब्रह्म वेद ब्रह्मैव भवतीत्यत्र परस्मैपदस्याप्युपपत्तेश्च । छन्दसि बहुलमिति सूत्राच्छान्दसत्वे बाधकाभावाच्च । परमं साम्यमुपैतीत्यत्र तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वरूपपरमसाम्य शब्दार्थः भवन्मते कथमुपपन्नः स्यात् । कर्मत्वावेदकद्वितीयाश्रुतेः उन्मत्तप्रलापसमत्वापाताच्च । ब्रह्म वेद ब्रह्मैव भवतीत्यत्र विशिष्टयोरभेदासंभवेन पदद्वयलक्षणापाताच्च । ब्रह्मैवेत्यत्रावधारणवैयर्थ्यं च भवेत् । ब्रह्म वेद ब्रह्म भवतीति एतावन्मात्रं श्रुतिशरीरं स्यादिति ।

अपि च भेदस्यौपाधिकत्वे सर्वोपाधिविनिर्मुक्त मुक्तिदशायां 'परं जोतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते । स तत्र पर्येति जक्षन् क्रीडन् रममाणः स्त्रीभिर्वा यानैर्वा' 'सोऽश्नुते सर्वान् कामान् सह' 'न यत्र माया किमुतापरे हरेरनुव्रता यत्र सुरासुरार्चिताः । श्यामावदाताः सुरुचः सुपेशसः' इत्यादिश्रुतिस्मृतिषु जीवानामवस्थानं च कथं स्यात् ।

> द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।
> क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ।
> उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ॥

इत्यत्र जीवेश्वरभेदं साक्षात्कुर्वत ईश्वरस्य भ्रान्तत्वापत्तेश्च ।

ननु 'यो वेद अहं ब्रह्मास्मीति स इदं सर्वं भवति' इति सर्वात्मकत्वे प्रमाणभूतायाः श्रुतेः का गतिरिति चेदवेहि । उक्तश्रुतेः सर्वात्मकत्वे दुःखात्मकत्वं जडात्मकत्वं च स्यात् ।

> यस्तु सर्वाणि भूतानि आत्मन्येवानुपश्यति ।
> सर्वभूतेषु चात्मानं ततो न विजुगुप्सते ॥

इत्यादिसर्वाधारत्वप्रतिपादकश्रुतिविरोधश्च भवेत् । सर्वाधारत्वस्य भेदघटितत्वात् । अपि चोक्त श्रुतौ अहंशब्दस्य ब्रह्मशब्दस्य सर्वशब्दस्य च लक्षणापातात् । तथा च भवदुक्तार्थस्त्वत्यन्तानुपपन्न इति ।

किञ्च भेदस्यौपाधिकत्वे जीवेश्वरभेदस्य स्वाभाविकत्वनियमोऽपि भवन्मतेऽनुपपन्न एव । उक्तव्याप्तेर्महारजनपटे उपाधिज्ञाप्य पटान्तर भेदस्य स्वाभाविकत्वेन तत्र व्यभिचारस्य पूर्वमेवावेदितत्वात् न किंचिदेतत् ।

(यद् द्वैतं न पश्यतीति श्रुत्यर्थः)

नापि

> 'यद् द्वैतं न पश्यति । पश्यन् वै तन्न पश्यति । नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते । अविनाशित्वात् । न तु तद् द्वितीयमस्ति । ततोऽन्यद् विभक्तं यत् पश्येत् ।'

इति श्रुतिरभेदे मानम् । पूर्वत्र हि 'शुक्लस्य नीलस्य पिङ्गलस्य हरितस्य लोहितस्य पूर्णाः' इति नाडीस्थभगवद्रूपाणां विलक्षणरूपवत्वमुक्तम् । तेन तद्रूपाणां भेदः प्राप्तः । तन्निरासार्थमत्र अभेद उच्यते । हृदयं ब्रह्मेत्यारुणिरिति श्रुत्या हृद्ययनयोगेन च पूर्वत्र हृदयशब्देन निर्दिष्टं ब्रह्म यत् स्वरूपादिकं द्वैतं स्वस्माद् भिन्नं न पश्यति तत् द्वितीयं नास्ति । द्वितीयत्वेन नास्ति । कुतः ? पश्यन् सर्वज्ञ एव सन् ईश्वरो न तत् पश्यति । न च द्रष्टुर्दृष्टेर्विपरिलोपो बाधो विद्यते नित्यत्वात् । यत्तु जीवजडादिकं स्वस्माद् विभक्तं पश्येत् तत् ततोऽन्यत् इत्यर्थकरणस्यैव स्वरसत्वात् ।

न च यद्वैतमिति यच्छब्दस्य तदिति व्यवहित तच्छब्देनान्वयस्यैव दोषत्वात् एवमर्थकरणमनुपपन्नमिति वाच्यम्। यत्तच्छब्दयोः साकाङ्क्षत्वात् आकाङ्क्षायाः सन्निधानापेक्षया बलीयस्त्वात् दूरस्थान्वयोऽपि स्वरस एव। अत एवोक्तमानन्तर्यमचोदनेत्यधिकरणे । दर्शपूर्णमासयोः 'हस्तावनेनिक्ते, उलपराजिं स्तृणाति' इति ज्योतिष्टोमे 'मुष्टीकरोति, वाचं यच्छति, दीक्षितमावेदयति' इति च श्रुतम्। तत्र हस्तावनेजनादेरनन्तरपठितोलपराज्यास्तरणदीक्षितावेदनमात्रांगत्वमानन्तर्यलक्षणक्रमकल्पितावान्तरप्रकरणसद्भावात् । तथा चावान्तर प्रकरणकल्पितवाक्यवशात् महाप्रकरणस्य बाध इति पूर्वपक्षं प्रापय्य सिद्धान्तितं, महाप्रकरणे जाग्रति सन्निधेरवान्तरप्रकरणादेरकल्पकत्वात्, प्रकरणेन पिण्डकरणवाग्विसर्जनपूर्वभावि सर्वकर्माङ्गं तदिति सन्निधिरकिञ्चित्कर इति। अत एवोक्तं आनर्थक्यात्तदङ्गेषु इत्यस्मिन्नधिकरणे सिद्धान्ते 'अव्यवहितान्वयादि अनादृत्य व्यवहितान्वय एव स्वीकृतः' इति ।

किञ्च त्वत्पक्षे श्रुतौ यद् विभक्तं तन्नास्तीत्येतावतैव पूर्णत्वेन शेषवैयर्थ्यं भवेत् । तथा च व्यवहितान्वय एव सुवच इति । अत एवोक्तं द्रव्यं चोत्पत्तिसंयोगादित्यधिकरणे सिद्धान्ते स्फ्येनोद्धन्तीत्यादि वाक्यानां बहूनामानर्थक्यापत्त्या यज्ञायुधवाक्यमनुवादकम् । तथाच बहूनामनुग्रहो न्याय्य इति ।

किञ्च कथञ्च त्वत्पक्षे नित्ये चैतन्यमात्रे नहि द्रष्टुर्दृष्टेर्विपरिलोपो, नहि घ्रातुर्घ्रातेर्विपरिलोपो, नहि स्प्रष्टुः स्पृष्टेर्विपरिलोप इत्यादिनोक्तं द्रष्टृत्व-घ्रातृत्व-स्प्रष्टृत्वादिकं द्रष्ट्रादिसम्बन्धश्चोपपन्नः स्यात्? पूर्वत्र 'यथास्मिन्नाकाशे श्येनो वा सुपर्णो वा विपरिपत्य श्रान्तः संहत्य पक्षौ संलयायैव ध्रियते एवमेवायं पुरुषः' इति, 'तद्यथा प्रियया स्त्रिया सम्परिष्वक्तो न बाह्यं किंचन वेद नान्तरं एवमयं पुरुषः' इति भिन्नस्त्रीपुरुषादिदृष्टान्तोक्तिः प्राज्ञेनात्मना सम्परिष्वक्त इति जीवेशभेदोक्तिश्चानुपपन्ना भवेदिति ।

(ऐक्यस्य ब्रह्माभेदायोगः)

वस्तुतस्तु- श्रुत्या प्रतिपाद्यमानमैक्यं आत्मस्वरूपं वा, उत भिन्नं वा? नाद्यः- पर्यायत्वमेकतरपरिशेषापत्तिः स्यात् । सापेक्षस्यैक्यस्य निरपेक्षस्वरूपत्वायोगाच्च ।

किञ्च आत्मनः स्वप्रकाशस्याविद्यादिसाक्षित्वेन सदा प्रकाशमानत्वेन शास्त्रवैयर्थ्यापातात् ।

किञ्च ऐक्यं शुद्धचिन्मात्रयोः स्वरूपम् उत एकैकस्वरूपम् । नाद्यद्वितीयौ अभेदासिद्धेः। अभेदप्रतिपादकश्रुतीनां वैयर्थ्यापाताच्च। अभेदस्य ब्रह्मस्वरूपत्वेन सत्यं ज्ञानमनन्तमित्यादिश्रुत्यैव तस्य प्रतिपादितत्वाच्च । नापि सत्तैक्यं अभेद इति । घटपटयोरिव सत्तैक्येऽपि भेदः स्यात् । नापि अतिरिक्तसत्ताशून्यत्वम् । भेदेऽपि उक्तलक्षणसम्भवात् । स्वरूपसत्तामादाय पदार्थभेदसम्भवाच्च। सत्ताभावादेव प्रपञ्चस्य मिथ्यात्वे ब्रह्मणोऽपि मिथ्यात्वं स्यात् ।

ननु ब्रह्मसत्ताव्यतिरिक्तसत्ताशून्यत्वं प्रपञ्चस्य ब्रह्माभेद इति चेन्न । तत्किं प्रपञ्चस्य ब्रह्मात्यन्ताभावो वा? उत स्वरूपमेव वा? उत सत्यपि स्वरूपे पृथक् सत्ता नास्ति? यद्वा सा तात्विकी नास्ति? नाद्यः- नेह नानेति वाक्यैः निषेधो नोपपद्यते । श्रुतौ येनाश्रुतमिति विरुध्येत ।

उत्पादादिप्रत्ययस्य निरालम्बनत्वं च प्रसज्येत। द्वितीये तु येनाश्रुतं श्रुतमिति कथं सङ्घटेत। उत्पादादिप्रत्ययस्य निरालम्बरूपदूषणमनुवर्तेत। न तृतीयश्च। स्वरूपस्य पार्थक्ये तदात्मिकायाः सत्तायाः अनिवारणात्। न च तार्किकमत इव परमतेऽपि स्वरूपातिरिक्तसत्ताभ्युपेयते। अन्यथा ब्रह्मणोऽपि च सत्वापत्तिः। ब्रह्मसत्तैव तत्तदवच्छिन्ना सर्वं निर्वहतीति कथने हि स्वरूपपार्थक्यं दुर्निवारमेव। अन्यथा सा केनावच्छिद्येत।

सत्यपि सा न तात्विकीति चरमोऽप्यनुपपन्नः। यादृशी ब्रह्मणः सत्ता तादृशी प्रपञ्चस्येति विश्वं सत्यमित्यादिनावगमात्। सत्यं ज्ञानमनन्तं, विश्वं सत्यमित्यनयोः श्रुत्योः न कश्चन विशेषोस्ति।

प्रपञ्चे व्यावहारिकं सत्यत्वं, ब्रह्मणि तु तात्विकं शुक्तिरजते तु प्रातिभासिकमिति सत्तात्रैविध्याङ्गीकारादिति चेत्। अद्यापि विभागस्यासिद्धेः। किञ्च अयं विभागः न तात्विकः। ब्रह्मैव तात्विकमित्यस्य भङ्गात्। नापि अतात्विकः। तात्विकस्य ब्रह्मणोऽतात्विकात् शुक्तेरूप्यादेरिव बाधगम्यस्य विभागस्य तात्विकत्वावश्यम्भावात्। अन्यथा विभागश्रुतेरतात्वावेदकत्वं स्यात्। एवं चायं विभागः सत्यश्चेत् अपसिद्धान्तः स्यात्। मिथ्या चेत् कृतकृत्योहम्।

किञ्च नापि त्रैविध्यम्। स्वाप्नशुक्तौ अध्यस्तस्य रजतादेः सङ्ग्रहाय प्रातिभासिकादपि निकृष्टसत्वमङ्गीकर्तव्यमिति चातुर्विध्यं स्यात्।

ननु प्रपञ्चस्य ब्रह्माभिन्नत्वं नाम एकमेवाद्वितीयमित्यादिश्रुत्या ब्रह्मव्यतिरेकेणासत्वमिति चेत्। अत्र ब्रूमः- सदेव सौम्येति वाक्येन

सदभेदमुक्त्वा पुनः तन्निषेधे व्याहतेः। द्वितीयाभावस्य सत्वासत्वाभ्यां व्याघाताच्च। सलिल एको द्रष्टाऽद्वैतो भवत्येष ब्रह्मलोकः सम्राडिति होवाच एषास्य परमा सम्पत्। एषोस्य परमो लोकः एषोस्य परम आनन्दः एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीति भेदप्रतिपादकसमाख्याश्रुतिविरोधाच्च। अद्वितीयपदेन द्वितीयमात्रनिषेधात् एकपदैवपदयोर्वैयर्थ्यापाताच्च। ब्रह्मव्यतिरेकेण नासीदिति ब्रह्माभिन्नत्वशब्दार्थोक्तौ स्वर्गी ध्वस्त इतिवत् सविशेषणे हीति न्यायेनोक्तरीत्या प्रपञ्चस्यापि सत्वसिध्या एतन्निषेधायोगात्। अतिरिक्तसत्वरूपविशेषणनिषेधेन सदभिन्नत्वापाताच्च।

नापि य इह नानेव पश्यति मृत्योस्स मृत्युमाप्नोतीति श्रुतिरपि अभेदे मानम्। उक्तश्रुतेः इह ब्रह्मणि वस्तुतोऽत्यन्तभिन्नं जगत् नानेव भिन्नमिव यथा राजनि राजानमिव पश्यति स मृत्योः सकाशात् मृत्युमाप्नोतीत्यर्थः। अन्यथा इवशब्दवैयर्थ्यापत्तिरिति।

(भेददुर्निरूपत्वभङ्गः)

नन्वस्तु यथाकथञ्चिद् भेदः। स च दुर्निरूप एव। तथाहि- स च भेदः किं स्वरूपमुत धर्मः। नाद्यः- निरपेक्षत्वाद्यापातात्। नान्त्यः- अनवस्थाद्यापत्तेः। कुम्भस्य स्तम्भात् भेदप्रतीतौ स्तम्भस्य कुम्भात् भेदधीरित्यन्योन्याश्रयादिति चेत् अत्र वदन्ति-

किं भेदप्रतीतिरेव नास्तीत्युच्यते, किं वा कारणजन्या नेति। यद्वा बाध्यविषयेति। नाद्यः। भेदभ्रमनिरासाय तव वेदान्तश्रवणादिकं न स्यात्। भेदाप्रतीतौ बहुयत्नैस्तन्निरासायोगाच्च। स्वपक्ष परपक्ष भूषण-

दूषणादेर्भेदाप्रतीतौ बहुविप्लवापत्तेश्च । भेदः स्वरूपं धर्मो वेति विकल्पायोगाच्च । नहि अप्रतीते विकल्पाः सम्भवन्ति । न द्वितीयः । तत्र पृच्छामः. कारणाजन्यत्वमजन्यत्वेन वा अकारणजन्यत्वेन वा । न प्रथमः- भेदप्रतीतेर्नित्यत्वापत्तेः । न चेष्टापत्तिः - स्वविरुद्धाचरणं भवेत् । न चरमः- व्याहतेः । जनकस्यैव हेतुत्वात् ।

न तृतीयः- भेदस्य बाध्यत्वनिश्चयः किं श्रुत्यादिना उत शुष्क-तर्कादिना । न प्रथमः- तासां श्रुतीनां भेदपरत्वेन व्याख्यातत्वात् । भेद-प्रतिपादक नाहमीश्वर इति साक्षिप्रत्यक्षादिविरोधेन तासां अभेद-परत्वासम्भवाच्च । न चरमः- ऐक्यस्यापि ब्रह्मस्वरूपत्वे निरपेक्षत्वादिकं स्यात् धर्मत्वे अद्वैतहानिरित्यादि तर्कबाधस्य समत्वात् ।

वस्तुतस्तु- निरपेक्षघटादिस्वरूपत्वे भेदस्य निरपेक्षत्वं स्यादिति दूषणमनुपपन्नमेव । उक्तव्याप्तेः स्वपरासम्मतेः । त्वन्मते सापेक्षाया अपि अविद्यानिवृत्तेः जीवब्रह्मैक्यस्य च निरपेक्षब्रह्मस्वरूपत्वात् व्याप्त्यभावेना-नुमानस्याभासत्वात् ।

न च ऐक्यं न स्वरूपम् । किन्तु भिन्नमेवेति शङ्क्यम् । भिन्नमैक्यं सत्यं मिथ्या वेति। आद्ये अद्वैतहानिः । द्वितीये तु अहं ब्रह्मास्मीत्यादि-वाक्यानामतत्वावेदकत्वं भवेत् । तत्वावेदकत्वं च भेदवाक्यानाम् । लाघवेन प्रतियोगितात्विकत्वे अभावबाध्यत्वस्यैव नियामकत्वात् ।

ननु ऐक्यं निरपेक्षमेवेति चेन्न। तथात्वे तत्वंपदार्थपराणां सत्यं ज्ञानं विज्ञानघन इत्यादीनामैक्यपरवाक्यैकवाक्यत्वाभावेन वैयर्थ्यं स्यात् ।

न च शङ्क्यं प्रतियोगिनो भेदस्य सापेक्षत्वादैक्यमपि सापेक्षमिति ।

घटः पटो नेति नञर्थस्य भेदस्यैव तादात्म्यनिषेधत्वेन वैपरीत्यस्यापि स्वरसत्वात् ऐक्ये भेदसापेक्षत्वस्य दुर्वारत्वात् ।

केचित्तु- प्रतीत्योरेव सापेक्षत्वनिरपेक्षत्वे इति तयोरेव भेदः । नतु तद्विषयस्य । एकस्मिन्वह्नौ व्याप्तिज्ञानसापेक्षनिरपेक्षानुमाप्रत्यक्ष-विषयत्वदर्शनादित्याहुः । तन्न । प्रकृतेऽपि समत्वात् । तथाचाज्ञान-निवृत्तिवत् तद्भेदस्यापि सापेक्षत्वं घटते ।

यदि च स्वरूपेण निरपेक्षस्य ब्रह्मणः अभेदत्वेन सापेक्षत्वं तर्हि निरपेक्षस्यापि तस्य भेदत्वेन सापेक्षत्वं कुतो न भवेत् ।

यदि चाभेदत्वादिकमेव सापेक्षं नत्वभेदरूपो विशेष्य इति । तुल्यम् ।

ननु तथात्वे अन्योन्याभाव एव भेदो भवेदिति चेत् इष्टापत्तेः । अभावस्य भावैक्यं तु कथमिति चेत् अद्वैतस्य अविद्यानिवृत्तेश्च यथा ब्रह्मैक्यं तथा जानीहि । भावः स्वाभावेन विरुद्धो नत्वन्याभावेनेति चेत् समं प्रकृतेऽपि ।

तस्मात् रमाब्रह्मेशानादिनिखिलामरवन्दितचरणनलिनं प्रपञ्चभिन्नं सच्चिदानन्दशरीरं नारायणाख्यं परं ब्रह्म सविशेषमिति वैदिकः पन्थाः ।

(सगुणब्रह्मसिद्धिः)

ननु सविशेषब्रह्मणि मानाभाव इति चेत्, अत्र ब्रूमः - सगुणमेव ब्रह्म। न च तत्र प्रमाणाभाव इति वाच्यम् ।

सत्यकामः सत्यसङ्कल्पः ।

अथ कस्मादुच्यते ब्रह्मेति बृहन्तो ह्यस्मिन् गुणाः ।

ज्ञानं नित्यं क्रिया नित्या बलं नित्यं परात्मनः ।

परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च ।

सत्यस्सोऽस्य महिमा ।

एष नित्यो मिहमा ब्राह्मणस्य ।

अपहतपाप्मा विजरो विमृत्युः ।

यः सर्वज्ञः सर्ववित् । एष सर्वेश्वरः ।

इत्यादिश्रुतीनां,

मय्यनन्तगुणेऽनन्ते गुणतोऽनन्तविग्रहे

इत्यादिस्मृत्यादीनाम्,

अदृश्यत्वादिगुणको धर्मोक्तेः । सर्वधर्मोपपत्तेश्च ।

अन्तस्तद्धर्मोपदेशात् ।

इत्यादिसूत्राणां च तत्र प्रमाणत्वादिति ।

अत्र मायिनः- सत्यकामश्रुतौ सत्यकामत्वादिविशिष्ट एव विधितात्पर्यात् सत्यकामत्वादिगुणानां सिद्ध्यभावात् ज्ञानादिश्रुतौ मिथ्याभूतानामेव गुणानां प्रतिपादनमित्याहुः ।

अत्र ब्रूमो वयम्- यादाग्नेयोऽष्टाकपालोऽमावास्यायामित्यत्रापि अष्टकपालादीनामपि सिद्धिर्न स्यात् । तत्रापि विधेः कपालादिविशिष्टयाग एव तात्पर्यात् ।

यदि च कपालादीनामपि आर्थिकविधिस्वीकारात् तत्सिद्धिरिति मन्यसे तदा प्रकृतेऽप्यार्थिकविध्यङ्गीकारेण कुतो न तत्सिद्धिः ।

यच्चोक्तम्- ज्ञानादिश्रुतौ मिथ्याभूतानामेव गुणानां प्रतिपादनमिति । तन्न । तत्र तेषां मिथ्यात्वविरोधिसत्यत्वनित्यत्वस्वाभाविकत्वश्रवणात् । अन्यथा ब्रह्मणोऽपि उक्तरीत्या मिथ्यात्वापातात् । एवमैक्यस्यापि मिथ्यात्वं दुर्वारम् ।

नच वाच्यं नित्यादिपदानां प्रवाहतो नित्यत्वं बहुकालावस्थायित्वं वार्थ इति। मुख्यार्थत्यागेनामुख्यार्थस्वीकारे प्रमाणाभावात् मुख्यार्थस्यैव प्रथमप्रतीतत्वाच्च ।

अत एवार्थाभिधानसंयोगादित्यधिकरणे बर्हिर्देवसदनं दामीत्यादिमन्त्राणां मुख्यार्थबर्हिर्लवन एव विनियोग उक्तः ।

ननु साक्षी चेता केवलो निर्गुणश्च इति श्रुत्या गुणनिषेधाय सत्यकामादिश्रुतिभिरनुवादः क्रियते इति चेन्न । मानान्तरेण गुणानामप्राप्तेरनुवादासम्भवात् ।

नच तत्र प्रत्यक्षस्याप्रसरेऽपि अनुमानेन प्राप्तिर्भवेदिति शङ्क्यम् । तस्य कामचारित्वेन प्रमापकत्वाभावात् । अन्यथा अनुभूतिर्न नानाऽनुभूतित्वादित्याद्यनुमानैरैक्यस्यापि प्राप्तिसम्भवेन ऐक्यश्रुतीनां भेदश्रुतिभिः निषेधायानुवादकत्वापातात् ।

ननु कया श्रुत्या प्राप्तस्य कया श्रुत्या अनूद्य निषेध इति चेन्न। श्रुत्या प्राप्तस्य श्रुत्यानूद्य निषेधायोगात् । अन्यथातिप्रसङ्गात् । सत्यं ज्ञानमित्यनेन प्राप्तं ब्रह्म सदेव सोम्येदमित्यनेन अनूद्य, असद्वा इदमग्र आसीदित्यादि श्रुत्या निषिध्यत इति किं न स्यात् । तथाच न गुणानुवादः ।

किञ्च यदाहवनीये जुहोति पदे जुहोतीति सामान्यविशेषन्यायेन

गुणवाक्यानां विशेषविषयत्वेन बलवत्वात्। निर्गुणवाक्यस्य च सत्वादिगुणनिषेधविषयत्वेन सावकाशत्वेन दुर्बलत्वात्।

किञ्च नोद्यन्तमादित्यमुदीक्षेत। यूपस्य स्वरुं करेति। उच्चैर्ऋचा क्रियते इत्युपक्रमन्यायेन सगुणश्रुतेरेव बलीयस्त्वाच्च।

ननु निर्गुणवाक्यस्य निषेधवाक्यत्वादेव बलीयस्त्वमिति चेन्न। तथा सति न गिरा गिरेति ब्रूयादिति वाक्यस्य ऐरं कृत्वोद्गायेदिति वाक्याद् गेहे घटो नास्तीति वाक्यस्य वस्तुतः घटवत्यपि तस्मिन् घटोऽस्तीति वाक्यात् बलीयस्त्वं स्यात्। अतो न निषेधवाक्यत्वं प्राबल्ये प्रयोजकमिति।

केचित्तु- जर्तिलादिन्यायेन सगुणवाक्यं प्रसञ्जकमित्याहुः। तन्न। तत्र हि जर्तिलादेः होमसाधनत्वं न प्रसज्यते। तथात्वे भ्रान्तवाक्यवद्-प्रामाण्यप्रसङ्गात्। किन्तु जर्तिलादिवाक्यस्य विधायकत्वे अनाहुति-वाक्यस्य निषेधरूपत्वापत्त्या वैयर्थ्यप्रसङ्गात्। नचार्थवादस्य विकल्प एव फलमिति वाच्यम्। अजाक्षीरेण जुहोतीति पयसा जुहोतीति द्रव्यान्तरविधानादेव तत्सिद्धेः। तस्मात् अनाहुतिवाक्यस्य जर्तिलादि-निन्दाद्वारा पयःस्तावकत्वेन प्रयोजनं वाच्यम्। तत एव जर्तिलादिवाक्यस्य पयस्स्तुत्यर्थवादत्वमेव स्वीकर्तव्यम्। नन्वेवमपि जर्तिलादिवाक्यस्य होमसाधनत्वरूपमुख्यार्थप्रतिपादनद्वारा अर्थवादत्वं वक्तव्यमिति प्राप्तमेवासदर्थप्रतिपदाकत्वेन प्रसञ्जकत्वमिति चेन्न। होमविध्याक्षिप्त-पाक्षिकसाधनत्वानुवादद्वारा निगदत्वेन स्तावकत्वोपपत्तेः।

नचैवमपि रुद्ररोदनादिवाक्ये अत्यन्तासतः रुद्ररोदनस्य प्रतिपादनेन प्रसञ्जकत्वमिष्टमिति वाच्यम्। 'तस्माद् बर्हिषि रजतं न देयम्' इति स्पष्टविधिप्रत्ययस्य निषेधशेषत्वात् विध्यन्तरानाश्रयणाच्च रोदनरूप-विध्यनर्हार्थप्रतिपादकत्वाच्च स्वार्थतात्पर्यं हित्वा असदर्थालम्बनेन बर्हिषि रजतदान निन्दायामेव तात्पर्यावधारणात् नाप्रामाण्यम्। इह तु सगुणादि-वाक्ये निर्गुणश्चेति निषेधवाक्यवत् अज्ञातज्ञापकत्वलक्षणविधेः सम्भवेन तच्छेषत्वे मानाभावात्।

ननु गुणानामुपास्यत्वेन मिथ्यात्वं स्वीक्रियत इति चेन्न। तर्हि आत्मेत्येवोपासीतेति आत्मनोऽपि उपासाविषयत्वेन मिथ्यात्वापत्तेः। किञ्च त्वयापि ऐक्यस्यानादिस्वरूपभूतगुणस्य आनन्दादयः प्रधानस्ये-त्यधिकरणे उपास्यत्वेन स्वीकृतस्य मिथ्यात्वापातात्। न चेष्टापत्तिः। अपसिद्धान्तात्।

नन्वेवमपि मृण्मयेन प्रतिष्ठाकामस्य प्रणयेदित्यत्र प्रणयनवत् गुणाना-मुपासनार्थत्वेन स्वार्थे तात्पर्याभावान्न तत्सिद्धिरिति चेदवेहि। यूपे पशुं नियुञ्जीतेत्यत्र यूपस्य पशुनियोजनार्थत्वेऽपि तस्य स्वरूपसिद्धिवद् गुणानामुपासनार्थत्वेऽपि स्वरूपसिध्या मिथ्यात्वासिद्धिः। अन्यथा अभेदस्यापि उपासनार्थत्वेन त्वन्मते असिद्धिप्रसङ्गात्। उपासना-निर्मुक्तवाक्यप्रतिपाद्यत्वस्य गुणेष्वपि विशिष्य भावात्।

न चाणुत्वमहत्वादिविरुद्धधर्माणामपि कथनात् न तत्र तात्पर्यमिति शङ्क्यम्। तावता तन्मात्रासिद्धावपि यत्र न विरोधः तत्सिध्यनपायात्। न हि उपासनाविषय इत्येतावता आरोपित इति वक्तुं शक्यम्। प्रामाण्यस्य उत्सर्गतः आवयोर्मते स्वतस्त्वात्।

न च निषेधवाक्यैकवाक्यतायां वाक्यभेदाभावात् तथोक्तिरिरिति मन्तव्यम् । गुणतन्निषेधवाक्यानां सामान्यनिषेधन्यायैरविरोधं सम्पाद्य ब्रह्मपरवाक्यैकवाक्यतासम्भवेन निषेधवाक्यैकवाक्यताया एवाननु-सरणीयत्वात् ।

ननु गुणतन्निषेधवाक्यानां कथं एकवाक्यतेति चेत् उभयाविरोधाय निषेधवाक्यानां हेयगुणनिषेधपरताया उररीकरणात् ।

(निर्विशेषवाक्यानां मीमांसोक्त सन्दंशन्यायविषयत्वम्)

ननु नान्तःप्रज्ञं न बहिःप्रज्ञं नोभयतःप्रज्ञं न प्रज्ञानधनं न प्रज्ञं नाप्रज्ञम् अदृष्टमव्यवहार्यमलक्षणमचिन्त्यमव्यपदेश्यमैकात्म्यप्रत्ययसारं प्रपञ्चोप-शमं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेय इति श्रुतिरेव निर्विशेषे मानमिति चेन्न । उपक्रमे प्रभवः सर्वभावानां आत्मकामस्य का स्पृहा, इत्यादिना सर्वकर्तृत्वपूर्णकामत्वादेः, उपसंहारे स आत्मा स विज्ञेय इत्यादिनादानादिकर्तृत्वस्य ज्ञेयत्वस्य च श्रवणात् अभिक्रामं जुहोतीति-वत् सन्दंशन्यायेनोक्तश्रुतेः सविशेषविषयत्वस्य स्वीकारात् ।

न च वाच्यं प्रभवः सर्वभावानामित्यत्रोक्तानां सर्वकर्तृत्वादीनां मिथ्या-त्वमेव किं न स्यादिति। सतामिति श्रवणात् न भावानां मिथ्यात्वम् । किञ्च उत्तरत्रोक्तार्थसम्मतित्वेन उदाहृतेषु मन्त्रेषु,

निवृत्तेः सर्वदुःखानामीशानः प्रभुरव्ययः ।
अद्वैतः सर्वभावानां देवस्तुर्यो विभुः स्मृतः ॥

इत्यत्र ईशानत्वप्रभुत्वाव्ययत्वक्रीडादिगुणविशिष्टत्वविभुत्वादीनां धर्माणां श्रवणात् तद्विरोधापत्तेः । न चेदं श्रवणं न चतुर्थ इति शङ्क्यम् । तत्र

तुरीयपदश्रवणात् चतुर्थस्यैव विशेषणत्वम् । किञ्च परमोपक्रमे ओमित्ये-तदक्षरमिति पूर्णत्वाक्षरत्वयोः, मध्ये एष सर्वेश्वर एष सर्वज्ञः इति सर्वेश्वरत्वादेश्च, परमोपसंहारे

प्रणवं हीश्वरं विद्यात् सर्वस्य हृदये स्थितम् ।
सर्वव्यापिनमोङ्कारम् ।

इत्यत्र सर्वहृदयावस्थितत्व सर्वव्यापित्वादिधर्माणां श्रवणाच्च कथं निर्विशेषत्वम् ।

अपि च पूर्वं विश्वतैजसप्राज्ञानां नारायणरूपाणां सविशेषत्वश्रवणात् भगवच्चतुर्थरूपस्यापि सविशेषत्वमेव। अन्यथा प्रायपाठविरोधापातात् ।

न च विश्वादिपदानां जीवपरत्वादिति वाच्यम् । एष सर्वेश्वर इति वाक्यशेषे सर्वेश्वरत्वादिविशेषणात् ।

ननु ईश्वरत्वस्य प्राज्ञानन्तरपठितस्य तत्र भगवद्रूपताज्ञापकत्वेऽपि विश्वतैजसयोः कथं तज्ज्ञापकत्वमिति चेन्न । यथा देवस्त्वा सविता पुनातु इत्यनन्तरं पठितस्य अच्छिद्रेणेत्यस्य मन्त्रस्य पूर्वत्र श्रूयमाणयोः चित्पतिस्त्वा पुनातु वाक्पतिस्त्वा पुनातु इत्यनयोरन्वयः तथा प्रकृतेऽपि पूर्वत्राप्यन्वयोपपत्तेः त्रयाणामपि भगवद्रूपत्वमिति अङ्गीकरणीयम् । सप्ताङ्गत्वैकोनविंशतिमुखत्वस्थूलभुक्त्वविविक्तभुक्त्वानन्दमयत्व-चेतोमुखत्वप्रज्ञानघनत्वादीनां जीवे असंभावितानां धर्माणां श्रवणाच्च ।

नन्वेवमपि प्राज्ञरूपानन्तरम् एष सर्वेश्वर इति वाक्यश्रवणात् तस्यैव भगवद्रूपत्वमिति चेन्न। सोयमात्मा चतुष्पादित्युपक्रमवाक्ये आत्मानमुद्दिश्य चतुष्टयत्वविधानेन प्राप्ततया चतूरूपाणां भगवद्रूपत्वाविशेषात् । किञ्च

सप्ताङ्गत्वैकोनविंशतिमुखत्वादिभगवद्धर्माणां रूपत्रयेऽपि श्रवणात्। तर्हि नान्तःप्रज्ञमिति श्रुतेः कोर्थ इति चेत् भाष्योक्तरीत्या द्रष्टव्यः। अन्तः-प्रज्ञमेवेति न, किन्तु बहिःप्रज्ञमपीत्यादिरूपेणार्थान्तरस्य वा वक्तुं सुकर-त्वेन सविशेषत्वस्यापरिहार्यत्वादिति अलम्। तस्मात् भगवतो नारा-यणस्य सविशेषत्वे अनन्तकल्याणपूर्णत्वे न किञ्चिद् बाधकमिति।

केचित्तु- अथातो ब्रह्मजिज्ञासेत्यादिसूत्राण्येव निर्विशेषे प्रमाणानि इत्याहुः।

अत्र वयं ब्रूमः- तव मते अथातो ब्रह्मजिज्ञासेत्यत्र ब्रह्मशब्दार्थः देशतः कालतः वस्तुतः अपरिच्छिन्नत्वम्। मम मते तु देशतः कालतः गुणतश्च पूर्णत्वमिति। तथाच आद्यं सूत्रं कथं निर्विशेषे प्रमाणम्। चिन्मात्रस्य निर्विशेषत्वे जिज्ञासाविषयत्वं न स्यात्। एवं द्वितीयमपि सूत्रम्। आवयोर्मते जन्मादिकारणत्वलक्षणस्य तत्र प्रतिपादनात्। परं तु इयान् विशेषः- त्वन्मते कारणत्वं तटस्थलक्षणम्। मन्मते स्वरूप-लक्षणमिति। तथाच कथं तत्र मानमिति। एवं तृतीयमपि सूत्रं शास्त्रयोनित्वं कथं तत्र मानम्। तव मते तस्य शास्त्रकारणत्वमर्थः। मामके मते तु ज्ञप्तिकारणत्वम्। एवं चतुर्थमपि तत्तुसमन्वयादिति, तत्र कथं मानम्। आवयोर्मते समन्वयप्रतिपादनात्। तत एवं ईक्षतेर्नाशब्दम् इति पञ्चममपि सूत्रं न निर्विशेषे प्रमाणम्। तत्र ईक्षणकर्तृत्वं तावके मते। मामके मते तु तत्कर्मत्वमर्थः। एवमुत्तरसूत्रेष्वपि अन्तस्थत्वादिधर्माणां कथनात् कथं ब्रह्मसूत्राणि निर्विशेषे प्रमाणम्।

ननूक्तसूत्राणि शाखाग्रे चन्द्रमेतिवत् सविशेषब्रह्मद्वारा निर्विशेषे प्रमाणानि। इयांस्तु विशेषः- सविशेषब्रह्मणि अवान्तरतात्पर्यं, निर्विशेषे

महातात्पर्यम्। महातात्पर्यविषयीभूतस्यैव सत्यत्वमिति चेन्न। दृष्टान्ते शाखाग्र चन्द्रमसोरुभयोरपि प्रत्यक्षसिद्धत्वात् तत्र द्वारद्वारिभावस्योपपन्न-त्वेऽपि दार्ष्टान्तिके द्वारिणो निर्विशेषस्याद्याप्यसिद्धेः न तत्र तात्पर्यम्। किञ्च यत् तात्पर्यविषयीभूतं तत्सत्यमिति व्याप्तेरेव लघीयस्त्वात् सविशेषब्रह्मण एव सत्यत्वस्य सुवचत्वात्।

वस्तुतस्तु- श्रुतितात्पर्यविषयत्वस्यैव लाघवेन तात्विकत्वप्रयोज-कत्वम्। न तु महातात्पर्यविषयत्वस्य गौरवात्। अन्यथा प्रयाजाद्यङ्ग-वाक्यानां स्वार्थे तात्पर्याभावेन प्रयाजाद्यङ्गासिद्धिप्रसङ्गात्। तस्मान्निर्वि-शेषं ब्रह्माख्यं वस्तु गगनकुसुमायमानं भवेत्। एतेन कस्यचित् प्रलपितं तात्पर्याभावेऽपि मानान्तराविरोधमात्रेण वस्तुसिद्धिरिति निरस्तम्। तात्पर्याभावेऽपि मानान्तराविरोधमात्रेण तत्सिद्धौ जर्तिलयवाग्वा वा जुहुयादित्यादिवाक्यैः जर्तिलयवाग्वादिहोमकर्तव्यताया अपि सिद्धि-प्रसङ्गात्। तस्मात् सविशेषं ब्रह्म प्रामाणिकम्।

केचित्तु- सत्यज्ञानादिवाक्यानां समानाधिकरणतया सामानाधि-करण्यस्य चाभेदविशिष्टार्थतया सत्यत्वज्ञानत्वविशिष्टयोरभेदे विशेषण-योरप्यभेदापत्त्या चिन्मात्रलक्षकतया अखण्डार्थत्वान्न गुणेषु तात्पर्य-मित्याहुः। तन्मन्दम्। एवं सति सविशेषवाक्यानामपि समानाधिकरण-तया उक्तदोषसाम्यात् अखण्डार्थतापत्तिः। इष्टापत्तिरिति चेत् सार्वज्ञ्यादिगुणविशिष्टेश्वरासिद्धिप्रसङ्गः। इष्टापत्तिरिति चेदप-सिद्धान्तप्रसङ्गः।

ननु अनुमानेन तत्सिद्धिरिति चेन्न। अनुमया तदभावस्यापि सिद्धि-सम्भवस्य सुवचत्वात्। किञ्च श्रुत्युक्तं बहुगुणविशिष्टस्यानुमानेन

सर्वथासिद्धेः ब्रह्मणापि वक्तुमशक्यत्वात् । निर्विशेषप्रमाणाभावस्य पूर्वमेवावेदितित्वाच्च । निर्विशेषशब्देन सविशेषत्वस्यैव प्राप्तेश्च ।

किं च सविशेषज्ञानं निर्विशेषज्ञानार्थमिति त्वदीयं मतम् । तच्च न सम्भवति । तथाहि- निर्विशेषशब्देन विशेषाभावविशिष्टमुच्यते, उत विशेषाभावोपलक्षितम् । नाद्यः- त्वन्मते विशिष्टज्ञानस्य मोक्षाजनकत्वात् । न द्वितीयः- विशेषाभावेन काकेन गृहसंस्थानविशेषस्येवान्यस्योपलक्ष्यस्याभावेन विशेष्यमेवोपलक्ष्यत इति वाच्यम् । तस्य च विशिष्टग्राहिणा ज्ञानेन प्रागेव ज्ञातत्वात् । उपलक्ष्याकारेण ज्ञानस्य त्वन्मते मोक्षासाधनत्वात् ।

न च विशेषणाविषयविशेष्यज्ञानं तेन न सिद्धमिति वाच्यम् । विशिष्टज्ञानस्य विशेषणज्ञानाभावार्थत्वायोगात् । अपि च यदि सविशेषनिरूपणं निर्विशेषज्ञानार्थं तदा सत्यं ज्ञानमनन्तं ब्रह्मेत्यादि सद्ब्रह्मनिरूपणमपि असद्वेत्यादिश्रुतिसिद्धासद्ब्रह्मज्ञानार्थं स्यादेव । अत एवोक्तं श्रीमद्व्यासतीर्थचरणैः-

असद्रूपं परं ब्रह्म साक्षात्कर्तुमनीश्वराः ।
ये मन्दास्तेऽनुकम्प्यन्ते सद्ब्रह्मप्रतिपादनैः ॥

एवं कर्मकाण्डेऽपि लक्षणया अग्निहोत्रादि धर्मविलक्षणः कश्चन निर्विशेषो धर्मः प्रतिपाद्यत इति किं न स्यात् । अत एवोक्तं चन्द्रिकायाम्-

विशिष्टब्रह्मधीसाध्या शुद्धधीरित्यसंगता ।
विशिष्टप्रत्यये यस्मात् विशेष्यं भासतेतराम् ।

एतद्विस्तरस्तु चन्द्रिकायामवधेय इति ।

नन्वेवमपि ब्रह्मणो निर्धर्मकत्वात् कोपि धर्मो नास्तीति निर्विशेषत्वमेव ब्रह्मणोऽङ्गीकर्तव्यमिति चेन्न । तथात्वे व्याहतेः । तथाहि- ब्रह्मणि निर्धर्मकत्वमस्तीति चेत् निर्धर्मकत्वरूपधर्मप्राप्त्या सधर्मकत्वमेव । नास्तीति चेत् सधर्मकत्वस्यैव प्राप्तेः । अकामेनापि सविशेषत्वमेवोररीकर्तव्यमिति ।

तथाच भगवान् नारायणः सकलनिगमज्ञेयः जडाजडभिन्नः सच्चिदानन्दशरीरः सर्वोत्कृष्टः ब्रह्मशिवेन्द्रादिवन्दितचरणनलिन इति वेदान्तिनां पन्थाः ।

॥ इति श्रीमदाचान्तपरसिद्धान्तन्यायामृतवेङ्कटाचार्यलब्धवेदान्तरहस्येन वाग्वैखरीनिस्त्रिंशखण्डितनिखिलाद्वैतमण्डलसुब्रह्मण्यसहोदरता-लब्धविद्यावैशद्येन शौर्यौदार्यादिगुणजातसन्दानितदिगन्त-विश्रान्तयशोबृन्दारणीप्रकारस्थवेदाजीभास्कर-भूपालतनयरङ्गनाथेन विदुषा विरचितेयं भेदतरङ्गिणी समाप्तिमगमत् ॥

॥ श्रीगुरुवरहृदयाम्बरवरमन्दिरेन्दिरारमणचरणसरोजार्पणमस्तु ॥

॥ श्रीमत्सत्याभिनवतीर्थपूज्यचरणार्चित श्रीरामवेदव्यासार्पणमस्तु ॥

॥ श्रीवेङ्कटेशार्पणमस्तु॥

भेदतरङ्गिण्याष्टिप्पण्यादयः

निरुक्तिरिति । पृ. ३

यास्कनिरुक्तिः । अत्रायमर्थः । द्वौ सुकृतौ धर्मकर्तारौ देहाख्ये वृक्षे प्रतिष्ठितौ । तौ कौ? जीवपरमात्मानौ । तदुच्यते । सुपर्णा सयुजा सखायेत्यात्मानं परमात्मानं च प्रति उत्तिष्ठति, वाचकतया उपतिष्ठते । धर्मकर्तारावित्यत्र धर्मेति दुष्कृतं सुकृतं चेति द्वयमपि विवक्षितम् । जीवस्तस्याधीनकर्ता, परमात्मा च स्वतन्त्रकर्ता इति विशेषः । दुष्कृतं पापं जीवस्य परिसारकं नरकपातहेतुः । इदमुपलक्षणम् । सुकृतं पुण्यं स्वर्गतिहेतुः । सुकृत दुष्कृतरूपौ द्वौ पक्षौ देहाख्य वृक्षे प्रतिष्ठापयति जीवपक्षी परमात्मपक्षी च । तयोरन्यो भुक्त्वा अन्नं अज्ञानावस्थायाम्, अनश्नन् ज्ञानावस्थायामन्यां संसारादन्यां मोक्षरूपां सरूपतां सलोकताम् अश्नुते । अन्योऽनश्नन्नभिचाकशीति, अनश्नन् परमात्मा सदा अभिचाकशीति । तथैव जीवोऽपि, यदि अपरोक्षप्रभावेण कर्मक्षयं प्राप्नोति । इति यास्को निरुक्तौ अस्याः श्रुतेः मोक्षेऽपि जीवपरमात्मभेदवादितां मनुते । न चायं गौणो मोक्षः, अनश्नन् इति जीवस्य कर्मफलानशनोक्तेरित्याह ।

उपांशुयाजमन्तरेति । पृ. ४

पौर्णमासीवदुपांशुयाजः स्यात् (जै.सू.२.२.९)

अत्र विषयवाक्यम्- 'जामि वा एतद्यज्ञस्य क्रियते यदन्वंचौ पुरोडाशौ । उपांशुयाजमन्तरा यजति । विष्णुरुपांशु यष्टव्योऽजामित्वाय प्रजापतिरुपांशु यष्टव्योऽजामित्वाय अग्नीषोमावुपांशु यष्टव्यावजामित्वाय'

इति। जामि आलस्यहेतुः। अन्वंचावव्यवहितौ। अत्र विष्ण्वादिवाक्यानि यागत्रयविधायकान्युत उपांशुयाजमन्तरा यजतीति वाक्यमेवैकं यागं विधत्ते इति संशये विष्ण्वादिवाक्यानां यागत्रयविधायकत्वे एकवाक्यताभङ्गः। एकवाक्यत्वं च जामितादोषोपक्रम तन्निर्हरणांतस्य सर्वस्य महावाक्यस्य प्रतीयते। न ह्येकस्मिन् वाक्ये विधेयबाहुल्यं संभवतीति सिद्धान्तितम्।

एवं च जामितादोषोपक्रमतन्निर्हरणान्तवाक्यमध्यपतितत्वेन विष्ण्वादिवाक्यानां यथा एकयागविधाने तात्पर्यमुच्यते तथा प्रकृतेऽपि भेदवाक्यमध्यपतित द्वा सुपर्णावाक्यस्य जीवेश्वरभेदपरत्वमेव वक्तव्यं न तु बुद्धिजीव परत्वमादाय कथंचिद् जीवेश्वरैक्यपरत्वमिति।

यववराहाधिकरणेति। पृ. ६

शास्त्रस्था वा तन्निमित्तत्वात् (जै.सू.१.३.९)

अत्र शास्त्रीयधर्मावबोधे शास्त्रप्रसिद्धिरेव बलीयसी। अन्तरङ्गत्वात्। अतो यव वराह शब्दौ शास्त्रव्यवहारानुरोधेन दीर्घशूक सूकरयोरेव मुख्यौ, नतु लौकिक व्यवहारानुरोधेन प्रियंगु वायसयोः। अतो यवमयश्चरुर्भवतीति दीर्घशूका ग्राह्याः। वाराही उपानहावुपमुंचते इति सूकरो ग्राह्यः। वेदे हि यत्रान्या ओषधयो म्लायन्ते तत्रैते मोदमाना इवोत्तिष्ठन्तीति यवविध्यर्थ-वादे मोदमानत्वमुच्यते। तत्तु दीर्घशूक एव दृश्यते। वराहं गावोऽनुधावन्तीति श्रुतौ गावो वत्सबुद्ध्या वराहमनुधावन्तीत्युच्यते। अतो वराहः सूकर एव।

अन्यारादिति। पृ. ६

अन्यारादितरर्तेदिक्छब्दांचूत्तरपदाजाहियुक्ते (पा.सू.२.३.२९)

एभिर्योगे पंचमी स्यात्। इतरग्रहणं प्रपञ्चार्थम्। अन्यो भिन्न इतरो वा कृष्णात्।

सङ्ख्याधिकरणन्यायेनेति। पृ. ९

पृथक्त्वनिवेशात् संख्यया कर्मभेदः स्यात् (जै.सू. २.२.२१)

'तिस्र आहुतीर्जुहोति' इत्यत्र कर्मैक्येऽपि अभ्यासात् त्रित्वोपपत्तिः, एकादश प्रयाजान् यजतीत्यत्र श्रुतैकादशत्वसङ्ख्यायाः पञ्चप्रयाजेष्वावृत्त्या निवेशवत् इत्याशंक्य पंचत्वरूपसंख्याया निर्णीतत्वेन अभ्यासेन विना एकादशत्वायोगात् आवृत्त्या तन्नीयते। प्रकृते तु तिस्र इति बहुत्वं नाभ्यासेन नेतव्यम्। कर्मभेद एवैष्टव्य इति सिद्धान्तितम्।

तदेतत् सत्वं येन स्वप्नं पश्यतीति। पृ. ९

पैङ्गिरहस्यब्राह्मणम्। तयोरन्यः पिप्पलं स्वाद्वत्तीति सत्वम्। अनश्नन्नन्योऽभिचाकशीतीति। अनश्नन्नन्योऽभिपश्यति ज्ञः। तावेतौ सत्वक्षेत्रज्ञौ। तदेतत् सत्वं येन स्वप्नं पश्यति। अथ योयं शारीर उपद्रष्टा स क्षेत्रज्ञ इति।

समानमितरत् श्येनेनेति। पृ. १९

समाने पूर्ववत्त्वादुत्पन्नाधिकारः स्यात् (जै.सू.७.१.१३)

इषुणाऽभिचरन् यजेतेति विहितेषुयागे जोतिष्टोमविकारे 'इषुर्विष्टुतिः सप्ताहं भवति' इति औदुम्बरशङ्कुरूपेण कुशास्तरणं, सप्ताहाख्यं साम च विधाय 'समानमितरत् श्येनेन' इति श्रूयते। अत्र चोदकप्राप्तं सौमिकधर्मजातं श्येनेन सममित्यनुवाद इति पूर्वपक्षः। इतरदित्यस्य पूर्वोक्तसदृशेतरपरत्वम्। लोके तथैव व्युत्पत्तेः। श्येनवैशेषिकाणां

पूर्वोक्तसप्ताहादिवैशेषिक सादृश्यमस्त्येव। अतो निरर्थकानुवादनिरासाय अप्राप्तलोहितोष्णीषादिश्येनवैशेषिकधर्मातिदेश इति सिद्धान्तः ।

वर्षासु रथकार इति । पृ. १९

वचनाद्रथकारस्याधानमस्य शेषत्वात् (जै.सू.६.१.४४)

'वसन्ते ब्राह्मणोऽग्नीनादधीत । ग्रीष्मे राजन्यः । शरदि वैश्यः । वर्षासु रथकार आदधीत' इत्यत्र त्रैवर्णिकानामेव विद्वत्त्वात् कालमात्रविधाने च लाघवात् ब्राह्मणादीनामेव रथं करोतीति व्युत्पत्त्या रथकरणे निमित्ते वर्षाकलविधिः, नतु अविदुषोऽवान्तरवर्णस्य कालविशिष्टाधानविधिः इति प्राप्ते योगाद् रूढेर्बलवत्त्वात् रूढ्या अवान्तरजातिविशिष्टस्य वर्षाकालविशिष्टाधानविधिः। तस्याविद्वत्त्वेऽपि वचनबलात् तावन्मात्रोपयुक्त ज्ञानसंपादनसंभवात् इति सिद्धान्तितम् ।

राजा राजसूयेनेति । पृ. १९

अवेष्टौ यज्ञसंयोगात् क्रतुप्रधानमुच्यते। (जै.सू.२.३.३)

राजा राजसूयेन स्वाराज्यकामो यजेत इति इष्टिपशुसोमाख्ययागसमुदायात्मा राजसूयः श्रुतः । तत्रावेष्टिर्नामेष्टिः पञ्चहविषाऽऽम्नाता । आग्नेयमष्टाकपालं निर्वपति हिरण्यं दक्षिणा। ऐन्द्रमेकादशकपालं ऋषभो दक्षिणा । वैश्वदेवं चरुं पिशंगी प्रष्ठौही दक्षिणा । मैत्रावरुणीमामीक्षां वशा दक्षिणा । बार्हस्पत्यं चरुं शितिपृष्ठो दक्षिणा इति । तस्यामवेष्टौ हविषां क्रमव्यत्ययः श्रूयते । यदि ब्राह्मणो यजेत बार्हस्पत्यं मध्ये निधायाहुतिमाहुतिं हुत्वा तमभिघारयेत् । यदि राजन्य ऐन्द्रम् । यदि वैश्यो वैश्वदेवम् इति। तत्र राजसूयवाक्ये राजशब्दस्य जनपदादिरक्षण-

रूपराज्यकर्तृत्वनिमित्तकत्वात् तस्य च निमित्तस्य ब्राह्मणादित्रिष्वपि संभवात् त्रयस्यापि प्राप्तेः बार्हस्पत्यादि हविः मध्ये स्थापयितुं 'यदि ब्राह्मण' इत्यादिना ब्राह्मणादिकं निमित्तत्वेनानूद्यते इति पूर्वपक्षः । सिद्धान्तस्तु पाणिनीये 'राजाऽसे' असमासे राजशब्दो राज्ञः कर्मेत्यर्थे यकमुत्पादयतीत्युक्त्या राजशब्दयोगादेव राज्यशब्दनिष्पत्त्युक्त्या न राज्ययोगनिमित्तत्वं राजशब्दस्यार्यप्रसिध्द्या ग्राह्यम् । आर्यप्रयोगरूपाचारादपि स्मृतेः प्राबल्गात् आर्यवरपाणिन्यनुगृहीताया अनार्यद्रविडप्रसिद्धेः क्षत्रियमात्रे सत्वाच्च रूढ्या राजपदस्य क्षत्रियमात्रवाचित्वेन ब्राह्मणादीनामप्राप्तेः अप्राप्तब्राह्मणादिकर्तृकं बार्हस्पत्यादिमध्यनिधानादिगुणविशिष्टं कर्मान्तरं विधीयते इति ।

हविरार्तिमार्च्छेदित्यादि । पृ. १९

'यस्योभयं हविरार्तिमार्च्छेदैन्द्रं पंचशरावमोदनं निर्वपेत्' यस्य यजमानस्य दर्शसंबन्धि सायंकालिकं हविर्दधिरूपं, प्रातःकालिकं हविः पयोरूपं च नश्यति स ऐन्द्रं शरावपंचकपक्वौदनद्रव्यकं यागं कुर्यात् इति श्रूयते। 'यथाश्रुतीति चेत्' (जै.सू.६.४.२२) इति सूत्रे इदं वाक्यं विचारितम् ।

चात्वाले कृष्णविषाणामिति । पृ. २०

उत्पत्तौ येन संयुक्तं तदर्थं तत् श्रुतिहेतुत्वात् तस्यार्थान्तरगमने शेषत्वात् प्रतिपत्तिः स्यात् (जै.सू.४.२.१९)

अत्रेदं वाक्यं विचारितं 'नीतासु दक्षिणासु चात्वाले कृष्णविषाणां प्रास्यति' इति । यजमानेन दत्ता दक्षिणा ऋत्विग्भिर्यदा नीताः तदा

यजमानः तस्य हस्ते धृतं कृष्णमृगस्य शृङ्गं चात्वालनामके गर्ते परित्यजेदिति तदर्थः ।

निर्वृत्तमपि प्रयोजनं विपद्यत इत्यस्यायमर्थः- यद्यपि कृष्णविषाणस्य प्रतिपत्तिकर्मैवेदं प्रासनम् । तस्य चात्वाल इति देशविशेषनियमान्नियमादृष्टं कल्प्यते । तथापि कृष्णविषाणकण्डूयनजन्यं नियमादृष्टं विपद्यते इति कल्प्यत इति ।

तेषामर्थेन संबन्धः (जै.सू.३.१.७) **पृ. २०**

दर्शपूर्णमासयोः व्रीहिधर्मा अवघातप्रोक्षणादय आज्यधर्मा उत्पवनावेक्षणादयः, सान्नाय्य धर्मा दोहनादयः । अत्र किमेत्ते धर्मा अव्यवस्थया सर्वत्र कार्या उत यथासंयोगं व्यवस्थया इति विचारः ।

प्रयाजशेषेण हवींषीति । **पृ. २०**

अभिघारणे विप्रकर्षादनुयाजवत् पात्रभेदः स्यात् (जै.सू.४.१.३३)

प्रकृतावग्नीषोमीयपशौ प्रयाजशेषेण हवींष्यभिघारयतीति श्रुतम् । तदेतत् प्रयाजशेषेण हविरभिघारणं चोदकपरंपरया वाजपेयगतपशुषु विकृतिभूतेषु प्राप्तम् । ते च पशवो द्विविधाः । क्रतुपशवः प्राजापत्यपशवश्चेति । आग्नेयं पशुमालभेतेत्यादिना विहिताः क्रतुपशवः । अन्ये तु सप्तदश प्राजापत्यान् पशूनालभत इति विहिताः । एते च द्विविधाः पशवः प्रातःसवने सहैवोपक्रम्यन्ते । तत्रैव सर्वेषामर्थे प्रयाजा अनुष्ठीयन्ते । तत्रैव क्रतुपशव आलभ्यन्ते । प्राजापत्यास्तु माध्यन्दिनसवने ।

तत्र सन्देहः । किं प्रातःसवनेऽनुष्ठितानां प्रयाजानां शेषो माध्यन्दिनसवनकालीन प्राजापत्यवपाभिघारणाय धारयितव्यः, तदर्थं च पात्रान्तरं

सम्पाद्यम्, जुह्वाः क्रत्वनुष्ठाने व्यापृतत्वात्? उत न धारयितव्यः, अतो न पात्रान्तरसंपादनमिति । पूर्वपक्षस्तु- प्रयाजशेषेणेति तृतीयया शेषे संस्कारकत्वस्य, हवींषीति द्वितीयया हविषां संस्कार्यत्वस्य च श्रवणात्, शेषस्य प्रतिपत्तित्वे प्रयाजशेषं हविष्षु क्षारयेदिति श्रवणापातात्, उपयुक्तसंस्कारादप्युपयोक्ष्यमाणसंस्कारस्याभ्यर्हितत्वाच्च प्रयाजशेषस्य हविरभिघारणार्थं धारणं तावत्कालं कर्तव्यम् । तदर्थं पात्रान्तरं सम्पाद्यमिति । सिद्धान्तस्तु शेषस्य हि प्रतिपत्तिरपेक्षिता। जुह्वां विद्यमान प्रयाजशेषभूताज्यस्य करिष्यमाणाज्यभागार्थाज्येनासांकर्यार्थत्वात् । हविःसंस्कारस्त्वनपेक्षितः । प्राजापत्यवपायास्तदाधारपात्रस्य च संसर्गकारणीभूताया रूक्षतायाः परिहारो हि प्रयाजशेषेणाभिघारणाभावेऽपि 'उपस्तृणात्याज्यं हिरण्यशकलं वपा हिरण्यशकलं ततोऽभिघारयति' इति विहितेनोपस्तरणेन अभिघारणान्तरेण च सम्भवति । प्रतिपत्तित्वे चाज्यभागार्थाज्येनासांकर्यार्थं जुह्वा रिक्तताकरणं दृष्टमेव प्रयोजनं लभ्यते । न च दृष्टे सम्भवति हविःसंस्काररूपादृष्टकल्पना युक्ता । तस्मात् शेषः स्वप्रतिपत्तिरूपसंस्कारार्थः । प्रयाजशेषं हविःषु क्षारयतीति वाक्यार्थः । तानि च सन्निधानात् प्रातःसवनीय पशुहवींष्येवेति ॥

सप्तदशारत्निर्वाजपेयस्य यूप इति । **पृ. २२**

आनर्थक्यात्तदङ्गेषु (जै.सू.३.१.१८)

सप्तदशारत्निर्वाजपेयस्य यूपो भवतीति श्रुतं सप्तदशारत्नित्वं साक्षात् वाजपेयकर्मण्ययुक्तमपि तदङ्ग षोडशिनामक ग्रहरूप पात्रद्वारा तदंगं भविष्यति । यूपशब्दस्य ऊर्ध्वत्वसारूप्याद् ग्रहपरत्वमेष्टव्यम् इति प्राप्ते अभिधीयते । सप्तदशारत्निर्यूप इति सामानाधिकरण्यात् वाजपेयशब्दस्य

संबन्धसामान्यवाचिषष्ठ्यन्ततया परम्परासम्बन्धेन वाजपेयांग पश्वङ्गं यूप इति लक्षणां विनैव पशुयागपरत्वेन यूपद्वारा पश्वङ्गं सप्तदशारत्नित्वम्। आनर्थक्यात् प्रधानान्वयबाधात् विधीयमानो धर्मस्तदङ्गेषु अवतरतीति ।

पर्यग्निकृतं पात्नीवतमुत्सृजतीति । पृ. २२

पात्नीवते तु पूर्ववत्त्वादवच्छेदः(जै.सू.२.३.१९)

त्वाष्ट्रं पात्नीवतमालभेतेति प्रकृत्य श्रूयते पर्यग्निकृतं पात्नीवतमुत्सृजतीति । तत्र पत्नीवन्नामक देवतासंबन्धस्य पर्यग्निकरणसंस्कृतपशुद्रव्यस्य च प्रतीतेर्यागविधिरिति प्राप्ते आलभ्यत्वेन प्रकृतपशोः पात्नीवतशब्देन प्रत्यभिज्ञानात् तदनुवादेन पर्यग्निकरणान्तांगकलापविधिः । न च तस्य चोदकप्राप्तत्वाद् विधिवैयर्थ्यम् । उत्तरांगनिवृत्त्यर्थत्वात् । नचैवं स्वार्थत्यागान्यार्थस्वीकार प्राप्तबाधरूपदोषत्रययुक्तपरिसङ्ख्यात्वापत्तिः। प्रत्यक्षोपदेशस्य शीघ्रप्रवृत्त्या चोदकप्रवृत्तेः प्रागेव उत्सर्गवाक्येन पर्यग्निकरणान्ताङ्गकलापबोधने सति विकृतियागस्य तावतैव नैराकाङ्क्ष्येण चोदकस्यैवाप्रवृत्त्या अर्थादुत्तराङ्गनिवृत्तिलाभाद् इत्यर्थसिद्ध उत्तराङ्गलोप उत्सृजतीत्यनूद्यते इति सिद्धान्तः ।

सङ्ख्यामुष्ट्यधिकरणन्यायेनेति । पृ. २२

मुष्टिलोपात्तु सङ्ख्यालोपस्तद्गुणत्वात् स्यात् (जै.सू.१०.२.६४)

वाजपेये बार्हस्पत्ये 'नैवारः सप्तदशशरावः क्षीरे चरुर्भवति' इति चरुः श्रुतः। प्रकृतौ तु चतुरो मुष्टीन् निर्वपतीति चतुःसङ्ख्यामुष्टी श्रुते। तदुभयमिह चोदकेन प्राप्तम् । तत्र चतुर्भिर्मुष्टिभिर्निरुप्तैर्द्रव्यैः सप्तदशशरावपरिमाणश्चरुः संपादयितुमशक्यः । तथापि चतुर इति द्वितीयाविभक्त्या चतुष्ट्वं कारकत्वेनावगम्यते । कारकं च क्रिययैव साक्षादन्वेति। न मुष्टिद्रव्येण । द्वयोर्मिथोऽन्वयायोगात् । अतो वाक्यप्रमाणको मुष्टिचतुष्ट्वयोः सम्बन्धः। तद्बाधेन कारकविभक्तिश्रुत्या चतुरो निर्वपति मुष्टीन्निर्वपतीति चतुःसङ्ख्यागुणको मुष्टिगुणकश्च निर्वापो विधीयते । श्रुतेर्वाक्याद् बलीयस्त्वात् । एवं चोभयोः क्रियांगत्वे समाने सति मुख्यत्वात् संख्यानुग्रहेण जघन्यत्वात् मुष्टेर्लोप इति चतुर्भिः कुडवैः सप्तदशशरावश्चरुः कार्य इति सिद्धान्तितम् ।

प्राचीमाहरेदिति । पृ. २३

शाखायां तत्प्रधानत्वात् (जै.सू.४.२.७)

दर्शपूर्णमासयोः 'यत् पर्णशाखया वत्सानपाकरोति' इति पलाशशाखां प्रकृत्य 'यत् प्राचीमाहरेत् देवलोकमभि जयेत्' इति श्रुतम् ।

यावत्या वाचेति । पृ. २३

तेन त्वर्थेन यज्ञस्य संयोगाद् धर्मसम्बन्धस्तस्माद्यज्ञप्रयुक्तं स्यात् संस्कारस्य तदर्थत्वात् (जै.सू. ९.१.३)

ज्योतिष्टोमे 'यत्किंचित् प्राचीनमग्नीषोमीयात् तेनोपांशु चरन्ति' इत्युक्त्वा यजमानसंस्कारार्थं विहितायां दीक्षणीयेष्टौ यथाकाम्यस्वरः श्रूयते-'यावत्या वाचा कामयीत तावत्या दीक्षणीयायामनुब्रूयात्' इति ।

स्फ्येनोद्धन्तीत्यधिकरणमिति । पृ. २४

द्रव्यं चोत्पत्तिसंयोगात् तदर्थमेव चोद्येत (जै.सू. ३.१.११)

दर्शपूर्णमासयोः श्रूयते - सफ्यश्च, कपालानि च, अग्निहोत्रहवणी च शूर्पं च कृष्णाजिनं च शम्या चोलूखलं च मुसलं च दृषच्चोपला चैतानि वै दश यज्ञायुधानि इति। तथा स्फ्येनोद्धन्ति, कपाले श्रपयति, अग्निहोत्र-हवण्या हवींषि निर्वपति, शूर्पेण विविनक्ति, कृष्णाजिनमधस्तादुलूखल-स्यावस्तृणाति, शम्यायां दृषदमुपदधाति, उलूखलमुसलाभ्यामवहन्ति, दृषदुपलाभ्यां पिनष्टि इति । स्फ्यः खड्गाकारः काष्ठविशेषः । आयुध-मिति साधनमुच्यते । तत्र स्फ्यादीनां यज्ञसाधनत्वं तदंगनिष्पादकत्वेनैव निर्वाह्यम् । अतोऽविशेषाद् यथासामर्थ्यं सर्वांगेषु विनियोगः । स्फ्येना-द्धन्तीति एकैकक्रियासम्बन्धोक्तिस्तु एकदेशानुवादः इति प्राप्ते अभि-धीयते । यथासामर्थ्यमव्यवस्थयानेकत्र स्फ्यादीनां विनियोगे स्फ्येनो-द्धन्तीत्यादि विशेषसंयोगबोधक बहुवाक्य वैयर्थ्यापत्तेः अनुवादे फला-भावात् । अव्यवस्थापक्षेऽन्येनाप्युद्धननसंभवेन नित्यप्राप्त्यभावेनानु-वादत्वायोगाच्च। पाक्षिकानुवादत्वे नित्यवच्छ्रवणविरोधात् । अत एव तानि वाक्यानि विधायकान्येव। यज्ञायुधवाक्यं तु यज्ञायुधानि सम्भरन्ती-त्यासादनविधानोपयोगायानुवादकमिति यथासंयोगं स्फ्यादेर्व्यवस्थया विनियोग इति ।

श्येनेनाभिचरन् यजेतेति । पृ. २४

तद्व्यपदेशं च (जै.सू.१.४.५)

श्येनेनाभिचरन् यजेतीति श्रुत श्येनशब्दस्य पक्षिविशेषे रूढत्वेन कर्मणि वर्तितुमशक्यत्वेन नामत्वपक्षे द्रव्यदेवतयोरभावेन यागस्वरूपस्यैवानवगतेश्च ज्योतिष्टोमे नित्यमुत्पत्तिशिष्टमपि सोमं काम्यत्वाद् बाधित्वा सोमस्य स्थाने पक्षिरूपः काम्यगुणो विधीयते इति प्राप्ते यथा वै श्येनो निपत्यादत्ते

एवमयं द्विषन्तं भ्रातृव्यं निपत्यादत्ते इति वाक्यशेषोपात्तोपमानोपमेय-भावस्य पक्षिण्येकस्मिन्नयोगात् उपमानोपमेयभावस्य भेदाविनाभूतत्वात् उपमानभूतपक्षिणो गुणस्य निपत्यादानरूपस्योपमेये कर्मणि सत्वात् गौण्या वृत्त्या श्येनशब्दस्याभिचारकर्मनामत्वमिति सिद्धान्तः ।

अक्ताः शर्करा इति । पृ. २४

सन्दिग्धे तु वाक्यशेषात् (जै.सू.१.४.२९)

अक्ताः शर्करा उपदधाति तेजो वै घृतमिति श्रूयते। मृत्तिकामिश्राः क्षुद्रपाषाणाः शर्कराः । ताः किं घृततैलवसानामन्यतमेनाञ्जनीया उत वाक्यशेषाद् घृतेनैवेति सन्देहे अञ्जनसाधनसामान्यबोधकस्य विधिवाक्यस्य घृतरूप विशेषबोधकादर्थवादात् प्राबल्यात् घृताघृतलक्षकोऽस्त्वर्थवाद इति पूर्वपक्षः । विधिवाक्यस्य स्वार्थपरतया मुख्यत्वेन असञ्जातविरोधि-त्वात् प्रथमश्रुतत्वात् प्राबल्येऽपि तत्र प्रतीतस्य अंजनसाधनसामान्यस्या-नुष्ठानायोग्यत्वेन तद्योग्ये विशेषे सन्देहजनकत्वेन तन्निर्धारणाय चरमस्या-प्यर्थवादस्यानुसरणीयत्वेन तदुक्तेन घृतेनैवाञ्जनमिति सिद्धान्तः ।

पञ्चदशान्याज्यानीति । पृ. २४

यस्मिन् गुणोपदेशः प्रधानतोऽभिसम्बन्धः (जै.सू.१.४.३)

पञ्चदशान्याज्यानि भवन्तीत्यत्र आज्यशब्दस्य रूढ्या घृतवाचित्वात् कर्मनामत्वस्य सर्वथाऽयोगात् अग्नीषोमीयं पशुमालभेतेति विहित पशुयागे संख्यायुक्तं घृतं स्तोत्रांगतया विधीयते इति प्राप्ते पञ्चदशान्याज्यानीत्यत्र समासाभावेन सङ्ख्याविशिष्टद्रव्यविध्ययोगेनोभयविधौ वाक्यभेदप्रसङ्गात् यदाजिमीयुस्तदाज्यानामाज्यत्वम् इति वाक्यशेषावगत निर्वचनेन मन्त्र-

नामधेयमाज्यपदम्। एवं च आज्यैः स्तुवते इत्युत्पत्तिवाक्ये आज्यपदस्य नामत्वे तदनुवादेन सङ्ख्यामात्रविधाने लाघवमवाक्यभेदश्चेति सिद्धान्तितम् ॥

वैश्वदेवेन यजेतेति । पृ. २४

वैश्वदेवे विकल्प इति चेत् (जै.सू.१.४.१३)

चातुर्मास्ये वैश्वदेव वरुणप्रघास साकमेध शुनासीरीयेति पर्वचतुष्टयं श्रुतम्। तत्र प्रथमे पर्वणि अष्टौ यागा विहिताः आग्नेयमष्टाकपालं निर्वपति, सौम्यं चरुं, सावित्रं द्वादशकपालं, सारस्वतं चरुं, पौष्णं चरुं, मारुतं सप्तकपालं, वैश्वदेवीमामिक्षां, द्यावापृथिव्यमेककपालमिति। तेषां यागानां सन्निधौ वैश्वदेवेन यजेतेति श्रुतम्। तत्र उक्तान् यागान् यजेतेत्यनूद्य विश्वदेवाख्य देवतारूपो गुणो विधीयते। सप्तमे यागे विश्वदेवानां प्राप्तत्वेऽपि तदन्य सप्तयागेषु गुणविधिरस्तु। अग्न्यादिभिर्विश्वदेवदेवता विकल्प्यन्ते इति प्राप्ते सिद्धान्तः। अष्टौ यागान् यजिनानूद्याष्टानां संघे वैश्वदेवनामसंबन्धः क्रियते। यद् विश्वेदेवाः समयजन्त तद् वैश्वदेवस्य वैश्वदेवत्वमिति ब्राह्मणवाक्योक्त्या विश्वदेवकर्तृकत्वात्। न च संघे नामसम्बन्धो व्यर्थः। प्राचीनप्रवणे वैश्वदेवेन यजेतेति समुदायस्य प्राचीनप्रवणसम्बन्ध सिध्यर्थत्वादिति।

विशये प्रायदर्शनादिति । पृ. २६

विशये प्रायदर्शनात् (जै.सू. २.३.१६)

अग्निहोत्रदोहप्रकरणे वत्समालभेतेति श्रुतम्। तत्र वायव्यश्वेतालम्भनवत् प्राणिद्रव्यालंभनत्वात् वत्सपशुकयागविधिरिति प्राप्ते सिद्धान्तः- अग्निहोत्रदोहादिसंस्कारप्रायपठितत्वात् आलंभशब्दितस्पर्शो वत्ससंस्कार एवेति।

एकस्मिन्नेव समिद्याग इति । पृ. ३१

'समिधो यजति' इति विधिवाक्ये समिध इति बहुवचनान्तेन समिच्छबब्देन एक एव यागो विधीयते। स च शब्दो बहुवचनान्तप्रतिरूपकं यागनामधेयमङ्गीक्रियते।

एकस्मिन्नेव पाशे अदितिः पाशानिति बहुवचनमिति । पृ. ३१

विप्रतिपत्तौ विकल्पः स्यात् समत्वाद् गुणे त्वन्याय्यकल्पनैकदेशत्वात् (जै.सू.९.३.१५)

अग्नीषोमीयपशौ एकवचनांत बहुवचनांतौ द्वौ पाशमन्त्रौ शाखाभेदेनाम्नातौ 'अदितिः पाशं प्रमुमोक्त्वेतम्' इति, 'अदितिः पाशान् प्रमुमोक्त्वेतान्' इति च। तत्र बहुवचनस्यैकस्मिन्नयोगात् बहुवचनोक्तबहुत्वलिङ्गेन प्रकरणं बाधित्वा बहुपाशके पशुगणे बहुवचनान्तमन्त्रोत्कर्षः कार्य इति प्राप्ते प्रधानभूत प्रातिपदिकार्थस्य पाशस्य, विभक्त्यर्थस्य च कर्मत्वस्य प्रकरणे निवेशसंभवेन गुणभूतबहुवचनोक्त बहुत्वानुरोधेन उत्कर्षः न युक्तः। अवयवबहुत्वाभिप्रायेण बहुवचनमपि प्रकरण एव कथंचिन्निवेशनीयमिति, एकवचनान्त बहुवचनांतयोर्द्वयोरपि प्रकरण एव निवेशाद् विकल्प इति सिद्धान्तितम् ॥

ग्रहं संमार्ष्टीति । पृ. ३२

एकत्वयुक्तमेकस्य श्रुतिसंयोगात् (जै.सू.३.१.१३)

दशापवित्रेण ग्रहं संमार्ष्टीत्यत्र ग्रहमित्युक्तमेकत्वं विवक्षितम्।

एकत्वसंख्यारूपगुणेन परिच्छिन्नस्य ग्रहस्य संमार्गकर्मत्वं न हातुं शक्यम् इति प्राप्ते द्वितीयाश्रुत्या ग्रहस्य संमार्गं प्रति प्राधान्यावगमेन प्रतिप्रधानं गुणस्यावृत्तिरिति न्यायेन यावन्तो ग्रहाः सोमे तावत्सु संमार्गः इति निश्चिते सति ग्रहे इयत्तापरिच्छेदकस्य अनाकाङ्क्षितत्वात् तत्परिच्छेदकैकत्व-सङ्ख्या न विवक्षिता। विवक्षापक्षे च ग्रहं संमृजेत्, स चैक इति वाक्या-भेदापत्तेरिति सिद्धान्तः।

यस्योभावग्नी इति। पृ. ३२

पुनराधेयमोदनवत् (जै.सू.६.४.२६)

'यस्योभावग्नी अनु गतावभिनिम्लोचेत् अभ्युदियाद्वा पुनराधेयं तस्य प्रायश्चित्तिः।' आहवनीयगार्हपत्यावनुगतौ नष्टौ यदा तदा यदि सूर्यस्यास्तमय उदयो वा भवेत् तदा पुनराधेयं आधानं कर्तव्यमित्यर्थः। तत्र अन्यतरानुगमोऽपि पुनराधाने निमित्तमिति पूर्वपक्षः। विशेषणीभूत द्वित्वस्याविवक्षितत्वात्, विवक्षणे वाक्यभेदापत्तेरिति। सिद्धान्तस्तु अग्नी आदधीतेति द्वित्वविशिष्टयोरग्न्योरुत्पादनाय पुनराधेयं हि चोद्यते शतपथब्राह्मणे। न त्वेकस्योत्पादनाय। न ह्येकस्मिन्ननुगते द्वयोरुत्पादनं सम्भवति। तस्मान्नैमित्तिकद्वित्वोपपत्तये निमित्तयोरप्यनुगमयोर्द्वित्वं विवक्षितमिति अस्तमयकाले वा उदयकाले वा वह्निद्वयनाश एव पुनराधेयहेतुरिति।

युवं हि स्थः स्वर्पती इति। पृ. ३२

द्वित्वबहुत्वयुक्तं वाऽचोदनात् तस्य (जै.सू.३.३.१७)

ज्योतिष्टोमे श्रुतं 'युवं हि स्थः स्वर्पती इति द्वयोर्यजमानयोः प्रतिपदं

कुर्यात्' इति। स्तोत्रस्योपक्रमे पठनीयां ऋचं प्रतिपदित्याहुः। द्वयोरिति श्रुत्या न प्रकरणबाधेन प्रतिपत्त्वस्य द्वियजमानके कुलाये उत्कर्षः कार्यः। वसन्ते वसन्ते ज्योतिषा यजेतेति वीप्सया ज्योतिष्टोमस्य नित्यत्वेन द्वादशशतदक्षिणादानादौ एको यदि न शक्नुयात् तदा अंगान्तरवत् एकत्वं विहाय द्वौ बहवो वा यजेरन् इति तदाश्रयणेन प्रतिपद्विधानस्य ज्योतिष्टोम एव युक्तत्वादिति प्राप्ते अशक्यांगत्यागेऽप्युपादेयस्य त्यागो, नानुपादेयस्य देशकालादेः। अत एकत्वस्यानुपादेयतया त्यागायोगात् यजमानद्वित्वस्य ज्योतिष्टोमेऽभावेन द्वित्वश्रुत्या प्रकरणबाधेन द्वियजमानके कुलाये प्रतिपत्त्वस्य उत्कर्षः कार्यः इति सिद्धान्तः।

यजमानपञ्चमा इडा भक्षयन्तीति। पृ. ३२

शेषभक्षाश्च तद्वत् (जै.सू.१०.२.२९)

ऋत्विग्भ्यो दक्षिणादानस्येव शेषभक्षणस्य ऋत्विक्प्रीतिद्वारा तदा-नतेः प्रत्यक्षतोऽवगतिसम्भवेन परिक्रयार्था भक्षा इति प्राप्ते सिद्धान्तः। यद्यपि प्रत्यक्षा प्रीतिः। तथापि कृतकार्यं द्रव्यं प्रतिपत्तिमपेक्षते इत्यपेक्षित विधिलाभात्, दृष्टार्थत्वाविशेषात्, देवतायै संकल्पित द्रव्यशेषेण परिक्रयणस्य यजमानेन कर्तुमशक्यत्वात्, यजमानपञ्चमाः सम्भूयेडां भक्षयन्तीति अक्रीतस्यापि यजमानस्य श्रुतभक्ष सहभावाच्च प्रतिपत्त्यर्थाः शेषभक्षा इति।

स्थानप्रकरणाधिकरण इति। पृ. ३४

श्रुति-लिङ्ग-वाक्य-प्रकरण-स्थान-समाख्यानां समवाये पारदौर्बल्य-मर्थविप्रकर्षात्। (जै.सू.३.३.१४) इत्यत्र स्थानापेक्षया प्रकरण-प्राबल्यप्रतिपादकमधिकरणम्।

ऊर्ग्वा उदुंबर ऊर्क् पशव इति । पृ. ४१

औदुम्बरो यूपो भवति । ऊर्ग्वा उदुम्बरः । ऊर्क् पशवः । ऊर्जैवास्मा ऊर्जं पशूनाप्नोति । इति वैकृत पशुप्रकरणे श्रूयते । ऊर्क्शब्देन अत्यन्त-सारभूतः सूक्ष्मोऽन्नरस उच्यते । उदुम्बररूपया ऊर्जा यजमानार्थं अध्वर्युः पशुरूपामूर्जमाप्नोति । ततो यूपस्यौदुम्बरत्वम् ऊर्जःसम्पादनाय भवती-त्यर्थः ।

पुनःश्रुतिरूपादभ्यासात् शाखान्तरेषु कर्मभेदः स्यादिति । पृ. ४१

नाम रूप धर्मविशेष पुनरुक्ति निन्दाऽशक्ति समाप्तिवचन प्रायश्चित्ता-न्यार्थदर्शनाच्छाखान्तरेषु कर्मभेदः स्यात् (जै.सू.२.४.८)

अत्र पुनरुक्तिशब्दिताभ्यासात् एकत्र शाखायामाम्नातस्य कर्मणोऽ-न्यत्राप्याम्नानरूपात् पुनरुक्तिशब्दात् कर्मभेद आशङ्कितः ।

भूयस्त्वेनोभयश्रुतीति न्यायेनेति । पृ. ४२

भूयस्त्वेनोभयश्रुति (जै.सू.३.३.१०)

ज्योतिष्टोमेन स्वर्गकामो यजेतेति यजुर्वेदे सामवेदे च श्रूयते । तत्रैकत्रैव विधिरित्यत्र नियामकाभावादुभयत्र कर्मविधिरित्याशंक्य यजुर्वेदे द्रव्यदेवताश्रवणेन इतरव्यावृत्तकर्मस्वरूपस्यावगति संभवेन तत्रैव निराकाङ्क्षतया तत्रैव विधिपर्यवसानम् । सामवेदे तु स्तोत्रादि गुणविधा-नार्थमनुवाद इति सिद्धान्तितम् । एवमेव वेदे वेदद्रष्टृप्रथमव्यक्त्यपेक्षया पुरोवादत्वनिश्चयसंभवः ।

द्वयोः प्रणयन्तीति । पृ. ४२

प्रथमोत्तमयोः प्रणयनमुत्तरवेदिप्रतिषेधात् (जै.सू. ७.३.२३)

चातुर्मास्येषु चत्वारि पर्वाणि । तत्र श्रूयते 'द्वयोः प्रणयन्ति तस्माद् द्वाभ्यां यन्ति' इति । तत्र किं सौमिकप्रणयनसमानधर्मकमिदं प्रणयनमुत दर्शपूर्णमासरूपप्रकृतितः प्राप्तमनूद्यत इति सन्देहे न सौमिकम्, नापि प्राकृतमिदं प्रणयनम् । किन्तु प्राकृत प्रणयनोत्तरकालमाहवनीया-द्यग्न्यन्तरस्यापूर्वं प्रणयनान्तरं विधीयते । आहवनीयाद्वा अग्निः प्रणीयत इति शाखान्तरवचनाच्च इति वार्तिककारेण सिद्धान्तितम् ।

दध्ना जुहोतीति । पृ. ४२

अगुणे तु कर्मशब्दे गुणस्तत्र प्रतीयेत (जै.सू.२.२.२४)

'अग्निहोत्रं जुहोति' इति निर्गुणं कर्म विधाय दध्ना जुहोति, पयसा जुहोतीत्येवमादीनि दश वाक्यानि श्रुतानि। तत्र दध्यादेः पूर्वकर्मण्येव निवेशः । न तु कर्मान्तरापादकत्वम् । प्रमाणवशाद् विकल्प इति सिद्धान्तितम् ।

न जुहोतीति निषेध इति । पृ. ४३

दीक्षितस्य दानहोमपाकप्रतिषेधोऽविशेषात् सर्वदानहोमपाकप्रतिषेधः स्यात् (जै.सू.१०.८.१२)

ज्योतिष्टोमे श्रूयते दीक्षितो न ददाति, न जुहोति, न पचति इति । अत्र क्रत्वर्थानामपि दानहोमादीनां प्रतिषेधे विहित प्रतिषिद्धत्वात् विकल्पः प्राप्नोति। स चाष्टदोषदुष्टः । तस्मात् पुरुषार्थानामेव निषेधः । पुरुषार्थतया विहितानामग्निहोत्रादीनां क्रतुमध्येऽप्यवश्यकर्तव्यतया प्राप्तानां प्रतिषेधः प्रक्रान्तक्रत्वर्थतया क्रियते इति भिन्नविषयतया विकल्पाप्रसक्तेः प्रतिषेध एवाश्रयणीयः । न पर्युदास इत्युक्तम् ।

यक्षानुरूपो बलिरिति न्यायेनेति । पृ. ५३

न सन्नासन्न सदसन्नानिर्वाच्यश्च तत्क्षयः ।

यक्षानुरूपो बलिरित्याचार्याः प्रत्यपीपदन् ॥

इति मायावादखण्डनटीकोद्धृता आनन्दबोधाद्यभिमता कारिका । अविद्यायाः सदसद्विलक्षणत्वरूपचतुर्थप्रकारवत्त्वेन तन्निवृत्तिरूपमोक्षस्य सदसद्विलक्षणविलक्षणत्वरूपपञ्चमप्रकारवत्वमुचितम् । प्रतियोगि-तन्निवृत्त्योः वैलक्षण्यस्यावश्यकत्वादिति । महतो यक्षस्य महानेव हि बलिरुचितः । एवमेव प्रकृतेऽपीति ।

उपक्रमाधिकरणेति । पृ. ६०

श्रुतेर्जाताधिकारः स्यात् । (जै.सू.३.३.१)

ज्योतिष्टोमे हि 'त्रयो वेदा असृज्यन्त, अग्नेर्ऋग्वेदो वायोर्यजुर्वेद आदित्यात् सामवेदः' इत्युपक्रम्य श्रूयते 'उच्चैर्ऋचा क्रियते । उच्चैः साम्ना । उपांशु यजुषा' इति । अत्र उच्चैर्ऋचा क्रियत इत्यादि वाक्ये ऋगादिशब्द उपक्रमस्थमन्त्रब्राह्मणसमुदायरूपवेदपदानुसाराद् ऋगादि-वेदपर उतैकैक मन्त्रवाचकोपसंहारस्थऋगादिपदानुसारेणोपक्रमस्थ वेद-शब्द एकैकऋगादिमन्त्रपर इति सन्देहः । प्रथमश्रुतस्यार्थवादस्याप्रधानत्वात् विध्युद्देशस्य प्रधानत्वात् तदनुरोधेनोपक्रमार्थवादगतो वेदशब्दो लक्षणया वैदैकदेश मन्त्रपरो नेतव्य इति पूर्वपक्षः । विध्युद्देशस्य प्रधानत्वेऽपि उपक्रमे वेदपदश्रवणेन सञ्जातविरोधितया स्वार्थानिर्णायकत्वात् उपक्रमस्य चासंजातविरोधितया स्वार्थनिर्णायकत्वेन लब्धात्मकत्वात् तदनु-रोधेनोपसंहारस्थ ऋगादिशब्दोऽप्यात्मलाभार्थं तदविरोधाय ऋगादि-वेदपरो, न वेदैकदेशमन्त्रपर इति सिद्धान्तः ।

समिधो यजतीत्यादि प्रयाजवाक्यानामिति । पृ. ७२

असंयुक्तं प्रकरणादितिकर्तव्यतार्थित्वात् (जै.सू.३.३.११)

फलाकांक्षाणामपि समिधादीनां प्रयाजयागानां स्वर्गफलकत्वेन निरा-काङ्क्षत्व संभवात् न दर्शपूर्णमासांगत्वमिति प्राप्ते 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इत्यस्य दर्शपूर्णमासाख्यकर्मणा स्वर्गं कुर्यादित्यर्थकतया यागेन स्वर्गसम्पादन प्रकारस्यानिर्ज्ञाततया कथमिति इतिकर्तव्यता-काङ्क्षायाः दर्शपूर्णमासकर्मणः सत्वात् समिधादेश्च फलासंयुक्तत्वेन प्रयोजनाकाङ्क्षया फलान्तरकल्पनादपि क्रतूपकाररूप दृष्टफलकल्पनस्य लघुत्वात् प्रधानस्येतिकर्तव्यताकांक्षारूप प्रकरणवशात् प्रयाजादीनां दर्शपूर्णमासांगत्वमिति सिद्धान्तः ॥

न तौ पशौ करोतीति । पृ. ७२

अपूर्वे चार्थवादः स्यात् (जै.सू.१०.८.५)

इत्यधिकरणे अतिदेशस्य कल्प्यत्वेन तयोराज्यभागयोः अतिदेश-प्राप्तपदार्थविषयकेण निषेधेन अत्यन्तबाधायोगात् विकल्प एवाङ्गीक्रियत इत्युक्तम् ।

अनाहुतिर्वै जर्तिलाश्चेति । पृ. ७५

न चेदन्यं प्रकल्पयेत् प्रकृप्तावर्थवादः स्यादानर्थक्यात् परसामर्थ्याच्च (जै.सू.१०.८.७)

अग्निहोत्रं जुहोतीति विधाय श्रूयते 'जर्तिलयवाग्वा वा जुहुयात् गवीधुकयवाग्वा वा जुहुयात् न ग्राम्यान् पशून् हिनस्ति नारण्यान् । अथो खल्वाहुरनाहुतयो वै जर्तिलाश्च गवीधुकाश्च । पयसाग्निहोत्रं

जुहोति।' इति। जर्तिला आरण्यास्तिलाः। गवीधुका आरण्यगोधूमाः। तत्र जर्तिलयवाग्वा वा जुहुयादिति प्रत्यक्ष लिङ्विहितजर्तिलादेः अनाहुतिरिरिति प्रतिषेधः। ततश्च पयसा जुहोतीति वाक्यान्तरविहित पयसा जर्तिलगवीधुकयवाग्वोर्विकल्प इति प्राप्ते सिद्धान्तः- यद्ययं विकल्पार्थः अनाहुतिरिरिति प्रतिषेधस्तदा पयोविधिवाक्येनैव तयोर्जर्तिलादियवाग्वोः पाक्षिकत्वरूप विकल्पसिद्धेर्व्यर्थ एव प्रतिषेधः स्यात्। तस्माद् जर्तिलादिनिन्दाद्वारा पयोविध्येकवाक्यतया पयःस्तुत्यर्थत्वेनार्थवादः। जर्तिलयवाग्वा इत्यादि वाक्यमपि ग्राम्यारण्य प्राण्यहिंसारूप गुणार्था अपि 'जर्तिल गवीधुका नाहुति योग्या अतः पय एव प्रशस्ततरमिति' पयोविधिस्तुत्यर्थमिति सर्वस्यैकवाक्यत्वसंभवे वाक्यभेदाश्रयणायोगात् सर्वोऽप्ययं पयोविध्यर्थवाद इति।

अपि च पूर्वाधिकरण इति। **पृ. ७५**

शिष्टत्वात् प्रतिषेधः स्यात् (जै.सू.१०.८.६)

इति पूर्वाधिकरणे नातिरात्र इति नञ् पर्युदासो वा अर्थवादो वा। अन्यथा अष्टदोषदुष्टविकल्पादिप्रसंगादिति प्राप्ते, सिद्धान्तः। पर्युदासो हि अतिरात्रव्यतिरक्ते षोडशिनं गृह्णातीति वा अतिरात्रे षोडशिव्यतिरिक्तं गृह्णातीति वा स्यात्। तत्रोभयत्रापि अतिरात्रे षोडशिनं गृह्णातीति विध्यानर्थक्यं स्यात्। नाप्यर्थवादत्वम्। अतिरात्रे षोडशिनं यथा न गृह्णाति तथाऽतिरात्रे षोडशिनं गृह्णातीति स्तुतेरसम्भवात्। तस्मात् प्रतिषेध इति ग्रहणाग्रहणयोरगत्या विकल्पः। प्रतिषेधार्थवत्त्वाय तदग्रहणेऽपि क्रतुसिद्धिः, विध्यर्थवत्त्वाय अनुष्ठीयमाने फलभूयस्त्वं च कल्प्यत इति व्यवस्थितविकल्प इति।

बर्हिषि रजतं न देयमिति। **पृ. ७६**

पुरा कदाचिद् देवा असुरैः साकं युयुत्सवः स्वीयं धनं अग्नौ न्यस्य गताः। युद्धानन्तरं पुनरागत्य यावत् अग्निमुपायन् तदा स कुत्रापि निलीनं आसीत्। तथापि तमन्विष्य लब्ध्वा धनं जगृहुः। तदाऽग्निः रुरोद। कोऽयमग्निः? साक्षात् रुद्रः। रुद्रमग्निं प्रजाः प्राहुः। कालाग्निरुद्रोऽयं रोदनात् अन्वर्थकरुद्रनामाऽभवत्। 'सोऽरोदीत्, यदरोदीत् तद् रुद्रस्य रुद्रत्वम्। यदश्रु व्यशीर्यत तद् रजतमभवत्। पुरास्य संवत्सराद् गृहे रोदनं भवति तस्माद् बर्हिषि रजतं न देयम्।' बर्हिर्नामके यागे यथाश्रद्धं दक्षिणां ददातीति सामान्यविहितदक्षिणाके स्वेच्छाप्राप्तरजतदानं निषिध्य हिरण्यदानं विधातुमयमर्थवादः प्रवृत्तः (तै.सं.१.५.१)

अन्यत्र धर्मादन्यात्राधर्मात् इत्यादि। **पृ. ८३**

अन्यत्र धर्मादन्यत्राधर्मात्... वदेति काठकमन्त्रे (२.१४) धर्मादितः अन्यत्र पृथग्भूतं वदेति शांकरभाष्याभिमतोऽर्थः। स च सुपां सुलुगिति व्याकरणसूत्रप्रमाणकः सप्तम्या द्वितीयार्थत्वाश्रयणेन सिद्ध्यति।

अपच्छेदन्यायेनेति **पृ. ८४**

पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवत् (जै.सू.६.५.५४)

ज्योतिष्टोमे प्रातःसवने बहिष्पवमानेन स्तोष्यमाणा ऋत्विजः स्वस्य स्वस्य पुरतो गन्तुः कच्छं गृहीत्वा पिपीलिकापंक्त्याकारेण शालाया बहिः प्रसर्पन्ति 'अध्वर्युं प्रस्तोतान्वारभते। प्रस्तोतारमुद्गाता। उद्गातारं प्रतिहर्ता' इत्यादि। तत्र यदि पुरो गन्तुः कच्छं पृष्ठतो गन्ता प्रमादान्मुञ्चेत् तदा प्रायश्चित्तं श्रूयते। यदि प्रतिहर्तापच्छिन्द्यात् सर्ववेतसं दद्यात्।

यद्युद्गातापच्छिन्द्यात् अदक्षिणं तं यज्ञमिष्ट्वा तेन पुनर्यजेत । तत्र तद् दद्यात् यत् पूर्वस्मिन् दास्यन् स्यात् । यदि प्रस्तोतापच्छिन्द्यात् ब्रह्मणे वरं दद्यादित्यादि। तत्र यदि उद्गातृप्रतिहर्त्रोः क्रमेणापच्छेदो भवति तदा पूर्वापच्छेद् निमित्तक प्रायश्चित्तस्यासंजातविरोधित्वेन बलीयस्त्वात् तदेव कार्यम्, द्वयोरपि नैमित्तिकशास्त्रयोः प्रामाण्यात् विकल्पो वेति प्राप्ते सिद्धान्तः- पूर्वेण नैमित्तिकविषयकज्ञानेन औत्तरतद्विषयकज्ञानस्योत्पत्तिर्न प्रतिबद्धुं शक्यते शास्त्रेण तदुत्पत्तेरनुभवसिद्धत्वात् । तच्चोत्तरं ज्ञान-मुत्पद्यमानं स्वविरुद्धस्य पूर्वज्ञानस्य बाधेनैवोत्पद्यते । अतः पूर्वं प्रायश्चित्त-ज्ञानं मिथ्या भवति। उत्तरस्य तु ज्ञानस्य न किञ्चिद् बाधकम् । न च पूर्वज्ञानं बाधकम् । तदुत्पत्तिकाले उत्तरज्ञानस्यैवाभावात् । उत्तरकाले तु स्वयं बाधितमिति । तस्मात् पूर्वदौर्बल्येन उत्तरस्यैवानुष्ठानमिति ।

अनपुंसकस्येत्यादाविवेति । पृ. ८७

सुडनपुंसकस्य इति पाणिनिसूत्रे नपुंसकव्यतिरिक्तः सुट् सर्वनाम-सञ्ज्ञकः स्यात् इत्येकवाक्यत्वसिद्धये नञः पर्युदासार्थत्वमाश्रितम् ।

नार्षेयं वृणीते इत्यादाविवेति । पृ. ८७

प्रतिषेधः प्रदेशेऽनारभ्यविधाने च प्राप्तप्रतिषिद्धत्वात् विकल्पः स्यात् (जै.सू.१०.८.१)

चातुर्मास्येषु साकमेधपर्वणि महापितृयज्ञे इष्टित्वादविशेषेण दर्शपूर्ण-मासविध्यन्तप्राप्तौ इदमाम्नायते नार्षेयं वृणीते न होतारमिति । अत्र पर्युदासपक्षे नञ्धातुभ्यां वरणव्यतिरिक्त प्राकृताङ्गलक्षणाप्रसङ्गात् मुख्यार्थानुग्राहकः प्रतिषेध इति प्राप्ते सिद्धान्तः- प्रतिषेधपक्षे प्रापक-

प्रतिषेधयोः द्वयोरपि शास्त्रत्वात् निषेधशास्त्रस्य प्रापकशास्त्रसापेक्षत्वेन द्वयोस्तुल्यबलत्वाच्च विकल्पः । स चाष्टदोषदुष्टः । नित्यवच्छ्रुतस्या-त्यन्तायुक्तपाक्षिकबाधापातश्च । अतः पदद्वयलक्षणया पर्युदासाश्रयण-मेव युक्तम् इति ।

सूक्तवाकाधिकरणम् पृ. ९३

सूक्तवाके च कालविधिः परार्थत्वात् (जै.सू. ३.२.११)

'सूक्तवाकेन प्रस्तरं प्रहरति' इत्यत्र उपपदविभक्तितः कारक-विभक्तेर्बलीयस्त्वे मानाभावात् सूक्तवाकस्य लिङ्गेनेष्टदेवताप्रकाशनार्थ-त्वेन कृतार्थत्वात् तृतीयाया इत्थम्भूतलक्षणार्थतामङ्गीकृत्य प्रस्तर-प्रहरणकालविधित्वमंगीकार्यं सूक्तवाकपाठकाले प्रहरणं कार्यमितीति पूर्वपक्षः । सिद्धान्तस्तु तृतीयायाः करणत्व एव प्रचुरप्रयोगेन शक्त्यङ्गी-कारः । इत्थम्भूतलक्षणे तु लक्षणा। अतः कारकविभक्तिप्राबल्येन तृतीयया सूक्तवाकस्य प्रहरणांगत्वम् । अतः सूक्तवाकपठनानन्तरं प्रहरणमिति।

रथघोषेण माहेन्द्रस्तोत्रमुपाकरोतीति । पृ. ९३

चोदनालिंगसंयोगे तद्विकारः प्रतीयेत प्रकृतिसन्निधानात् (जै.सू. १०.४.२)

वाजपेये श्रूयते रथघोषेण माहेन्द्रस्तोत्रमुपाकरोतीति। माहेन्द्रस्तोत्रं कर्तुं स्तोतॄन् प्रेरयतीत्यर्थः । प्रकृतौ उपावर्तध्वमिति दर्भाभ्यां स्तोत्रमुपा-करोतीति वाक्ये उपावर्तध्वमिति मन्त्रेण दर्भाभ्यां स्तोत्रं कर्तुं स्तोतृप्रेरण-रूपमुपाकरणं विहितम् । तदिह चोदकप्राप्तम् । तत्र रथघोषेणेत्यत्र

षष्ठीतत्पुरुषपक्षे षष्ठ्या अश्रवणेन षष्ठ्यर्थे लक्षणा स्यात् । अतो द्वन्द्वाश्रयणेन रथो घोषश्च उपाकरणसाधनः सन् द्रव्यत्वसामान्यात् रथो दर्भयोर्निवर्तकः, घोषश्च शब्दत्वसामान्यात् मन्त्रस्य निवर्तक इति पूर्वपक्षः। सिद्धान्तस्तु द्वन्द्वपक्षे न तावत् इतरेतरयोगः द्विवचनान्तत्वाभावात् । नापि समाहारः। द्वयोरपि पदयोः समाहारलक्षकत्वापातात्। अतः पूर्वपद-मात्रलक्षणाश्रयणेन षष्ठीतत्पुरुषः । रथस्य घोष उपाकरणसाधनमिति । रथघोष एव मन्त्रस्य दर्भयोश्च निवर्तकः नान्यघोष इति ।

यावत्या वाचा कामयीतेति । पृ. ९३

तेन त्वर्थेन यज्ञस्य संयोगाद् धर्मसंबन्धस्तस्माद् यज्ञप्रयुक्तं स्यात् संस्कारस्य तदर्थत्वात् (जै.सू. ९.१.३)

ज्योतिष्टोमे श्रूयते यावत्या वाचा कामयीत तावत्या दीक्षणीया-यामनुब्रूयात् इति। दीक्षणीयेष्टौ श्रुतोऽयं यथाकाम्यस्वरः न दीक्षणीया-पूर्वप्रयुक्तः। अपि तु परमापूर्वप्रयुक्तः। दीक्षणीयापूर्वस्य निष्फलत्वात्। परमापूर्वस्य स्वर्गफलकत्वात् इति प्राप्ते सिद्धान्तः । अत्र फलवत्परमा-पूर्वस्याश्रवणात् दीक्षणीयाशब्दः स्वजन्यापूर्वं लक्षयित्वा तद्द्वारा परमापूर्वं लक्षयित्वा परमापूर्वसाधनापूर्वकारणदीक्षणीयायाम् इत्यर्थपरः स्यात् । तथा च लक्षितलक्षणा दोषः। अतो वरा स्वापूर्वमात्रलक्षणेति तत्प्रयुक्त एव स्वरः । न च तस्य नैष्फल्यदोषः। परमापूर्वोपयोगितया परंपरया फलवत्त्वात् इति ।

निर्मन्थ्येनेष्टकाः पचन्तीति । पृ. ९९

निर्मन्थ्यादिषु चैवं (जै.सू.७.३.१८)

इत्यत्र निर्मन्थ्यशब्दस्य सद्यो निर्मथिताग्नौ यौगिकत्वेन नामत्वाभावात् वैष्णवशब्दवन्नातिदेशकत्वमित्युक्तम् ।

उत यत् सुन्वन्ति सामिधेनीस्तदन्वाहुरिति । पृ. १०१

सामिधेनीस्तदन्वाहुरिति हविर्धानयोर्वचनात् सामिधेनीनाम् । (जै.सू.३.७.१५)

ज्योतिष्टोमे श्रूयते उत यत् सुन्वन्ति तत् सामिधेनीरन्वाहुरिति । हविर्धानमण्टपे दक्षिणोत्तरभागावस्थितयोः हविर्धाननामकयोः शकट-योर्मध्ये दक्षिणशकटमत्र यत्तच्छब्दार्थः। तत्र स्थित्वा सामिधेनीरनुब्रूयादि-त्यर्थः ।

यस्य येनार्थसम्बन्ध इति न्यायेनेति । पृ. १०२

आनन्तर्यमचोदना (जै.सू. ३.१.२४) इत्यधिकरणवार्तिकवचन-मिदम्। यथा-

यस्य येनार्थसम्बन्धो दूरस्थेनापि तेन सः ।
अर्थतो ह्यसमर्थानामानन्तर्यमकारणम् ।। इति ।

तरसमयाः सवनीया इति । पृ. १०७

मांसं तु सवनीयानां चोदनाविशेषात् (जै.सू.३.८.४२)

षट्त्रिंशदाब्दिके शाक्यानामयनाख्ये सत्रे 'संस्थिते संस्थितेऽहनि गृहपतिर्मृगयां याति। तत्र यान् हन्ति तेषां तरसमयाः सवनीयाः पुरो-डाशाः' इति श्रूयते । तरसमया मांसमया इत्यर्थः । अत्र पूर्वपक्षः-तरसमयत्वं सर्वपुरोडाशार्थं स्यात्। संकोचकाभावात्। अवयुत्यानुवाद-

तया सवनीयपदस्योपपत्तेरिति । सिद्धान्तस्तु- नात्र पुरोडाशानुवादेन तरसमयता विधीयते। तथात्वे व्यवहितान्वयापातः। अतः सन्निहितान्वय-लाभाय ये सवनीयास्ते तरसमया इति सवनीयानुवादेन तरसमयताविधि-रेव युक्त इति । चोदनाविशेषः सन्निहितान्वयलाभः ।

तेन ह्यन्नं क्रियत इति । पृ. ११२

हेतुर्वा स्यादर्थवत्त्वोपपत्तिभ्याम् (जै.सू.१.२.२६)

इति हेतुवन्निगदाधिकरणे होमसाधनतायामन्त्रकरणत्वस्य व्याप्ति-रुक्ता ।

यूपस्य स्वरुं करोतीति । पृ. ११४

स्वरुस्त्वनेकनिष्पत्तिः स्वकर्मशब्दत्वात् (जै.सू.४.२.१)

अग्नीषोमीयपशौ श्रूयते 'यूपस्य स्वरुं करोति, स्वरुणा पशुमनक्ति' इति । यूपार्थं खदिरादिवृक्षच्छेदे यः प्राथमिकः शकलः पतितः स स्वरु-रुच्यते । स्वरुणेति वाक्ये अंजनसाधनत्वेनावगतस्य स्वरोरर्थप्राप्तमा-दानं करोतिनानूद्य यत् स्वरुमुपादत्ते तद्यूपस्य इति लाघवेन यूपीयत्व-विशेषणमात्रविधिसंभवे प्राथमिकयूपपदे खदिरादिवृक्षलक्षणाश्रयणं न कार्यम् । तस्माद् यूपानुनिष्पाद्यः स्वरुर्न छेदनादि यूपधर्माणां खदिरादि-वृक्षस्य च प्रयोजक इति सिद्धान्तः ।

वैश्वानरं द्वादशकपालमिति । पृ. ११४

फलसंयोगस्त्वचोदिते न स्यादशेषभूतत्वात् (जै.सू. ४.३.३८)

वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते इति प्रकृत्य श्रूयते 'यस्मिन् जात एतामिष्टिं निर्वपति पूत एव स तेजस्वीति । अतः 'स' इति जातमेव निर्दिश्य तस्यैव फलोक्तेः स्पष्टत्वात् पुत्रपूतत्वस्यापि पितुरभिलषितत्वेन आधानगतात्मनेपदाविरोधाच्च पुत्रफलमेव पूतत्वादिकमिति सिद्धान्तः ।

प्रोक्षण्यधिकरण इति । पृ. ११९

प्रोक्षणीष्वर्थसंयोगात् (जै.सू.१.४.११)

प्रोक्षणीरासादयतीत्यत्र श्रुतः प्रोक्षणीशब्दः उदकजातौ वृद्धव्यवहारे पूर्वमक्लृप्तत्वेन शक्तेः कल्पनीयत्वात् अश्वकर्णादिवन्न रूढः । योगस्तु व्याकरणे क्लृप्तः । प्रपूर्वात् उक्षसेचने इति धातोः करणे ल्युट् प्रत्यये व्युत्पादनात् । अतः प्रकृष्टोक्षणसाधनत्वार्थको यौगिकोऽयं शब्द इति सिद्धान्तः ।

अर्थाभिधानसंयोगादित्यधिकरण इति । पृ. १२७

अर्थाभिधानसंयोगान्मन्त्रेषु शेषभावः स्यात् तस्मादुत्पत्तिसम्बन्धोऽर्थेन नित्यसंयोगात् (जै.सू.३.२.१)

बर्हिर्देवसदनं दामीत्यादिमन्त्राणां यथा मुख्यस्य कुशच्छेदनस्य स्मारकापेक्षायां तदङ्गत्वेन विनियोगः तथा गौणस्याप्युलपच्छेदनस्य स्मारकापेक्षायां तदङ्गत्वेन विनियोग इति पूर्वपक्षे सिद्धान्तः- मुख्य एवार्थे मन्त्राणां विनियोगः। तत्रैव लिङ्गेन शीघ्रं श्रुतिकल्पनात्। गौणार्थ-विषये तु तात्पर्यग्रहाख्यकारणापेक्षत्वेन श्रुतिकल्पने विलम्बादिति ।

न गिरा गिरेति ब्रूयादिति । पृ. १२८

आम्नातादन्यदधिकारे वचनाद् विकारः स्यात् (जै.सू. ९.१.४९)

'यज्ञायज्ञा वो अग्नये गिरा गिरा च दक्षसे' इति यज्ञायज्ञशब्दोपेतायां

ऋचि उत्पन्नं साम यज्ञायज्ञीयमित्युच्यते। ज्योतिष्टोमे यज्ञायज्ञीयेन स्तुवीतेति विधीयते । तत्र 'न गिरा गिरेति ब्रूयात् । ऐरं कृत्वोद्गायेत्' इति श्रूयते । गिरा गिरेति स्थाने गकारलोपेन इराशब्दं कृत्वा गेयमित्यर्थः । निषेधवाक्यप्राबल्ये गिरा गिरेति शब्दलोप एव स्यात्, न इरा इरेति शब्दप्रक्षेप इत्याशयः ।

मृण्मयेन प्रतिष्ठाकामस्येति । पृ. १२९

नैमित्तिके विकारत्वात् क्रतुसाधनमन्यत् स्यात् (जै.सू.४.२.४)

दर्शपूर्णमासयोः अपः प्रणयतीति प्रकृत्य मृण्मयेन प्रतिष्ठाकामस्य प्रणयेदिति श्रूयते । अत्र अपः प्रणयतीति सामान्येनोक्ताप्प्रणयनस्य साधनाकाङ्क्षस्य सन्निहितेन मृण्मयेनान्वयेन नैराकाङ्क्ष्यसम्भवे अश्रुतपात्रान्तरकल्पनाऽयोगात् तदेव नित्यक्रत्वर्थमपीति पूर्वपक्षः । सत्यपि 'वारणो यज्ञावचरः' इति वचने तदज्ञानेनायं पूर्वपक्षः । सिद्धान्तस्तु प्रणयनस्य साधनाकाङ्क्षासत्वेऽपि प्रतिष्ठाकाम इति प्रतिष्ठारूपफलसम्बन्धितया श्रुतस्य मृण्मयस्य साधनतयान्वयायोगेन वारणो यज्ञावचर इति वचसोक्तवारणपात्रान्वयेन नैराकाङ्क्ष्यात् नित्यप्रणयनार्थं पात्रान्तरं सम्पाद्यमिति ।

सन्दंशन्यायेनेति । पृ. १३०

कर्तृगुणे तु कर्मासमवायात् वाक्यभेदः स्यात् (जै.सू. ३.१.१९)

अत्र भाष्ये दर्शपूर्णमासयोः प्रयाजसमीपे श्रुतं अभिक्रामं जुहोतीत्युक्तमभिक्रमणं किं प्राकरणिकसर्वहोमांगमुत प्रयाजहोममात्राङ्गमिति संशय्य प्रयाजादिकमिव प्रकरणेन दर्शपूर्णमासाङ्गतया प्राकरणिकसर्वहोमाङ्गमिति प्राप्ते प्रकरणबलेन प्रधानान्वितं सत् तत्कर्तृसंस्कारद्वारा तदुपपादकं चेत् प्रयाजान्वयेऽपि तथा सम्भवात् संदंशबलात् प्रयाजकर्त्रैवान्वेति । तथाहि सन्दंशो नाम एकाङ्गानुवादेन विधीयमानयोरङ्गयोरन्तराले विहितत्वम् । अभिक्रमणं हि समानयते जुह्वामुपभृत इति प्रयाजानुवादेन किञ्चिदङ्गं विधाय अभिक्रामं जुहोतीति विधीयते । तदनन्तरमपि यो वै प्रयाजानां मिथुनं वेदेति किञ्चिदङ्गं विधीयते । इति सिद्धान्तः ।

अच्छिद्रेण पवित्रेणेति । पृ. १३१

अनुषङ्गो वाक्यपरिसमाप्तिः सर्वेषु तुल्ययोगित्वात् (जै.सू.२.१.४९)

चित्पतिस्त्वा पुनातु । वाक्पतिस्त्वा पुनातु । देवस्त्वा सविता पुनातु इति मन्त्रत्रयानन्तरमाम्नातः अच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिः इत्ययं शेषः किं पूर्वयोरनुषज्यते किं वा परस्यैव शेष इति संशये शेषस्यानन्तरसम्बन्धमात्रेण नैराकाङ्क्ष्यात् पूर्वयोश्च स्वत एवाकाङ्क्षाविरहात् नानुषङ्ग इति प्राप्ते पुनातु शब्दैकवाक्यतापन्नस्य अच्छिद्रादेः तत्करणद्वारेण पवनक्रियाप्रकाशनार्थत्वात् तस्या एव पूर्वमन्त्राभ्यामपि प्रकाश्यत्वात् प्रधानवशेनानुकर्षस्य न्याय्यत्वात् अनुषङ्ग इति सिद्धान्तितम् ।